अनीचकर्मार्थम् (anīcakarmārtham) *adv.* for the sake of noble deeds अतोऽप्यनीचकर्मार्थं योज्यास्तित्यादयो बुधैः AgniP. 95.16.

अनीचकाश (anīca-kāśa) *adj.* in which the *kāśa*-plants grow up (i.e. autumnal) अभीष्टमासाद्य चिराय काले समुद्धृताशं कमनी चकाशे । योषिन्मनोजन्मसुखोदयेषु समुद्धृताशङ्कमनीचकाशे ŚiśuVa. 6.74.

अनीचकैस् (a-nīcakais) *adv.* 1 not mildly, intensely तनुरनुशये ···। क्वचिद विचरत्वाटुश्चित्ते चरिष्णुरनीचकैरिति रतिरसावेशो यूनां ययौ शतशाखताम् Kapphiṇā. 14.27; 2 not softly, loudly रौद्रं शब्दमनीचकैः प्रकटयन्भूपोऽवनीपावृतः ।··· धत्तेऽनेकपराजिदर्दलने शार्दूलविक्रीडितम् ŚrīVīraSta. 23.

अनीचदर्शिन् (a-nīcadarśin) *m.* name of a Buddha (*lit.* not gazing downwards) लोकनाथस्तु लोकेशः ···। अनीचदर्शी ··· अवलोकितः TrikāŚe. i. 1.16.

अनीचवर्तिन् (anīcavart-in) *adj.* 1 behaving nobly (पदगतिः) अनीचवर्तिनस्तस्य ग्रहस्येव फलप्रदा । सुरदिनराशिगसत्वात् बभूवाश्चर्यभूर्नृणाम् RājTa.(Śrī.) 1(7).8; II not situated in a depression sign, RājTa.(Śrī.) 1(7).8.

अनीचानुवर्तिन् (a-nīcānuvartin) *adj.* not following a low or vile person (दमयन्त्युवाच) प्रभुः क्षमावानवीरश्च ···। रहोऽनीचानुवर्ती च छीवक्ष्मम नैषधः MahāBhā. iii. 71.14 [*m.* a faithful lover or husband, MW., APTE]

अनीची (a-nīcī) *adj.* [P. vi. 3.138; vi. 4.138] not going downwards एकदा तु ते सर्वे सुपर्वसरितः सलिलेषु विहृत्य समुत्तीर्णा वीचीभिरनीचीभिरुल्लसितफेनकूटेष्विव पटगृहवाटेषु ··· सुखमासामासुः BhārCam. 2.0(1); कटाक्षवीचीभिः । शीतलयानीचीभिः कृपया मां देवि GītiŚ. 39; *cf.* अन्यञ्च्.

अनीचैस् (a-nīcais) *adv.* 1 not in a low voice, loudly अथ जगदुरनीचैराशिषस्तस्य विप्राः Bhaṭṭi. 1.27; 3.2; वियन्नभः क्ष्मा विवती ···। अमी इतीवोद्धतसंकथा मिथो वदन्त्यनीचैरुदयाचलौकसः RāmC. 5.74; 2 not slowly, quickly (समव्ययसनवर्गः) चलयति हि विभूतिं भूयसीमप्यनीचैरपि विबुधमतीनां सम्प्रकोऽयं दुरन्तः NītiSā. 15.68 (comm. अनीचैद्रुतमित्यर्थः); नभसि तुरगसैन्यम् ··· अनीचैरुत्तीरादधावत् । हरिणकुलमिवासीत् HarVi. 41.53; पर्याणाग्रोल्कीर्णनियन्त्रारमनीचैरारोहन्तं सोत्सुकमश्वं प्रसुकायाम् । तस्यौ सादी Kapphiṇā. 7.10; 13.21; पताका । कामोर्वीकमितुरनीकिनीमनीचैरायान्तीं कथयति जेष्यतो जगन्ति HammīMaMa. 2.17.

अनीजान (án-ījāna) *adj.* who has not performed a sacrifice अप वै तृतीयसवने यज्ञः क्रामतीजानादनीजानम् TaiS. VI. vi. 7.3; 'त्वमग्ने ···' 'सोम ···' इत्याज्यभागयोः पुरोनुवाक्ये अनुब्रूयाद्यः पूर्वमनीजानः स्यात्तस्मै AitBr. 1.4(22); यं कामयेत यथैवानीजानोऽभूत्तथैवेजानः स्यादिति AitBr. 11.7(304); GopBr. ii. 3.3(191.5); अथ किमित्ते विष्णो परिचक्ष्यं भूदितीन्वीजानस्याथानीजानस्य । व्याप्यर्थैव पूर्वया यजते BaudhŚS. ii. 330.15; तं ततो नानीजानमपरा फाल्गुनी पर्यवेयात् ĀpaŚS. viii. 21.4; नैनमनीजानं संवत्सरोऽतीयात् MānŚS. 57.8; दर्शपूर्णमासानीजानो दक्षिणाग्निपक्वं चातुष्प्राश्यं ब्राह्मणान् भोजयेत् KātyŚS. iv. 6.10.

अनीजित (an-ījita) *adj.* not despised, not looked down upon (वृन्दावनम्) अभ्रेजि विभ्राम्भिरनीजितैश्च यत्कदाप्यशोबद्भिरशेषजन्तुभिः DhātuKā. 1.25.

अनीड (á-nīḍa) *adj.* [RPrāti. 1.21] I nestless शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः RV. x. 55.6; शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीडः SV. II. ix(1). 7.2; II non-constructor of a nest, who has no body (i.e. incorporeal) भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् । कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ŚvetāU. 5.14 (Śaṅ. अनीडाख्यं नीडं शरीरमशरीराख्यम्); अनीलः अनीडः नीडस्याकर्ता AdvaiSi. 423.23; [*m.* name of Agni or fire, MW.; epithet of Agni, APTE]

अनीत् (an-īt) (Gr.) not (ending in the feminine suffix) ई अनीच या नदीदन्त च यदेकाच् MahāBh. iii. 159.4 (*on* vi. 3.43)

अनीत (á-nīta) *adj.* [*f.* -ā] I not brought (forward) स यद्यनीतासु दक्षिणासु कलशो दीर्येत ŚatBr. IV. v. 10.7; अनीतासु चेद्दक्षिणासूद्गात्रपक्षेदोऽवक्षिणः संस्थाप्य पुनराहारः KātyŚS. xxv. 11.7; xxv. 12.26; II not brought (within the reach or range) प्राप्ता कथमपि दैवात्कण्ठमनीतैव सा ···। रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता Ratnā. 2.18; शरगोचरतामनीतयोनियतं शिक्षितमस्त्रविद्यया पुरतो गुरु[रामयोः] PṛthvīVi. 12.10; (महेश्वरः) अनवच्छिन्नः — विषयेण परिच्छिन्नतामनीतः Bhāsk. i. 29.17 (*on* i. 1.1); अननुभूतस्य — कदाप्यनुभवविषयतामनीतस्य Bhāsk. i. 341.21 (*on* i. 6.11)

¹अनीति (a-nīti) *f.* 1 bad policy, wrong act एष मन्थरकः समायाति । तदनीतिरनुष्ठितानेन । वयमपि नूनं व्यापादनीयतां यास्यामोऽस्य कारणात् PañcT.(Kos.) 2.183(5) (143 25); अनुकूलविधिविहितसाहायकस्य साहसिकस्य सर्वदा शस्यसंपदि वा नीतिरनीतिरपि फलति TilaMañ. 155.14; अनीतिमिव राज्यार्थी प्रभूणां संगमेच्छया । विससर्ज नरेन्द्रोऽपि तामन्तःपुरयोषितान् KumāDeC.(So.) 19.18; अनीतिरिव सच्छिद्रं राज्ञो नित्यं भयावहम् ŚukraNī. 1.15; 2.226; 2 evil conduct, immorality अनीत्या वैरिविहितैरभिचारादिभिस्तु वा । ये रोगाः पीडयन्त्येनं ते विनश्यन्त्यशेषतः TantrRā. 10.97; जहेऽन्यदारान् स्वपुरीं दशास्यो गां कार्तवीर्यो यतिनं मुमोष । भूपानकर्षद्गिर्नी च कंसोऽप्यहीकिमेतानसकावनीतीः DvyāśraKā. 2.82; सामन्तलोकानपि दण्डयित्वा ··· राजा । तेषामनीतिं भजतां च भूम्या स्वभूमिदेशस्य समर्थकोऽभूत् VīraBhā. 5.144; 2.69; तदनीत्या न वर्तेयुस्तेन साकं धनाशया । वर्तन्ति यदनीत्या ते तेन साकं पतन्त्यराद् ŚukraNī. 5.23; 3 name of a town (*lit.* having people of bad conduct) द्वीपोऽयं चित्रकूटाख्यः पुरं चानीतिसंज्ञकम् RatnaCūKa. 142; [Kośas give *anīti* as the meaning of *anaya* : NānārthaSam. ii. 11.5; ViśvaLoK. 264.70]

²अनीति (an-īti) *f.* [Abl.] because of absence of a natural calamity (रामस्य) यस्य रराजानीते रत्नानि जनः कुले धराजानीते Nalo. 1.5 (comm. अनीतेः ईतिरहिततया हेतौ पञ्चमी)

¹अनीति (a-nīti) *adj.* not having good policy, having bad policy रिपुरुन्नतधीरचेतसः सततव्याधिरनीतिरस्तु ते ŚiśuVa. 16.11 (comm. अनीतिर्नीतिरहितः); यश्च नीतिमत्पुरुषाधिष्ठितोऽप्यनीतिः ··· देशः NalaCam. 1.27(13); यस्य नीतिमतोऽप्यासन् प्रजाः शश्वदनीतयः KathāSaSāg. xii. 6.87; फलहीनमभूत्तस्य शरजालं नृपस्य तद्। अनीतेश्चरितम् ··· यथा GaṇeP. i. 79.31; सन्तः कण्टकिताः कथं यदि कृता निष्कण्टका मेदिनी प्रख्याता यदि ते गुणाः कथमथ प्रस्तौति दोषं जनः। नीतावायधुरंधरो यदि भवान्कस्मादनीतिः प्रजा वृत्तं देव न चित्रमेव हि न चेच्चित्रं विधत्ते कथम् SaduktiKa. 195.16; संरम्भी मानी ते कर्णो विदः कथं नु भीमानीति YudhiVi. 4.44; त्वया किं न त्वया किं न हतो राजेलनीतयः। परस्परविवादात्ते तत्कालं चुक्षुभुर्जडाः RājTa.(Jo.) 241.

³अनीति (an-īti) *adj.* 1 devoid of natural calamities, free from disasters, ŚiśuVa. 16.11; NalaCam. 1.27(13); KathāSaSāg. xii. 6.87; SaduktiKa. 195.16; Nalo. 1.5; 11 non-calamitous अनीतयो वाता देशिकवाञ्छयाः ··· मुञ्चन्ति श्रमन् ŚaṅkaDigVi.(Mā.) 4.81 (comm. न विद्यन्त ईतयोऽतिवृष्ट्यादिरूपा बाधा येभ्यः)

अनीतिका (anīti-kā) *adj.* (*f.*) free from evils स इमां महापृथिवीं ससागरगिरिपर्यन्तामखिलामकण्टकामनीतिकामनुपद्रवामूढां स्फीताम् ··· धर्मेणाभिनिर्जित्य अध्यावसति स्म GaṇḍVyū. 329.1; cf. अनीतिक [DBHS.]

अनीतिकारक (anīti-kāraka) *adj.* doing something unjust नानीतिकारकः स्वामी परब्रह्म सतां गतिः ŚivaP. ii(2). 43.34 (123B.5)

अनीतिगहन (anīti-gahana) *n.* thicket in the form of immorality तदहं पृथिवीपालः ···। अनीतिगहनावृत्तं व्यसनाब्धिं कथं भजे BṛKathāMañ. ix. 2.964.

अनीतिगोचर (an-ītigocara) *adj.* not within the range of (i.e. not being subject to) natural calamities बलेन यः स्वयमनिलोऽपि नानिलः सनीतिरप्यभवदनीतिगोचरः RāghPāṇ.(Dha.) 2.29.

अनीतिज (anītij-a) *adj.* arising out of bad policy अनीतिजं यद्विधानजं सुखं हठप्रणीतं विविधं प्रदृश्यते। न विद्यते तस्य गतिर्महीपतेः MahāBhā. xii. 120.50.

अनीतिजल (anīti-jala) *n.* water (in the form) of wrong policy अनीतिजलकल्लोलैर्लोलमुच्चैः क्षणाद् भुवि। व्यसनाख्यो नदीपूरः पातयेद् राज्यपादपम् PārśvC. 1.92.

अनीतिज्ञ (a-nītijña) *adj.* not conversant with policy or political science, ignorant of policy or morality अनेनानीतिज्ञेन वयं मर्मज्ञाः परिभूताः Hitopa. 3.55(15); [(*anīti-jña*) clever in immoral conduct, MW.; impolite, APTE; not discreet, MW.; APTE]

¹अनीतिता (anīti-tā) *f.* the state of being one who lacks in proper policy प्रसृत्वरानीतिलतावितानकुठारकल्पेऽपि यदीयराज्ये। ललास लोके यदनीतितैव तत्कस्य नो विस्मयमाततान HammīMaKā. 2.34.

²अनीतिता (anīti-tā) *f.* the state of being one free from calamities, HammīMaKā. 2.34.

अनीतितारचक्र (anīti-tārācakra) *n.* cycle of stars in the form of people of bad conduct अत्यन्तोद्दृप्तविद्विट्तिमिरभरभिदि च्छादितानी[ति]ताराचक्रे विष्वक्प्रकाशं सकलजगदमंदावकाशं दधाने EI. ii. 238.28.

अनीतिनिरत (anīti-nirata) *adj.* engaged (i.e. indulging) in immoral acts असुरा यवनांशेषु जाता लोकोपतापिनः। अनीतिनिरताः सर्वे संग्रहे च प्रबुद्धयः ĀdiP. 14 139.

अनीतिपवनाक्षिप्त (anītipavanākṣipta) *adj.* hurled by the wind of bad or erroneous policy धूर्तः स्त्री वा शिशुर्यस्य मन्त्रिणः स्युर्महीपतेः। अनीतिपवनाक्षिप्तः कार्याब्धौ स निमज्जति Hitopa. 3.128.

अनीतिपुर (anīti-pura) *n.* name of a town (*lit.* city having people of bad conduct) चित्रकूटाभिधो द्वीपो विद्यते धूर्तलोकभूः। तत्रानीतिपुरं नाम पुरमस्ति सुविस्तृतम् RatnaCūKa. 121; यदनीतिपुरप्राप्तिस्तद्वीनकुलसंभवः RatnaCūKa. 532.

अनीतिमत् (anīti-ma(n)t) *adj.* 1 having bad conduct भाग्यभोज्यानि राज्यानि सन्त्यनीतिमतामपि ViṣṇuP. i. 19.45; अनीतिमन्तो बलिनोऽपि गम्या नैकान्तमस्तीत्यपरे निराहुः VarāṅgaC. 16.44; तदेतत्काकतालीयं तदेतद्वा घुणाक्षरम्। यदनात्मवतामायुर्यच्चानीतिमतां श्रियः ŚṛṅgāPra. 271.9; SūktiRa. 40.21; 163.61; स्वाराध्यो नीतिमान् राजा दुराराध्यस्त्वनीतिमान् ŚukraNī. 1.17; 11 immoral सर्वं राज्ञः कृतं कर्म नीतिमद् भवति प्रभोः। अन्येषां पुण्यकर्तॄणामपि कृत्यमनीतिमत् PadmP. iv. 56.26.

अनीतिमदिरा (anīti-madirā) *f.* wine in the form of bad policy अनीतिमदिरां त्यक्त्वा लोभादिविषदूषिताम्। अनहंकारमादद्यु प्रज्ञामृतमनुत्तमम् Yādavā. 22.22.

अनीतिमार्ग (anīti-mārga) *m.* 1 path of wicked conduct (नृपतिः) शक्तिभिरिव बलीभिस्तिसृभिरुद्भासितेनानीतिमार्गेणेवातिसूक्ष्मदृष्टिलक्ष्येण मध्यभागेन भ्राजमानाम् ··· श्रियमपश्यत् TilaMañ. 54.12; 2 unstatesmanlike course, foolish course येनैवानीतिमार्गेण हारितं हर्षभूभुजा। निन्दन्नप्यादधे तं स राज्ये व्यवहरन्स्वयम् RājTa.(Ka.) 8.681.

अनीतिमृत्यु (anīti-mṛtyu) *m.* unlawful death अनीतिमृत्युना तेन जीवनस्योचितेन किम्। जीवन्नेवेक्षते भद्रम् PārśvC. 6.575.

अनीतिलता (anīti-latā) *f.* creeper in the form of wrong or bad policy प्रसृत्वरानीतिलतावितानकुठारकल्पेऽपि यदीयराज्ये। ललास लोके यदनीतितैव तत् कस्य नो विस्मयमाततान HammīMaKā. 2.34.

अनीतिवित्ता (a-nītivittā) *f.* absence of the state of being one who knows the precepts यद् तु एवं सति हिंसानिषेधेन परेण पश्चाल्लम्भविधिविरोधादनुष्ठानबाध इति। तद् तान्त्रिकस्यानीतिवित्तामाधत्ते SiddhāSi. ii. 174.4.

अनीतिविद् (a-nītivid) *adj.* not conversant with statesmanship, ignorant of good policy or morality नानीतिविन्नाम कश्चिद् प्रयोगस्तु विधीयते RājTa.(Ka.) 7.1529; सकिं मयीन्युपचिकीर्षति मानसं मे त्वा प्रत्यपीति धिगनीतिविदुक्तिरेषा PṛthvīVi. 4.60; [clever in immoral conduct, MW.; impolite, APTE; not discreet, MW.; APTE]

अनीतिशास्त्रज्ञ (a-nītiśāstrajña) *adj.* not knowing the science of polity एकाकिनि वनवासिन्यराजलक्षमण्यनीतिशास्त्रज्ञे। सत्त्वोच्छ्रिते मृगपतौ राजेति गिरः परिणमन्ति Tantrākhyā. 4 24; PañcT. 1.4(13.1); ŚārṅgaPa. 905; Subhāṣi. 591; नीरवोऽनीतिशास्त्रज्ञाः कामुका ब्रह्मविद्विषः। अधर्मेत्रयो लुब्धाः शत्रवोऽमी न मन्त्रिणः SūktiRa. 83.2.

अनीतिसूत्रधार (anīti-sūtradhāra) *m.* initiator of immorality भवादृशेषु परमनीतिसूत्रधारेषु धीवरत्वेन प्रहसितसुराविपेषु विज्ञातशिष्टदुष्टपटलपटुदृष्टिषु न किंचित् श्वेताम्बरदर्शनम् MudrīKn. 3.6(1)

अनीत्युपचिता (anīty-upacitā) *adj.* (*f.*) acquired through improper means त्वद्वक्त्रसाम्यम् ···। लब्ध्वापि पर्वणि विधुः क्रमहीयमानः संसत्यनीत्युपचितां श्रियमाशुनाशाम् Kuval. 90(61)

अनीत्वा (a-nītvā) *ger.* not having led विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा। अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ŚiśuVa. 2.34; ŚṛṅgāPra. 275.9.

अनीदादि (an-īdādi) *adj.* excluding -ई etc. (i.e. excluding the *pragṛhyas* prescribed by i. 2.34 to i. 2.39) अ इ उ वर्णस्यान्तेऽनुनासिकोऽनीदादेः SiddhaHe. i. 2.41 (comm. अनीदादेरिति किम्। अग्नी। अमी किमु)

अनीदित् (an-īdit) *adj.* (verbal base) not having the indicatory sound ई अनीदितश्च सं दर्भे दृभति ग्रन्थ ईदितः DaivaVyā. 142 (comm. 'दृभी भये' 'दृभ संदर्भे' इत्यनयोरीदितो दृब्धमिति भवति, अनीदितस्तु दृभितमितीत्यभिप्रेत्य अनीदित इत्युक्तम्)

अनीदृक्क्रम (an-īdṛkkrama) *adj.* not having a fixed course of behaviour श्रूयन्ते बहवो महानृपतयः किं तैरनीदृक्क्रमैः PratāYaBhū. 203.2.

अनीदृक्त्व (anīdṛk-tva) *n.* the state of not being like this, the state of being distinctive अज्ञान एव ज्ञानस्य साक्षाद्विरोधावधारणेनाज्ञानावस्थायास्तदभिन्नायाः ज्ञानसाक्षान्निवर्त्यत्वार्हत्वाद्, न तु रूप्यादीनाम्, अनीदृक्त्वात् AdvaiSi. 487.18; साम स्वनीदृक्त्वादप्रशस्तमित्येवं सामनिन्दासहितमृक्स्तुत्या ऋग्विधिः कल्पनीयः प्रतीयते MayūMāli. 608.9 (*on* ix. 2.8)

अनीदृगाकृति (anīdṛg-ākṛti) *f.* dissimilar form स व्यमृशद् भाग्यपुण्यपापयोरेतदन्तरम्। पुरुषत्वे समेऽमुष्य मम चानीदृगाकृतिः PrabhāC. 204.15.

अनीदृगात्मन् (anīdṛg-ātman) *adj.* having an indescribable nature आधर्षोत्तुलितां प्रकम्पनैः कम्पितां मुहुरनीदृगात्मनि। वाचि रोषितवतामुना महीं राजकाय विषया विभेजिरे ŚiśuVa. 14.43 (comm. अनेवंरूपायाम् ··· वाचि)

अनीदृगाशय (an-īdṛgāśaya) *adj.* not having such disposition of mind उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः। इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः Kirātā. 2.28 (comm. अविद्यमान ईदृगाशय इत्थं भूतअनुक्ताभिप्रायो यस्य सोऽनीदृगाशयः)

अनीदृश् (an-īdṛś) *adj.* [P. iii. 2.60; vi. 3.90; viii. 2.62] A not appearing as 'this', indescribable द्रष्टापि वा दर्शयितापि नाहं सोऽहं स्वयंज्योतिरनीदृगात्मा ViveCū. 509; महानीदृक् प्रथमवपुः सृष्टौ ते। ईशो मायी न च वपुरस्येत्युक्तिः NayaMañ. II. i. 10.19; B not appearing like this, not of such a kind, unparallelled, matchless अनीदृगुपमाभूतो दिग्दिगन्तरगोचरः MahāP. 25.187; महारथस्याथ्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद् यशःसितम्।

रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः NaiṣC. 1.61; सर्वथैव त्वया नाथ विजिग्येऽहमनीदृशा PāṇḍaC. 5.358; 11.324.

अनीदृश (an-īdṛśa) *adj.* [*f.* -ī] [P. iv. 1.15] **A** not appearing as 'this', indescribable सत्समृद्धं स्वतःसिद्धं शुद्धं बुद्धमनीदृशम्। एकमेवाद्वयं ब्रह्म AdhyāU. 63; ViveCū. 472; निर्विशेषं निराभासमतादृशमनीदृशम्।··· निर्गुणं ब्रह्म शिष्यते SarvaVeSāSam. 761; **B** not appearing like this, unparallelled, not of such a kind, matchless अहंभावं परित्यज्य जगद्भावमनीदृशम्। निर्विकल्पे स्थितो विद्वान् भूयो नाप्यनुशोचति SaubhāLaU. 654.28; रूपं कान्ति बलं धैर्यं गुणाः सर्वेऽप्यनीदृशाः MahāBhā. iv. 1143*(5); अनीदृशश्च नो कश्चिदुपपत्तेरभावतः। तस्मादकर्तृको वेदः PadmP.(Ra.) 11.166; सोऽयमीदृशः कथमनीदृशं प्रसूते MahāvīC. 4.18(1); इष्यते हि जगत् सर्वं न कदाचिदनीदृशम् TattvSam. 2275; NyāyMañ. i. 178.8; ii. 74.13; PramāMī. 1.9 (*on* i. 1.0); SiddhāTaVi. 5.12; लतामनीदृशीं मोहाद् यः कश्चिदवलम्बते। प्रमीतो हिमवत्यस्मिन् स प्रयाति परां गतिम् BṛKathāŚloSam. 18.434; अनीदृशमिदं रूपं न जातं न जनिष्यते RāghPāṇ.(Dha.) 7.83; ईदृशं प्रत्यक्षमित्युक्ते अर्थादनीदृशमाभासं भवति Kāśi. ii. 21.14 (*on* 5(1).21); YuktiSneha. 49.14 (*on* i. 1.5); सोऽयमनेवमात्मिकाया भूमेरनीदृशस्य वा जलस्य न परिणामो भवितुमर्हति TattvVai. 135.16 (*on* 3.14); करणीभूतभावार्थविषयं च कार्यं नैमित्तिकमिति कुतोऽनीदृशस्यानुष्ठानम् NyāyRaMā. 113.13; मन्दभाग्यतया पुंसां गुरवः स्युरनीदृशाः TriṣaŚaPuC. i. 2.44; साक्षिमान् प्राड्विवाकादिप्रत्यवेक्षणवान्। यदा त्वनीदृशस्तदा न दद्यादित्यर्थसिद्धं स्पष्टयितुं पक्षाभासमेकमुदाहृत्य तस्योत्तरं न देयम् SmṛtiCan. iii. 92.20; विभज्य निःक्षिप्तमिति स्वमम्बुदैर्ध्रुवं विदित्वात्मदशामनीदृशीम् Surath. 5.40; दृष्ट्वा तद्देहशोभामनीदृशीम्।··· भणितो भूपतिः PārśvC. 6.1196; अनीदृशी प्रवृत्तिः किं भिनत्ति भवपञ्जरम् SamarāSam. 9.438; तपस्विनमिवालोक्य मुद्राभ्रंशादनीदृशम्। विश्राभीशं दिदेशाथ दासीं भद्रा विनिद्रधीः ŚāliC. 4.154; यदैहिकामुष्मिकशर्मयोग्यं तत् कर्म कर्तव्यमनीदृशं नो VīraBhā. 5.80; जयति कापि हि शक्तिरनीदृशी ···। यद्वशो न हि शृणोति न पश्यति वेत्ति नो NemiC. 8.38; तेनानीदृशमुच्चैष्ट्वं बाध्यते MīmāKau. ii. 321.2 (*on* iii. 3.9); भौमेषु तीर्थेषु मानसेषु च नित्यशः। उभयेषु च यः स्नाति स याति परमां गतिम्।··· एवमनीदृशेषु यत्र तीर्थपदप्रयोगः स गौणः VīraMi.(Tīrtha.) 11.3; 163.23; **C** improper, cf. **अनीदृशराजाज्ञा**.

अनीदृशगुणोदय (anīdṛśaguṇodaya) *adj.* having rise of unparallelled merits यादृशं स्यात् तपोदानमनीदृशगुणोदयम्। कथनं तादृशस्यास्य तपोदानकथोच्यते MahāP. 4.9.

अनीदृशराजाज्ञा (anīdṛśa-rājājñā) *f.* improper royal order न्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्युह्य यथास्थानं गमयेत्।··· तादृशि विषये राजाज्ञानवसरात्। अनीदृशराजाज्ञाया निषिद्धत्वात् VīraMi.(Vyavahāra.) 88.19.

अनीदृशवर्णन (anīdṛśa-varṇana) *n.* improper description तन्वी श्यामा विशालदृगञ्चला। विशददशना मध्यक्षामा वृथेति जनाः श्रमं विदधति मुधा रागादुच्चैरनीदृशवर्णने VijñāŚ. 60.

अनीदृशसंपत्ति (anīdṛśa-sampatti) *f.* incomparable wealth or prosperity इत्यालपन्नयमुत्तीर्य सुरधुनीमनीदृशसंपत्तिपेशलान् कोसलानवलोकयन्··· अजिहीत साकेतम् YātrāPra. 8.103(1)

अनीदृशात्मन् (anīdṛśātman) *adj.* of indescribable or unparallelled nature तरूणामेव तावच्चेद् ईदृशो विभवोदयः। किमस्ति वाच्यमीशस्य विभवेऽनीदृशात्मनः MahāP. 22.204.

अनीन (an-īna) (Gr.) other than the *taddhita*-suffix *īna* अह्नोऽह्नोऽनीने MugdhaBo. 7.18 (68.6)

अनीनस् (anīnas) *m.* name of a king अनेना (v. l. अनीना) यवनाश्वश्च ककुत्स्थो विक्रमी रघुः।··· राजानो निधनं प्राप्ताः MahāBhā. i. 1.172.

अनीनादट् (an-īnādaṭ) (Gr.) other than the *taddhita*-suffixes *īna*, *at* and *aṭ* अनीनादट्यह्नोऽतः SiddhaHe. vii. 4.66.

अनीप्सत् (an-īpsat) *adj.* [*f.* -ntī] [P. ii. 3.71] not desirous of, unwilling पुण्यस्याप्यनीप्सतो न भोक्तव्यम् HirSŚ. xxvi. 5.112 (83.12); ĀpaDS. i(6). 19.10; (पुत्रान्) अनीप्सन्ती तदा कुन्ती भर्तारं सा वदिष्यति PadmP. v. 14.64.

अनीप्सनीय (an-īpsanīya) *adj.* not fit to be desired or wished for अचिन्तनीयं परिवर्जनीयमनीप्सनीयं स्वनवेक्षणीयम्। प्राप्तोऽस्मि पाप्मानमिमम् Rāmā. iv. App. I. 14(44)

अनीप्समाना (an-īpsamānā) *adj.* (*f.*) not wishing, not desiring, unwilling काचित् प्रमदा सबाष्पां तां दुःखितां द्रष्टुमनीप्समाना। प्रासादसोपानतलप्रणादं चकार पद्भ्याम् Saund. 6.6.

अनीप्सा (an-īpsā) *f.* non-desire निस्पृहता निरीहता धनादिष्वनीप्सा Aparā. 1007.20 (*on* 3.158); [Inst.] against one's wish मायात्मकमेव रूप्याद्येष्टव्यम्। यतः — मायामनिच्छतस्तुच्छख्यातिः प्राप्नोत्यनीप्सया IṣṭaSi. 154.6.

अनीप्सित (an-īpsita) *adj.* [*f.* -ā] (Gr.) **AI** (grammatical object) not directly reached (by the agent's action) कर्तुरीप्सिततमं कर्म। तथायुक्तं चानीप्सितम् P. i. 4.50; **AII** (grammatical object) not desired इहेप्सितस्यापि कर्मसंज्ञारभ्यतेऽनीप्सितस्यापि। यदिदानीं नैवेप्सितं नाप्यनीप्सितं तत्र कथं भवितव्यम् MahāBh. i. 333.19 (*on* i. 4.50); अनीप्सितमिति नायं प्रसज्यप्रतिषेध ईप्सितं नेति MahāBh. i. 333.21 (*on* i. 4.50); **AIII** (grammatical object) other than that what is desired by the agent (i. e. *dveṣya* or *udāsīna*), other than what is desired पर्युदासोऽयं यदन्यदीप्सितात् तदनीप्सितमिति MahāBh. i. 333.22 (*on* i. 4.50); अन्यच्चैतदीप्सिताद् यन्नैवेप्सितं नाप्यनीप्सितमिति MahāBh. i. 333.23 (*on* i. 4.50); आप्यत्वसामान्यं सर्वत्र विद्यते ··· अनीप्सितम्— ग्रामं गच्छन् व्याघ्रं पश्यति JaineVyā. 39.21 (*on* i. 2.120); औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम् VākyaP. 3(7).46; VaiyāBhū. 106.20 (*on* 24); ईप्सितादन्यत् सर्वमनीप्सितं द्वेष्यमितरच्च KāśiVṛ. *on* i. 4.50; Prasā. i. 387.4; फलस्य भागि कारकमेव कर्म। तच्च किंचिदीप्सितम् ··· किंचिच्चानीप्सितम्, अनुपयोगात् PrakaPañ. 464.11; अनीप्सितं कर्म यथा अहिं लङ्घयते भृशम् AgniP. 353.5; क्रियया युक्तमनीप्सितमपि कर्मसंज्ञमितीप्सितानीप्सितानुवर्ति साध्यरूपं कर्मेत्यर्थः ŚāstrDī. 109.6 (*on* ii. 1.4); तथायुक्तं चानीप्सितम् SaraKaṇṭhā.(Gr.) i. 1.39; PrakriKau. i. 386.4; SiddhāKau. 133B.4 (*on* i. 4.50); द्वितीया च जघन्यत्वादनीप्सितेऽस्तु MayūMāli. 371.3 (*on* iv. 2.6); अनीप्सितम्-अनुद्देश्यम्। तच्च द्वेष्यन् उदासीनं च LaŚabdeŚe. i. 454.7; **AIV** (grammatical object) not specially aimed at or which is not the main goal of an action कथं तर्हि अनीप्सितस्य यागस्य ··· भावनायामन्वयः MīmāKau. i. 218.18 (*on* i. 4.6); i. 230.17 (*on* i. 4.9); **BI** undesired, unwanted तदेवं बहुमानात् ते भयेह्यनीप्सितं कृतम्। सुकृतं दुष्कृतं वा MahāBhā. v. 111.11; xii. 28.32; स त्वायुषि परिक्षीणे जगामानीप्सितां गतिम् MahāBhā. xii. 112.4; अन्वयादिविभिन्नानां यथासख्यमनीप्सितम् Bhaṭṭi. 9.132; एवमश्रुतो देशोऽनीप्सितश्च ṬupṬ. 21.1 (*on* iv. 2.7); तयोरव्यतिरेकत्वात् स एवायात्यनीप्सितः BṛĀraUBhVā. (Sambandha.) 64; 750; स्वसिद्धान्तविरोधोऽयं बलादायात्यनीप्सितः BṛĀraUBhVā. iv. 3.256; iv. 3.594; अतथाप्रवर्तनादनीप्सिता प्रीतिरप्रीतिरेव स्यात् JayaMa. 94.18 (*on* 2.1); सुदामशापाद् विच्छेदः शतवर्षमनीप्सितः भविष्यत्येव दम्पत्योः BrahmVaiP. iv. 69.84; यद् यदालोक्यते किंचित्···तत्र विद्यते। ईप्सितानीप्सितादन्यत्र तत्र यतते जनः YogVā. iv. 57.30; धर्माच्चानर्थोऽर्थश्चाधर्मात्। अनर्थश्चेप्सितोऽर्थश्चानीप्सितोऽपूर्वत्वात् सर्गस्य Bhām. 249.17 (*on* i. 3.30); अनास्वाद्यमविक्रेयमनादेयमनीप्सितम्। दत्तं निरुपकारं यद् वन्ध्यदानेन तेन किम् DarpDa. 6.17; अनीप्सितो दीप इव प्रविष्टः।··· न सेवकः कस्य करोति दुःखम् SevyaSev. 41; अनीप्सितेष्वपि ··· भोग्येषु तद्दुर्लभेषु च कामचारः VedāntKau. 336.13 (*on* iii. 3.40); **BII** [P. ii. 3.67; iii. 2.188] who is still not loved राजसोऽत्र यथा जनः।···अल्पकामश्च कामिनीनामनीप्सितः SarvaSiSam. 11.19; *n.* non-desire ईप्सितानीप्सिते न स्तो यस्य ···। स जीवन्मुक्त उच्यते MahāU. 2.46; 6.48; YogVā. v. 16.19; अनीप्सिते विषादे च विस्मये तथा।··· प्रतिषेधे धुतं शिरः NāṭyaŚā. 8.25; AbhinDa. 58.

अनीप्सितकर्मता (anīpsitakarma-tā) *f.* the state of being the grammatical object which is not specially aimed at or which is not the main goal of an action नियोग एव अत्रापि प्रधानं साध्यम्, अनीप्सितकर्मता त्वन्नीनाम् PrakaPañ. 442.5; विधिविषयीकृतभावनायाः श्रेयःसाधनत्वात् स्वर्ग एवोद्देश्यो न तु यागादयः।··· यागादीनां भावनां प्रत्यनीप्सितकर्मतामात्रत्वात् VedāntKa. 388.10 (*on* iii. 2.8)

अनीप्सितकर्मत्व (anīpsitakarma-tva) *n.* the state of being the grammatical object which is not specially aimed at or which is not the main goal of an action यच्छतिस्तु सकर्मक इति दण्डस्यानीप्सितकर्मत्वमभिहितम् TantrRa. 140.2; 'अग्निहोत्रं जुहोति' 'समिधो यजति' इत्यादौ द्वितीया त्वनीप्सितकर्मत्वात् TantrRaha. 61.24; पुरोडाशस्य स्वरूपेणानीप्सितस्यापि अनीप्सितकर्मत्वेनैवान्वयोपपत्तेः MīmāKau. i. 230.17 (*on* i. 4.9); ii. 53.16 (*on* ii. 3.18); आत्मनेपदानुरोधेन वेन्द्राभिधानार्थत्वाङ्गीकारे गार्हपत्यस्य सक्तुवदनीप्सितकर्मत्वायोगात् MīmāKau. ii. 233.2 (*on* iii. 2.3); द्वितीया विभक्तिः करणत्वपरा अनीप्सितकर्मत्वपरा वा नीयमाना न दुष्यति MīmāKau. iii(2). 64.9 (*on* ii. 1.7); सक्तूनां विनियोगकल्पनायोगेऽपि न द्वितीया करणत्वलक्षणार्था ···। किं त्वनीप्सितकर्मत्वार्थिका MīmāKau. iii(2). 77.7 (*on* ii. 1.12); न होमस्यानीप्सितकर्मत्वरूपाश्रयत्वेन वाक्यीयोऽन्वयोऽङ्गीकृतः MīmāKau. iii(2). 78.13 (*on* ii. 1.12); iii(2). 288.9 (*on* ii. 2.26); न चानीप्सितकर्मत्वेनाप्यन्वयोपपत्तेर्न करणत्वलक्षणेति वाच्यम् BhāṭṭDī. i. 93.1 (*on* ii. 1.5); ii. 88.1 (*on* iv. 1.3); ii. 115.16 (*on* iv. 2.6); प्रार्थनात्मकवरणं प्रति ऋषीणा-

सन्निविशेषणत्वेनानीप्सितकर्मत्वम् VīraMi.(Saṁskāra.) 603.9; कर्मार्थकर्तव्यप्रत्ययस्तु ··· विषं भुनक्ति सक्तून् जुहोतीतिवदनीप्सितकर्मत्वपरो वा BhaṭṭCin. i. 2. 19 (on i. 1.1); जुहोतेस्त्यागविशिष्टप्रक्षेपवचनत्वेन त्यज्यमानानाम्···सक्तूनामनीप्सितकर्मत्वसंभवात् MayūMāli. 371.16 (on iv. 2. 6)

अनीप्सितकर्मन् (anīpsita-karman) *n.* grammatical object which is not specially aimed at or not the main goal of an action राद्धान्तेऽप्यनीप्सितकर्मणः स्वाध्यायस्य न भाव्यता NayaVi. 11.5 (on i. 1. 1); कृत्यप्रत्ययश्च कर्मत्वे साध्यतामात्रं चाह न प्राधान्यम् अनीप्सितकर्मणोऽपि विद्यमानत्वात् Subodhi. 65.33 (on 2.135); BālamBha. ii. 195. 24 (on 2. 135); 'सक्तून् जुहोति' इतिवत् अनीप्सितकर्मणि द्वितीयेति योज्यम् PūrvottaVāNaMā. 144. 5; MayūMāli. 371.11 (on iv. 2.6)

अनीप्सितकर्मभूत (anīpsitakarma-bhūta) *adj.* which is the grammatical object not specially aimed at or not the main goal of an action करणीभूतोऽपि परशुस्तद्दारुध्वंससंयोगविभागपरंपरारूपक्रियाफलभागित्वादनीप्सितकर्मभूतः CaturCin. iii(1). 157. 3.

अनीप्सिततम (an-īpsitatama) *adj.* what is not the most desired ज्ञात्रभेदात्तु तद् ब्रह्म ह्यनीप्सिततमं परम् TaiUBhāVā. 63.1(2)

अनीप्सिततमत्व (anīpsitatama-tva) *n.* the state of being that which is other than what is most desired प्रथमान्तस्याष्टाकपालपदस्यानन्वयाद् अनीप्सिततमत्वे तस्य कर्मत्वायोगात् अष्टाकपालः सक्तुवदेव करणत्वेनान्वीयते MīmāKau. i. 227.21 (on i. 4.9)

अनीप्सितता (anīpsita-tā) *f.* the state of not being specially aimed at अपूर्वस्य भाव्यत्वात् स्वाध्यायस्यानीप्सितता NayaVi. 11. 6 (on i. 1. 1)

अनीप्सितत्व (anīpsita-tva) *n.* the state of being that which is not specifically aimed at or not the main goal of an action दिशो वानीप्सितत्वाद्, लक्षयेत् विहारदेशमीप्सिततमं युक्तम् ŚābaBh. 1230.5 (on iv. 2.7); आहर्तव्यस्य चानीप्सितत्वात्साकाङ्क्षत्वम् ṬupṬ. 21.2 (on iv. 2.7); कारकाणि ··· न चैतावता तानि कर्मतां भजन्ते, अनीप्सितत्वात् PrakaPañ. 453. 21; ननु प्रयत्नव्याप्यो धात्वर्थः तं प्रति कर्मैव स्यात्। न तु करणम्। उच्यते– न तावत्कर्मत्वमनीप्सितत्वात् TantrRaha. 61. 17; द्वितीयाया ईप्सितानीप्सितसाधारणकर्मत्वमात्रवाचित्वेन योग्यतया एकत्रेप्सितत्वनपरत्रानीप्सितत्वम् MīmāKau. ii. 173.23 (on iii. 1. 13); iii(2). 72.23 (on ii. 1.9); शरीरान्तरस्यानीप्सितत्वाद्वियोनिशरीरभोग्ये तत्पाते मुक्तिरेव VedāntKau. 396.20 (on iv. 1.19)

अनीप्सितद्वितीया (anīpsita-dvitīyā) *f.* accusative case conveying the sense other than what is specially aimed at सक्तुष्वप्येवमनीप्सितद्वितीयोपपत्तेः किमिति तत्र व्यत्ययः MayūMāli. 371. 15 (on iv. 2. 6)

अनीप्सितद्वितीयातस् (anīpsitadvitīyā-tas) *adv.* because of the accusative case conveying a sense other than what is specially aimed at इह (सक्तून् जुहोति इति प्रयोगे) ··· अनीप्सितद्वितीयातः तस्यात्यन्तजघन्यत्वात् MayūMāli. 371. 14 (on iv. 2.6)

अनीप्सितफल (anīpsita-phala) *adj.* having the result which is not specially desired विधिर्हि चेतनप्रवर्तनात्मा अनीप्सितफले व्यापारे तं प्रवर्तयितुमशक्नुवन् भावनाया ईप्सितजन्यत्वमवगमयति MīmāKau. iii(2). 75. 16 (on ii. 1. 12)

अनीप्सितविधानचेष्टित (anīpsitavidhāna-ceṣṭita) *adj.* attempting to do what is not desired (सीतारामौ) अप्यनीप्सितविधानचेष्टितौ तेनतुः सपदि संमदं मिथः JānaHa. 8. 1.

अनीप्सितानिवृत्ति (anīpsitānivṛtti) *f.* non-exclusion of what is not desired अनीप्सितानिवृत्तिः स्याद् समाहारेऽविवक्षिते BṛĀraUBhVā. i. 3. 224.

अनीप्सितार्थ (anīpsitārtha) *m.* undesired object इष्टं चेदं कार्यं बालकादे ईप्सितार्थस्वीकरणमनीप्सितार्थत्यजनं च TarkBhā.(Mo.) 7.24.

अनीप्सितार्थता (anīpsitārtha-tā) *f.* the state of being that which conveys the sense other than what is specially aimed at क्वचिदनीप्सितार्थतया क्वचिद् व्यत्ययाश्रयणेन च द्वितीया नेया MayūMāli. 372. 16 (on iv. 2.7)

अनीप्सितार्थद्वितीया (anīpsitārtha-dvitīyā) *f.* accusative case conveying the sense other than what is specially aimed at सक्तुष्वपि तर्हि किमित्यनीप्सितार्थद्वितीयैव नोक्ता TantrRa. 139.11.

अनीप्सिताशङ्का (anīpsitāśaṅkā) *f.* thought regarding what is not desired ईप्सितानीप्सिताशङ्के मर्कट्यौ चित्तपादपे। चञ्चले स्फुरतो यस्मिन् कुतस्तस्येह सौम्यता YogVā. v. 13. 27.

अनीप्सिताशङ्कित (anīpsitāśaṅkita) *n.* apprehension of what is undesired, apprehension of evil अनीप्सिताशङ्कितजातसंभ्रमा ततः सुतान्वेषणव्यग्रेक्षणा।··· व्यलपत् JātaMā. 64. 11 (9.78)

अनीप्सु (an-īpsu) *adj.* not desirous of, unwilling धनग्राहिणि प्रेते प्रव्रजिते द्विदश समाः प्रवसिते वा तत्पुत्रपौत्रैर्धनं देयम्। नातः परमनिच्छुभिः (v.l. अनीप्सुभिः) ViṣṇuSm. 6.28; SmṛtiCan. iv. 399. 1; नातःपरमनीप्सुभिरित्यस्य विंशतिवर्षादूर्ध्वं न विलम्बः कार्यः ऋणप्रतिदानानीप्सुभिरपीत्यर्थः SmṛtiCan. iv. 399. 3.

अनीबन्तत्व (anībanta-tva) *n.* the state of being that which does not end in the feminine suffix -ई marked with the indicatory sound *p* लक्ष्मीः। अनीबन्तत्वाद् न सिलोपः···उणादितः MugdhaBo. 3. 80 (22. 8)

अनीय (anīya) (Gr.) [AltGr. II. 1. 188; II. 1.216; Debrü. 208; 209] I *kṛtya*- suffix -*anīya* added to verbal bases to form potential participles in the passive sense or impersonal action तव्यानीयौ Kātan. iv. 2.9=JaineVyā. ii. 1.83; प्रवृत्त्योऽनीयः ŚākaṭāVyā. iv. 3.50; AgniP. 358. 4; तव्यानीयया द्भावे MugdhaBo. 26. 3 (147.22); II *kṛtya*-suffix *anīya* forming potential participles denoting the sense of agent कृतः ··· भावे कर्मणि कर्तरि। तथा तव्यो ह्यनीयश्च AgniP. 358.4; कर्म क्रियां प्रोक्तवन्तः कर्मप्रवचनीयाः। बाहुलकात् कर्तरि भूते अनीयः LaŚabdeŚe. i. 470. 7; cf. P. iii. 4.68.

अनीयमानत्व (anīyamāna-tva) *n.* the state of not being carried (from the meaning) नियताक्षरमन्त्र ऋगिति पर्यवसितार्थः। अनीयमानत्वं चात्र विशेषणमर्थादन्यथा साम्न्यतिप्रसङ्गात् VīraMi. 13.20 (on 1. 3) [better read अगीयमानत्व]

अनीयर् (anīyar) (Gr.) I *kṛtya*- suffix -*anīya* with the indicatory sound *r* giving the acute accent on the prefinal vowel and forming a potential participle in the sense of passive or impersonal action तव्यत्तव्यानीयरः P. iii. 1.96=SaraKaṇṭhā.(Gr.) i. 3. 129; तव्यानीयर्केलिमरः CāndraVyā. i. 1.105; स्मारणीयकमिति ···। 'कृत्यल्युटो बहुलम्' इति कर्तर्यनीयर्। ततः संज्ञायां कन् JayaMa. 121.17 (on 2. 4); (द्रुल्कीप) नायं तत्पुरुषोऽनीयरि 'चचार' इत्यादौ च दोषापत्तेः LaŚabdeŚe. i. 152. 13; II *kṛtya* suffix -*anīya* denoting the sense *karaṇa*, the most effective means प्रयन्ति प्रारभन्तेऽनेनेति प्रायणीयः। बाहुलकात् करणेऽनीयर्प्रत्ययः MayūMāli. 532. 18 (on vii. 3. 2); (पतनीयकृते) पतनीये करणेऽनीयर् BālamBha. ii. 303. 29 (on 2. 210); ii. 48. 1 (on 2. 32); III [P. iii. 3. 163] *kṛtya*-suffix -*anīya* denoting the sense of *vidhi* (command), cf. अनीयर्प्रत्यय.

अनीयर्प्रत्यय (anīyar-pratyaya) *m.* [P. iii. 3. 163] *kṛtya*- suffix -*anīya* denoting the sense of *vidhi* (command) परं ब्रह्म सदोपासनीयम्। विध्यर्थकतव्यप्रत्ययस्थानेऽनीयर्प्रत्ययः VedāntRaMañ. 2.6 (74.7)

अनीयस् (an-īyas) *adj.* excluding the *taddhita* suffix -*īyas* (in the sense of comparative degree) गवादेः स्योऽन्ते गौण्येऽनीयसः MugdhaBo. 6. 14(55. 9)

अनीयिवस् (an-īyivas) *adj.* [*f.* -uṣī] [KāśiVṛ. on iii. 2.109] who or which had not arrived or reached श्रेयस्यनीयुषि शुचा गलति स्म तत्र शून्ये क्षणेन वलयं तदरालकेश्याः HarVi. 23.13; इत्यार्थैर्वचनैः कान्ते दृग्गोचरमनीयुषि। विदर्भदुहितेत्यन्तः स्वप्नस्यार्थं व्यचारयत् PāṇḍaC. 6. 520; अनीयुषीणां तत्सैन्यशोषिताशेषपाथसाम्। वार्धिः शङ्केऽत्र कान्तानां बिभर्ति विरहव्यथाम् PāṇḍaC. 12. 319.

अनीर (a-nīra) *adj.* which is without water waterless अनीरभूरुहान्तरालविस्तरेण च तृडातपक्लान्तिदुस्तरं पन्थानमतिक्रम्य गच्छन् ··· महावने पतितोऽस्मि UdaySuKa. 60.4; रत्नाकरमिवानीरं रत्नमाणिक्यपूरितम्। अश्वजवनदीपं नरद्वीपी स लीलया TriṣaŚaPuC. i. 4. 270.

अनीरण (an-īraṇa) *n.* absence of blowing the wind (in a flute) द्विकस्त्रिकश्चतुष्को वा श्रुतिसंख्यो भवेद् स्वरः। अनीरणात्तु शेषाणां स्वराणां श्रुति(मपि) संभवन्(वः) NāṭyaŚā. 30.4 (AbhinBhā. आपूरणादानयनादीरण(म्) अनादररन्ध्रपूरणाच्च) [better read अपूरण]

अनीरदेशस्थ (anīradeśasth-a) *adj.* staying or being in a waterless place (i.e. in a dry land) ग्राहश्चानीरदेशस्थः शुनापि परिभूयते NītiŚā. 9.40.

अनीरयित्वा (an-īrayitvā) *ger.* not having uttered न मान् (ओंकारम्) अनीरयित्वा ब्राह्मणा ब्रह्म वदेयुः GopBr. i. 1.23 (16.5); PraṇU.[2] 33.22.

अनीरशन (a-nīraśana) *adj.* not destitute of a girdle (i.e. possessing a girdle or waistband) अभियर्यौ स हिमाचलम् ···। व्यथितसिन्धुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः Kirātā. 5.11 (comm. अनीरशनैरनिर्मेखलैः, सरशनैरित्यर्थः); SaraKaṇṭhā. 199.7.

अनीरित (an-īrita) *adj.* [*f.* -ā] A1 not caused to make sound (*lit.* unbeaten) दिव्यैश्च पुष्पैस्तं देवाः समन्तात्पर्यवाकिरन्। देवदुन्दुभयश्चैव नेदुः स्वयमुदीरिताः (v.l. अनीरिताः) MahāBhā. iii. 195.14; A11 not stirred or agitated (by the wind) जज्वाल सौम्यार्चिरनीरितोऽग्निः BuddhaC. 1.22; A111 unexcited अनीरितानां दोषाणां मारणा न प्रशस्यते BhelaS. 39.5 (1.25); B not proclaimed अथाभिधास्यामि ... अनीरिताः कर्मकलाश्च काश्चन TantrSa. 12.1 (Vimarśinī अनीरिता अनुक्ताः)

अनीर्यमाण (an-īryamāṇa) *adj.* not being fanned, not being stirred अनीर्यमाणस्तु यथानिलेन प्रशान्तिमागच्छति चित्रभानुः। अल्पेन यत्नेन तथा ... शान्तिमुपैति चेतः Saund. 14.49; एवं हि भूयो लयमेति चित्तमनीर्यमाणोऽग्निरिवाल्पसारः Saund. 16.55.

अनीर्षा (an-īrṣā) *f.* absence of envy or jealousy अनीर्षा च दया चैव योगयोरुभयोः समाः BṛNāraP. 31.35.

अनीर्षु (an-īrṣu) *adj.* not envious, not malicious अनीर्ष्यु (v.l. अनीर्षु)र्गुप्तदारः स्यात् संविभागी प्रियंवदः MahāBhā. v. 38.10; अनीर्षुर्गुप्तदारः स्याच्चोक्षः स्यादघृणी नृपः MahāBhā. xii. 71.8; xii. 221.31; xii. 222.13; सो अनीर्षु सुरतश्चैव MaVastuAva. ii. 368.2.

अनीर्षुक (an-īrṣuka) *adj.* [*f.* -ā] not jealous आढ्यो महाधनो भोति पुण्यवन्तो अनीर्षुको MaVastuAva. ii. 363.7; शुद्धोदनस्य माया नाम देवी — मधुरप्रियवादिनी ... अनीर्षुका LaliVi. 3.0 (209); मायादेवी ... अनीर्षुका चाप्यशठा अमाया LaliVi. 3.10; यश्चापि भिक्षू मम निर्वृतस्य अनीर्षुको एत प्रकाशयेया SaddhaPuṇ. 171.16; तथागतस्य परिनिर्वृतस्य सद्धर्मक्षयान्तकाले वर्तमाने इदं सूत्रं धारयमाणो बोधिसत्त्वो महासत्त्वोऽनीर्षुको भवति SaddhaPuṇ. 171.28. [DBHS.]

अनीर्ष्य (an-īrṣya) *adj.* [*f.* -ā] not having envy or jealousy अनीर्ष्यमशठं प्राज्ञः प्राजापत्यं वदेच्छुचिम् KāśyaS. 51B.32; शौनकाद्या महात्मान ऋषयो ब्रह्मवादिनः।... अनीर्ष्याः सर्वधर्मज्ञाः BṛNāraP. 1.6; अनीर्ष्याः श्रोतारो मम वचसि चेद् वच्मि तदहम् BhallaŚ. 93; Subhāṣi. 1012; नानीर्ष्यो निलदुःखितः।... इति भूतार्थसंग्रहः RājTa.(Ka.) 4.91; प्रत्यक्षस्य गुणान् राज्ञो विचिन्वन्तो यथास्थितान्। अनीर्ष्यस्य भविष्यामो विवेकस्यानृणा वयम् RājTa.(Ka.) 8.1551; अनीर्ष्या पतिशीलज्ञा महादेवी पतिव्रता BhāvPra.(Śa.) 290.18(10)

अनीर्ष्यत् (an-īrṣyat) *adj.* not showing jealousy or envy तामनीर्ष्यंश्च गोपयेत् स्वैरिणीं नाशयेद् गृहम् AṣṭaSaṁ. i. 12.19 (1.3); अनीर्ष्यन्तो भक्तिमन्तो ये मयोक्तमिदं शुभम्। अनुतिष्ठन्ति ये सर्वे मुक्तास्तेऽखिलकर्मभिः GaṇeP. ii. 139.32.

अनीर्ष्या (an-īrṣyā) *f.* absence of jealousy or envy अनसूयाप्यमात्सर्यमनीर्ष्या शीलमेव च। एष धर्मः कुरुश्रेष्ठ कथितः परमेष्ठिना MahāBhā. xii. 252*(2)

अनीर्ष्यालु (an-īrṣyālu) *adj.* [DEBRU. 290] not envious, not jealous न चासां वशगः स्वतन्त्रवृत्तिरनिष्ठुरोऽनीर्ष्यालुरनवशङ्की चेति नायकगुणाः KāmSū. 309.4 (6.1); कस्य वा न भवति रोषः ... कस्य वेति अनीर्ष्यालोरपि Loc. 23.9 (*on* 1.4); Kāvyānu. (He.) 40.20; Ekāva. 1.13(148) (46.6); प्रियजातिरनीर्ष्यालुः ... प्रायेण न हि दृश्यते TriṣaŚaPuC. i. 1.743.

अनीर्ष्यावत् (an-īrṣyāva(n)t) *adj.* free from jealousy यथाकामं कामिनीनां संग्रहः परमनीर्ष्यावान् कल्याणावहः प्रक्रमः NītiVā. 24.29.

अनीर्ष्यु (an-īrṣyu) *adj.* not jealous, not envious अनीर्ष्युर्गुप्तदारः स्यात् संविभागी प्रियंवदः MahāBhā. v. 38.10; अनीर्षवो (v.l. °र्ष्यवो) न चान्योऽन्यं विहिंसन्ति कदाचन MahāBhā. xii. 222.13; xii. 223.17; xiii. App. 1.15 (3915)

अनील (a-nīla) *adj.* A1 other than blue or black, which is not blue or black नीलोत्पलादिशब्देभ्यः एक एवावसीयते। अनीलानुत्पलादिभ्यो व्यावृत्तं प्रतिबिम्बकम् TattvSaṁ. 1098; यथा साकारोऽर्थो निराकारं विज्ञानमनुमापयति, एवं नीलाकारमपि विज्ञानं अनीलमर्थमनुमापयति TātpaṬ.(U.) 253.14 (*on* 5(3).50); तदेव च प्रत्यक्षमनीलमपि व्यवच्छिनत्ति नीलसंविदि तस्याप्रतिभासात् NyāyMañ. i. 27.7; तदैवानीलमनिदंरूपमपि संवेदनं प्रतीमः ĀtmaSi. 17.25; न हि नीलं कंचित्प्रत्यनीलम् NyāyKuA. i. 67.4; ŚatDū. 101.17; ĀtmaTaVi. 524.16; सर्पाः ... अनीला मन्दवेगिनः। एते अल्पायुषो ज्ञेयाः BhaviP. 70A.23 (i. 33.23); स्वात्मनि वा न नीलं न अनीलम् प्रकाशानुग्रहेण विना व्यवस्थानायोगात् PratyabhiVi. i. 198.6 (*on* i. 5.2); ii. 179.2 (*on* ii. 4.11); नीलानीलयोरपि यद्येकत्रोपलम्भोऽस्ति तदा नास्ति विरोधः PramāMī. 28.11 (*on* i. 1.32); वस्तुमात्रत्वाविशेषादनीलमप्यानीयेत ŚrutaPra. iB. 207.27 (*on* i. 1.13); सौगतैरप्येकत्र चित्रपटीज्ञाने नीलानीलयोर्विरोधानङ्गीकारात् SyādvāMañ. 5(183); अन्यथा एकनीलनाशे जगदनीलमापद्येत SiddhāMu. 57.12 (*on* 100); अनीलं घटमानयेत्यादौ घटपदसामानाधिकरण्यानुरोधेनानीलपदस्य नीलभिन्नपरतया नञो भेदवत्त्वैव लक्षणाया उपगन्तव्यत्वात् VyutpaVā. 37.8; A11 [SiddhaHe. vi. 2.4; cf. Vār. 2 *on* P. iv. 2.2] dyed with substances other than indigo शाकलैः पीतकैर्नीलैरनीलैरपरैरपि। तं क्षौमैराचयद्रूपः कर्पूरागरुधूपितैः DvyāśraKā. 15.44 (comm. अनीलैर्नीलीरक्तक्षौमवर्जितैरपरैरपि क्षौमैः); B not dark, white, bright बालार्कलक्ष्म्येव कृताङ्गरागैः समुन्नमद्भिः सलिलैरनीलैः। ज्वलन्महानग्निरिवाभाति को नाम तस्माच्च महार्णवोऽयम् JātaMā. 91.11 (14.16); यस्य कीर्त्यावदातेषु भुवनेषु महौजसः। अनीलं जायते सद्यस्चि(श्चि)त्रं तद् द्विषतां यशः EI. xviii. 141.29.

अनील (a-nīla) *m.* A name of a snake नीलानीलौ तथा नागौ ... एते प्राधान्यतो नागाः कीर्तिताः MahāBhā. i. 31.7; B name of a mountain तेनैव वारिधिं याति निम्नगा सरितां पतिम्। अनीलनिषधायामौ माल्यवद्गन्धमादनौ। अतीत्य वर्षमम्भोधिमेति BṛBrahmaS. ii. 4.51.

अनीलत्व (anīla-tva) *n.* the state of not being blue or dark नीलोत्पलादिशब्देषु ... न ह्यनीलत्वव्युदासेऽनुत्पलच्युतिः ŚlokaVār. 5(13).116 (596.6); TattvSaṁ. 968.

अनीलधी (anīla-dhī) *f.* notion of the non-blue (object) यस्त्वनुभयरूपम् ... तत् कल्पितामनीलधियमनुभावेत् PratyabhiVi. ii. 291.6 (*on* iv. 1.6)

अनीलनिषेध (anīla-niṣedha) *m.* negation of what is other than blue भावाभावयोरितरनिषेधात्मकत्वादनीलनिषेधो नीलमेवेति नीलमविवक्षितम्, अनीलनिषेधस्तु विवक्षितः NyāyKu. 139.13.

अनीलनीलकण्ठ (anīla-nīlakaṇṭha) *m.* blue-necked one who is fair (in complexion) नमः ... हराय वरदायिने। अनीलनीलकण्ठाय BṛKathāMañ. 14.65.

अनीलपटच्छन्न (anīlapaṭa-cchanna) *adj.* [w. r. for नीलपटच्छन्न] यत्रानि(? यत्र नी)लपटच्छन्नविग्रहा इव वीरुधः MahāP. 22.120.

अनीलप्रकारव्यवस्था (anīlaprakāra-vyavasthā) *f.* fixity of the qualifying attribute non-blue यत्र यत्प्रकारप्रतिषेधेन यदितरप्रकारव्यवस्थानियमस्तत्र न प्रकारान्तरसंभवः यथा नीलप्रकारप्रतिषेधेनानीलप्रकारव्यवस्थायां पीते TātpaṬ.(Vā.) 552.17 (*on* iii. 2.14)

अनीलफेन (anīla-phena) *m.* white foam अथावगाहमानाः क्रमेण रूप्यप्रभावभासितमनीलफेननिचयपाण्डुरमपरं समुद्रमालोक्य सविस्मयाः सुपारगमूचुः JātaMā. 90.24 (14.13)

अनीलबोधव्यावृत्ति (anīlabodha-vyāvṛtti) *f.* exclusion of the (constructed) cognition of what is not blue अनीलबोधव्यावृत्त्या च नीलबोधरूपत्वं व्यवस्थाप्यम् NyāyBiṬ. 83.5 (*on* 1.21); अनीलाकारव्यावृत्त्या नीलाकारं ज्ञानं प्रमाणम्। अनीलबोधव्यावृत्त्या नीलबोधस्वरूपं प्रमितिः TarkBhā.(Mo.) 11.26.

अनीलरूप (a-nīlarūpa) *adj.* not having a blue colour 'वायुपरमाणवोऽनीलरूपाः' ... इत्यादिष्वनुमानात्मिका तदेकविषया बुद्धिः TantrRaha. 16.1.

अनीलवाजिन् (anīla-vājin) *m.* name of Arjuna (*lit.* having white horses) इतीरिताकूतमनीलवाजिनं जयाय दूतः प्रतितर्ज्य तेजसा Kirātā. 14.26 (comm. श्वेताश्वमर्जुनम्); गणाः समासेदुरनीलवाजिनम् Kirātā. 14.42.

अनीलविरुद्धस्वभाव (anīlaviruddha-svabhāva) *adj.* whose nature is opposed to what is non-blue न हि सामान्यतो नीलमनीलविरुद्धस्वभावमनीलान्तरम् ĀtmaTaVi. 245.5.

अनीलव्यावृत्त (anīla-vyāvṛtta) *adj.* different from what is non-blue अनीलव्यावृत्तमुत्पलं विशिष्टप्रत्ययस्य विषयः Kiraṇā. 202.16.

अनीलव्यावृत्ति (anīla-vyāvṛtti) *f.* exclusion of what is non-blue तृतीये नीलस्यालीकस्यानीलव्यावृत्तिरूपतायामनीलानां पारमार्थिकत्वप्रसङ्गः ĀtmaTaVi. 524.16; ननु 'अहं जानामि' इति वर्तमानावभासं प्रत्यक्षमवर्तमानव्यावृत्तिमपि गमयति, नीलप्रत्यक्षमिव अनीलव्यावृत्तिम् PrakaVi. 529.9; यदि च नीलपदस्य नीलिमविशिष्टार्थो न विवक्षितः, किमिल्यनीलव्यावृत्तिरेव फलति NyāyKu. 138.8; ŚivārkaMaDī. ii. 89.22 (*on* ii. 2.24); नीलमुत्पलमित्यादेरपि अनीलव्यावृत्तिद्वारा स्वरूपमात्रपरत्वमित्यापाताच्च Nyāyāmṛ. 456B.6; AdvaiSi. 694.11.

अनीलसप्ति (anīla-sapti) *adj.* having white horses इष्टावलोकं जननी गुरूणां तेजोऽतिभास्वद्गरतं दधानम्। राजा स शत्रुघ्नमनीलसप्तिं प्रास्थापयत्तीर्थनिषेवणाय RāghPāṇ.(Ka.) 2.41; *m.* name of Arjuna (*lit.* having white horses), RāghPāṇ.(Ka.) 2.41 (comm. श्वेताश्वमर्जुनम्)

अनीला (anīlā) *f.* name of a daughter of Prāvā अनूपां (v.l. अनीलाम्) सुभगां भासीमिति प्रावा व्यजायत MahāBhā. i. 59.44.

अनीलाकार (anīlākāra) *adj.* having a non-blue form ज्ञानस्यार्थसारूप्यमनीलाकारव्यावृत्त्या कल्पितनीलाकारत्वं प्रमाणम् Bhām. 438.14 (*on* ii. 2.28); इह नीलादेरर्थात् ज्ञानं द्विरूपमुत्पद्यते। नीलाकारं नीलबोधस्वरूपं च। तत्रानीलाकारव्यावृत्त्या नीलाकारं ज्ञानं प्रमाणम् TarkBhā.(Mo.) 11.25.

अनीलाकारापोहरूप (anīlākārāpoha-rūpa) *n.* [Inst.] in the form

of exclusion of what has non-blue form ज्ञानगतं बाह्यनीलसारूप्यं भासमानमनीलाकारापोहरूपेण कल्पितम् VedāntKa. 285.27 (*on* ii. 2.28)

अनीलादिरूपत्व (anīlādirūpa-tva) *n.* the state of having the form of non-blue etc. धियो नीलादिरूपत्वे बाह्योऽर्थः किंप्रमाणकः । धियोऽनीलादिरूपत्वे स तस्यानुभवः कथम् PramāVar. 3.433.

अनीलादिव्यावृत्ति (anīlādi-vyāvṛtti) *f.* exclusion of what is non-blue etc. अनीलादिव्यावृत्त्युपहितं ज्ञानं प्रमेयम् LaCandr. 435.15.

अनीलाद्यनेकव्यावृत्ति (anīlādyaneka-vyāvṛtti) *f.* exclusion of many such as non-blue etc. अनीलाद्यनेकव्यावृत्तिकृतोऽनेकत्वाध्यवसाय एवेति चेत्, अतादात्म्ये कथं व्यावृत्तीनामुल्लेखः ĀtmaTaVi. 464.11.

अनीलाद्याकारा (anīlādy-ākārā) *adj.* (*f.*) having the form of non-blue etc. अनीलाद्याकारापि संवित् प्रत्यक्षा NayaVi. 216.6 (*on* i. 1.5)

अनीलानुत्पलव्यावृत्ति (anīlānutpala-vyāvṛtti) *f.* exclusion of what is non-blue and non-lotus नीलमुत्पलमित्यत्र त्वनीलानुत्पलव्यावृत्तिलक्षणफलोपलम्भादपर्यायत्वं बहु मन्यामहे NyāyKu. 137.8.

अनीलानुत्पलव्युदास (anīlānutpala-vyudāsa) *m.* exclusion of what is non-blue and non-lotus यस्य चान्यापोहः शब्दार्थस्तेनानीलानुत्पलव्युदासौ कथं समानाधिकरणाविति वक्तव्यम् NyāyVār. 334.9 (*on* ii. 2.67); अनीलानुत्पलव्युदासौ हि प्रधानौ नीलोत्पलशब्दावाहतुः न ह्येतयोरस्ति विशेषणविशेष्यभावः परस्परासंबन्धात् TātpaṬ (Vā.) 492.21 (*on* ii. 2.65)

अनीलानुल्लेख (anīlānullekha) *m.* non-mention of the non-blue नीलमुत्पलमित्यादावनीलानुल्लेखे अतद्व्यावृत्त्यनुल्लेखात् TattvCin. i. 828.5.

अनीलापोह (anīlāpoha) *m.* exclusion of the non-blue अनीलापोहेऽनुत्पलापोहोऽनुत्पलापोहे चानीलापोहो नास्ति Śarka. 59.8; न ह्यनीलापोहानुत्पलापोहयोरितरेतरत्र समवायः NyāyRa. 596.23 (*on* 5(13).116)

अनीलाभाव (anīlābhāva) *m.* absence of non-blue अनीलाभावग्रहेन नापि नीलस्य वेदनम् BṛĀraUBhVā.(Sambandha.) 950.

अनीलाश्व (anīlāśva) *adj.* having non-dark (i.e. white) horses अनीलाश्वमिवादित्यं कुर्वद्भिर्हयरेणुभिः । लेभे खुरजोभोरान्धकार इति नाम यः PṛthvīVi. 5.48.

अनीलोपलक्षण (anīlopalakṣaṇa) *n.* indication of what is non-blue तद् वस्तु … तथा न पीतम्, पीतमित्यनीलोपलक्षणम्, अनीलमपि न भवति Bhāsk. i. 62.12 (*on* i. 1.3)

अनीवमध्यमा (anīva-madhyamā) *adj.* (*f.*) [णीव (नीव) स्थौल्ये DhātuPā. 1.598] middle portion (i.e. waist) of which is slender (ददर्श धन्यः सः … ईश्वरम्) श्रितं तनुम् … अनीवमध्यमाम् DhātuKā. 1.72 (comm. अनीवं कृशं मध्यमं मध्यप्रदेशो यस्यास्ताम्)

अनीश् (an-īś) *m.* other than the Supreme Self ज्ञाज्ञौ द्वावजावीशनीशौ ŚvetāU. 1.9.

अनीश (an-īśa) *adj.* [*f.* -ā] **1** not powerful, powerless, helpless, dependent, poor आत्माप्यनीशः सुखदुःखहेतोः ŚvetāU. 1.2 (Śaṅ. अस्वतन्त्रः); NāraPaU. 9.1; यः सेवते धर्ममनर्थबुद्धिः । अस्वोऽप्यनीशश्च तथैव राजंस्तदार्जवं स समाधिस्तदार्थम् MahāBhā. i. 87.4; MatsyaP. 41.4; नानीशैर्हि तदा … भृगुभिर्भावितात्मभिः । वधोऽभ्युपेक्षितः सर्वैः क्षत्रियाणां विहिंसताम् MahāBhā. i. 170.15; एकान्तेन ह्यनीहो (v.l. ह्यनीशो)ऽयं पराभवति पूरुषः MahāBhā. iii. 33.36; यश्च क्रुध्यत्यनीशः सन् स च मूढतमो नरः MahāBhā. v. 33.36; SūktiRa. 29.18; यदिदं ते विकथितं पाण्डवान् प्रति भारत । अनीशेनेव राजेन्द्र सर्वमेतन्निरर्थकम् MahāBhā. v. 53.19; वदत्यनीशमात्मानं धृतराष्ट्रो महीपतिः MahāBhā. v. 129.31; अनीशश्चावमानी च स शीघ्रं भ्रश्यते श्रियः MahāBhā. x. 2.24; याच्ञामाहुरनीशस्य अभिहारं च भारत । उद्वेजयति याचन् हि सदा भूतानि दस्युवत् MahāBhā. xiii. 59.4; यदहं गात्रसंस्पर्शं रावणस्य गता बलात् । अनीशा किं करिष्यामि विनाथा विवशा सती Rāmā. v. 35.63; ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् । भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः ManuSm. 9.104 (ManvaMu. स्वामिनो न भवन्ति); अनीशः पूर्वजः पित्र्ये भ्रातृभागे विभक्तजः BṛhaspaSm. 204.55; अनीशः अस्वामी SmṛtiCan. iv. 710.11; तथा खलु प्रस्थाने अनीशया शरीरस्य हृदयं स्ववशं मयि । स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निःश्वसितैरिव Vikramo. 2.18; जीवन्त्याः पतिपुत्रास्तु देवराः पितृबान्धवाः । अनीशाः स्त्रीधनस्योक्ताः KātySm. 915; Aparā. 752.25 (*on* 2.143); अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः SāṁkhyaKāBh. 32.7 (*on* 61); SarvaSiSaṁ. 4.34; YogVā. ii. 6.26; SyādvāMañ. 6(33); यद् द्रव्यमिन्द्रवायुभ्यां दातव्यमिति संकल्पितं तस्य त्यक्तप्रायत्वादनीशो यजमानः कथमिव वक्ष्यति TantrVā. 518.8 (*on* ii. 2.19); पुमान् । … ग्रहाविष्ट इवानीशश्चोदितो जन्यकर्मणा TaiUBhāVā. 77.3(2); अथ दानाधानविक्रये यत्र प्रकृतत्वादनीशाः ManuBh. ii. 153.6 (*on* 8.163); अत्रापि वयमनीशाः । मावास्तु यदारभन्ते, तदारभन्तामित्यनुमन्तुमेव वयं प्रभवामः PrakaPañ. 368.8; प्रजाः । तं धावमानमनुधावन्त्यनीशाः BhāgP. iv. 11.20; देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः । दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः BhāgP. vii. 13.29; xi. 31.12; स्तोदोषैरनीश इव स प्रभुः ŚivaP. ii(3). 4.38 (127B.10); अनीशाः (पितरः) कथं स्वर्गादिफलं प्रयच्छन्ति Mitā. 96.26 (*on* 1.269); असंसारी जीवः संसारदशायामल्पज्ञोऽनीशः VedāntTaSā. 48.1; अनीशाः विभागे अस्वतन्त्राः ManvaVi. 1167.15 (*on* 9.104); अनीशो यजमानो न शक्नोत्यन्यांस्तेन परिक्रेतुम् BhāṭṭDī. i. 351.4 (*on* iii. 4.21); **2** not having any controller, beyond control, supreme अनीशस्याप्रमत्तस्य भूतानि पचतः सदा । … कालस्य क्षयं प्राप्तो न मुच्यते MahāBhā. xii. 220.94; सर्वप्रभुरनीशस्त्वम् RaghuVa. 10.20; स्वस्थो निस्तरो जीयादनीशः परमेश्वरः EI. x. 8.2; x. 11.3; ईशोऽनीशस्त्वमेवेश SaurP. 61.37; सोऽव्यात् … त्वामनीशः Vidvanmo. 8.124; **3** uncontrolled, unrestrained धिगस्तु राजसं भावमनीशमनवस्थितम् । ईश्वरेणापि यद्रागान्मया सीता न रक्षिता Rāmā. v. 53.12; मनो बुद्धिश्च चित्तं च ते ह्यनीशाः शरीरिणाम् VarāP. 142.15; **4** incapable संकल्पेच्छुरभियातुमनीशा संमुखी न च बभूव दिदृक्षुः ŚiśuVa. 10.41; अवलोक्य वक्त्रकमलं यस्य शशी स्वोदयेऽपि मलयिकलं । कर्तुमनीशः किंचित्प्रतिक्षणं क्षीयतेऽद्यापि EI. i. 156.4; विनापि चन्द्रेण विनापि चैत्रार्थ्यौ बहुधा वसति प्रियायाम् । ताः प्राप्य चन्द्रं स्मरदत्तचर्या यातीर्निरोद्धुं विविरप्यनीशः RāvaṇA. 6.39; अनयोपार्जितां त्यक्तुमनीशा डामराः श्रियम् RājTa.(Ka.) 8.963; राष्ट्रान्निर्वासिने रिल्हणस्य सुज्जेरभीप्सिते । पार्थिवोऽप्यनुमन्ताभूदनीशः प्रजावश्यतो RājTa.(Ka.) 8.2089; अनीशो विद्विषां तेषामासने शयनेऽपि वा । दाहज्वरातुर इव नन्दो न प्राप निर्वृतिम् PariPar. 7.107; अनीशापि … प्रतिपत्तये । कामं बहुमता जज्ञे याज्ञसेनी किरीटिनः PāṇḍaC. 5.454; प्रसादं रचयत्वा जनयितुमनीशः कथमपि । … बलरामो विजयते SaduktiKa. 36.18; अयं भवतीं विभाव्य भव्यां भविता निश्चितमात्मनोऽप्यनीशः Surath. 8.67; मिथिलास्वामिना … कुम्भयोनौ वने । अनीशा ईश सर्वेऽमी पुर्या निर्वासिता हठात् MalliC. 5.96; भोक्तुं शिशुत्वादवनीमनीशेऽमुष्मिन् दिगन्तावनिमण्डलीकाः । पिता इवैतामुपभुक्ते स्म VasaVīKā. 3.37; बलिनं जेतुमनीशः कोऽपि तदीयं छद्मं तिरस्कुरुते Ekāva. 8.61 (315.11); परस्परविरुद्धप्रकाराणि वाक्यानि सामान्यतो दृष्ट्वा जातसंशयो विशेषतो निर्णेतुमनीशस्तन्निवृत्तये धर्मजिज्ञासायां प्रवृत्तः VedāntKau. 3.19 (*on* i. 1.1); अहमन्यनयोर्विरहं सोढुमनीशः ViviTīKa. 67.26; Dhūrtā. 352; भाग्यं द्रष्टुमनीशयेव भवतः कान्तापराद्धं मया RasāSu. 18.9 (I. 81); मन्ये … क्षुभितहृदयैर्वीक्षितुं त्वामनीशैः । … बाध्यते हन्त बाला HaṁsaSaṁ. 91; दातुं भोक्तुमनीशस्य श्रोत्रियस्येव संपदम् । … धूर्तौ राज्ञो मुमुषतुः श्रियम् RājTa.(Jo.) 41; 74; इदानीमनीशोऽस्मि शोकविक्लवान्यङ्गानि वोढुम् KaṁVa. 4.17(4); **5** not having a master or lord (जगत्) सदैवेद (? सदेवेद)मनीशं च स्वभावोत्थं सदेदृशम् DevīBhāP. iii. 1.43; अनीशो वा कुर्याद् भुवनजनने कः परिकरः Mahimna. 6; नाप्यनीशमपूर्वं च प्रकल्प्यं फलसंगतौ BṛĀraUBhVā. iii. 8.146 (comm. चेतनेनानधिष्ठितम्); तस्कराक्रान्तपथिकः … अनीशो देशः कष्टां दशामगात् RājTa.(Śrī.) 4.449.

अनीश (an-īśa) *m.* **1** other than the Supreme Self व्यक्ताव्यक्तं भरते विश्वमीशः । अनीशश्चात्मा बध्यते भोक्तृभावात् ŚvetāU. 1.8; NāraPaU. 9.7; ज्ञाज्ञौ द्वावजावीशानीशौ BrahmSūBh.(Śrī.) i.124.7 (*on* i. 1.2); ईशानीशौ नियन्तृनियम्यौ ŚivārkaMaDī. i. 124.22 (*on* i. 1.2); ईशस्याचिन्त्यशक्तित्वात्राशक्यं कापि विद्यते । … अनीशस्येशतेत्येव विरुद्धं सर्वमानतः AṇuVyā. 43B.7 (*on* 3.2); अदृश्यतासुखगुणयुक्तमक्षरं प्रधानमित्युचितमनीश एव वा NayaMañ. I. ii. 6.11; **2** not the owner, not the lord, not the master न हि दासत्वमापन्ना कृष्णा भवति भारत । अनीशेन हि राज्ञैषा पणे न्यस्तेति मे मतिः MahāBhā. ii. 59.4; धर्मराजः … । ईशो वा ते यद्यनीशोऽथ वैषः MahāBhā. ii. 62.20; प्रयच्छन्तु च ते राज्यमनीशास्ते भवन्तु च MahāBhā. v. 148.15; **3** epithet of Viṣṇu (*lit.* having none else as the controller, the Supreme) उदीर्णः सर्वतश्चक्षुरनीशः … इति … केशवस्य महात्मनः । नाम्नां सहस्रं दिव्यानाम् MahāBhā. xiii. 135.80; अनीशोऽव्ययोऽक्षयः … इत्येतद् वासुदेवस्य विष्णोर्नामसहस्रकम् PañcaRā. (Nā.) iv. 3.14; **4** epithet of Śiva (*lit.* having none else as the controller, the Supreme) अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु … नित्यो ह्यनीशः शुद्धात्मा MahāBhā. xiii. 167*; LiṅgaP. i. 65.102; ईशोऽनीशः सुरव्याघ्रः … एवं नाम्नां सहस्रेण तुष्टाव गिरिजापतिम् SaurP. 41.104.

अनीशकत्व (anīśaka-tva) *n.* the state of not being the master or owner अविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्य अनीश्वरत्वाद् (v.l. अनीशकत्वाद्) सर्वाभ्यनुज्ञावश्यं कार्या Mitā. 219.20 (*on* 2.114); अनीशकत्वाद् … स्वार्थे कः BālamBhā. ii. 133.20 (*on* 2.114)

अनीशता (anīśa-tā) *f.* **A** the state of not being a controller, absence of lordship न चैतावता ईश्वरस्यानीशता BhāM. 166.12 (*on* i. 2.3); ईशतानीशतयोरेकत्रावस्थानम् NyāySū.(Ja.) 511A.6 (*on* iii. 2.1); अन्यपदार्थसृष्टौ वैषम्यनैर्घृण्ये स्याताम् । कर्माधीनत्वे त्वनीशता AṇuBh. 15.23 (*on* i. 1.3); **B** powerlessness, helplessness (स्त्रीणाम्) बध्यन्ते रोमशोलभिः । तनुभिर्वेष-

मित्याहुर्मध्यच्छिद्रेष्वनीशता BhaviP. 21A. 22 (i. 5. 28); नखैः…। खरैर्वक्रैर्विवर्णाभैः श्वेतपीतैरनीशता BhaviP. 21B.35 (i. 5.51); 21B.29 (i. 5. 48); कृष्टोऽस्म्येतैरनीशताम्। यातः किमपि हन्तेति दूतैर्नागोऽप्यभाषत RājTa.(Ka.) 8. 2985; मोहादनीशतां प्राप्य मग्नो वपुषि शोचति (पुरुषः) PañcDa. 4.13; **C** the state of not being the owner प्रथमोक्ताभिप्रायेण विभक्ताग्रजानामनीशतां पित्र्ये प्रसाध्य तद्बलादन्यदप्याह SmṛtiCan. iv. 710.14.

अनीशताहेतु (anīśatā–hetu) *m.* cause of being other than the controller भेदेनेशतोपपत्त्यत इति निरस्तम्। अनीशताहेतोरभेदस्य विद्यमानत्वात् NyāySu.(Ja.) 511A. 11 (*on* iii. 2.1)

अनीशत्व (anīśa–tva) *n.* **AI** the state of not being a master or controller दृश्यन्ते हि दुरात्मानो वध्यमानाः स्वकर्मभिः। इन्द्रियाणामनीशत्वाद् राजानो राज्यविभ्रमैः MahāBhā. v. 34.66; xii. 116 6; xii. App. I. 29C.(239); ईशत्वेनैव विज्ञातमनीशत्वेन चेच्छ्रुतिः। अनीशत्वेन विज्ञातमीशत्वेनाथ वा दिशेत् AnuVyā. 43B.8 (*on* 3.2); तस्येच्छया समानत्वान्नानीशत्वं प्रसज्यते TarkSaṁ.(Ā.) 112.27; काचिच्छ्रुतिः…ईशत्वेनैव विज्ञातं परमात्मानमुद्दिश्यानीशत्वेन प्रमितानीशत्वजीवभावेनादिशेत्। काचिदनीशत्वेन प्रमितं जीवमुद्दिश्य ईशत्वेन … उपदिशेत् NyāySu.(Ja.) 511A.1 (*on* iii. 2. 1); **AII** incapacity, incapability इन्द्रियाणीह सर्वाणि स्वे स्वे स्थाने यथाविधि। अनीशत्वात्प्रलीयन्ते सर्पा हतविषा इव MahāBhā. xii. 290.85; BrahmP. 239.87; **B** the state of not being independent, dependence (आत्माप्यनीशः सुखदुःखहेतोः) कथमनीशत्वम् … कर्मपरवशत्वेनास्वातन्त्र्यात् ŚvetāUBh. 61.11 (*on* 1.2); **C** the state of not being a god भगवदर्चाविग्रहेषु श्रीशालिग्रामादिषु पाषाणलोहमयत्वानीशत्वाचेतनत्वादिभावः VedāntRaMañ. 4.10 (135.2)

अनीशनिर्मिता (anīśa–nirmitā) *adj.* (*f.*) produced by a poor or helpless person तावत्स भगवान् साक्षाद्योगाधीशो गुहाशयः। अन्तर्दध ऋषेः सद्यो यथेहानीशनिर्मिता BhāgP. xii. 9. 33.

अनीशभाव (anīśa–bhāva) *m.* incapacity, inability विमुखे चतुर्मुखेऽपि श्रितवति चानीशभावमीशेऽपि। मग्नमहीनिस्तारे हरिः परं स्तब्धरोमाभूत् ĀryāSaŚa. 532

अनीशभेद (anīśa–bheda) *m.* difference from the non-Lord ईशत्वेऽनीशभेदेन श्रुत्या सम्यक्प्रकाशिते। अयुक्तमपि चान्यत्र युक्तं भवति तद्बलात् AnuVyā. 43B.9 (*on* 3.2): अत्रानीशभेदेनाङ्गीकृतेनैवेशत्वं श्रुत्या सम्यक् प्रकाशितं भवतीति वदता श्रुतिविरोधः परिहृतः NyāySu.(Ja.) 511A.8 (*on* iii.2. 1)

अनीशवचस् (anīśa–vacas) *n.* statement about the non-existence of a god इत्यनीशवचोवारिवेलानुन्नोऽब्धिनेव सः। शक्रेण न चचालैषां धीशैलः सारगौरवात् MṛgendraT. i. 1. 10 (comm. ईश्वरनिराकरणवचनान्येव … वारीणि)

अनीशवादिन् (anīśa–vādin) *adj.* who advocates the non-existence of a god बुधास्तमनीशवाद्ययमिति ब्रुवते ŚaṅkaDigVi.(Mā.) 9.14.

अनीशा (anīś–ā) *f.* [P. iii. 1.135; iii. 3.102] **A** helplessness, powerlessness समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः MuṇḍaU. iii. 1.2; ŚvetāU. 4.7; दीनभावोऽनीशा MuṇḍUBh. 345.1 (*on* iii. 1. 2); ŚvetāUBh. 181. 2 (*on* 4. 7); VedāntKa. 139.3 (*on* i. 2.11); अनीशया पारवश्येन BrahmSūBh.(Śrī.) i. 351.9 (*on* i. 2.11); अनीशया पारतन्त्र्येण ŚivārkaMaDī. i. 351. 25 (*on* i. 2. 11); अनीशया अनैश्वर्येण तद्दोषनिराकरणाशक्त्या ŚivārkaMaDī. i. 404. 29 (*on* i. 3. 4); मोहप्रयुक्तेनानीशया ईश्वरत्वविरोधिनेशभेदेन शोचति संसरति LaCandr. 572.7; (an–īśā) [P. iii. 3.103] **BI** primordial matter (*lit.* other than the Supreme one) अनीशया भोग्यभूतया प्रकृत्या मुह्यमानः शोचति जीवः BrahmSūBh.(Rā.) 279.14 (*on* i. 3.4); **BII** nescience (*lit.* other than the Supreme one) अनीशया अविद्यया स्वोपाधिभूतया PrakaVi. 179.22; SiddhāSi. iv. 78. 12.

अनीशात्मन् (anīśātman) *adj.* having uncontrolled nature स वा एष शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्मा(v.l. अनीशात्मा)नन्तोऽक्षय्यः स्थिरः … स्वे महिम्नि तिष्ठति MaiU. 2. 4.

अनीशान (án–īśāna) *adj.* [*f.*-ā] **1A** weak, helpless यद्वा अनी॑शानो भा॒रमा॑द॒त्ते वि वै स लि॑शते TaiS. VI. ii. 5.1 धत्ते भामेन विचकरनीशानो हृदस्पृरि MaiS. i.7.1 (i. 108.7); बहिष्पवमाने ये च विजानन्ति ये च न ते सर्वेऽनीशाना अभिपरिवार्य दिदृक्षमाणास्तिष्ठन्ति JaimiBr. 1.249; यश्च क्रुध्यत्यनीशः सन् (v. l. अनीशानः) स च मूढतमो नरः MahāBhā. v. 33.36; **1B** not being able, unable केचित्तु निबन्धकृतः कथंचिदपीदं समर्थयितुमनीशानाः सहितशब्दपातात् प्रमादपाठ एवेति वर्णयन्ति DharmoPra. 9. 24; अनीशानश्च न तेषु (यागादिषु) संभवत्यधिकारी Bhām. 573.18 (*on* iii. 2. 40); यस्त्वेवं न क्षमः सः … अन्यपरित्यागेनैकग्रहणस्यानीशानः शङ्कैतैव NyāySu.(Ja.) 315A.2 (*on* ii. 2.1); 419B.1 (*on* ii. 2.11); यान्ति …। निर्धावितुमनीशानाः साक्षितां सालभञ्जिकाः Yādavā. 16.32; **2** not constrained अनीशानानि ह वा अस्मै भूतानि बलिं हरन्ति य एवं वेद AitĀ. II. i. 5. 7; **3** not owning (something) अनीशानेन न शक्यं दातुम् ŚābaBh. 1215.8 (*on* iv. 1.30); (तिर्यञ्चः) अनीशाना धनस्य ŚābaBh. 1356. 16 (*on* vi. 1.5); एकप्रयोगोपयुक्तानामनीशानेन यजमानेन पुनस्त्यागायोगात् TantrRa. 46.14; 92.1; सकलस्य हविषो देवतायै प्रदत्तत्वादनीशानो यजमानस्तुल्यः स ऋत्विग्भिः ŚāstrDī. 281.14 (*on* iii. 4. 21); 665.1 (*on* x. 2.9)

अनीशानत्व (anīśāna–tva) *n.* the state of not being the owner तृतीये इदं ब्रह्मण इति व्यादेशस्य प्रतिपत्त्यर्थत्वं यजमानस्यानीशत्वादपेक्षितविधिसंभवाच्च समर्थितम् MayūMāli. 665.2 (*on* x. 2.9)

अनीशार्चन (an–īśārcana) *adj.* in which there is no worship of Śiva धिगनीशार्चनं जन्म धिग्विद्यामशिवाश्रयाम् BṛJābāU. 5.16; DevīBhāP. xi. 12.18; ŚivaP. i. 24.45 (31A.14)

अनीशिता (anīśi–tā) *f.* the state of not being the lord or controller न हि तादृशवैचित्र्यविदुषः स्यादनीशिता ĪśvaSi.(U.) 2.7.

अनीशितृ (an–īśitṛ) *adj.* who is not capable, incapable (भवति घटम् इत्यत्र) कथमनीशितुः साधनप्रवृत्तिनिवृत्त्योर्घटस्य कर्तृत्वं तादृशं कुलालमतिक्रम्य BhāvanāVi. 38. 2.

अनीशित्व (anīśi–tva) *n.* the state of not being the lord or controller तत्रास्मिँल्लोके जीवस्यानीशित्वं प्रत्यक्षसिद्धम् AnuBh. 98. 5 (*on* i. 3.42)

अनीशिनी (an–īśinī) *adj.* (*f.*) not possessing क्रयविक्रयसंयुक्ता हि स्त्रियः।… विक्रीतत्वाच्च पितृधनानामनीशिन्यः। क्रीतत्वाच्च भर्तृधनानाम् ŚābaBh. 1360.4 (*on* vi. 1.10)

अनीशोद्यम (anīśodyama) *m.* effort of an incapable person विफलस्तत्समारम्भो यथानीशोद्यमो मुने BrahmVaiP. iv. 21.170.

अनीश्ङीयुव्यञ् (an–īśṅīyuvyañ) (Gr.) excluding the substitute ईश् (i.e. ई), feminine suffix ङी(ई) and verbal bases which take *iy*, *uv*, *y* and *v* (included in the pratyāhāra *yañ*) वेकोऽनीश्ङीयुव्यञः … अनीश्ङीयुव्यञ इति किम्। बन्धौ व्यश्येदितीश्। कौमुदगन्धीबन्धुः। ङी गार्गीपुत्रः। इयुव् श्रीकुलम् भ्रूकुलम्। यञ् इन्द्रहूपुत्रः ŚākaṭāVyā. ii. 2.82.

अनीश्वर (án–īśvara) *adj.* [*f.*-ā, -ī] [included in the *brāhmaṇādi gaṇa*, GaṇPā. 167.26; KāśiVṛ. *on* vii. 3.30; CāndraVṛ. *on* iv. 1. 141; JaineVyā. 235. 15 (*on* iii. 4. 114); GaṇRa. 7. 404(427)] **AI** who does not control or rule, not a lord, not a master अनी॑श्वरा अ॒भित॑ः सन्तु॒ ये॑ऽ॒न्ये AV. xii. 3. 42; अनीश्वरा अव्रतास्सन्त्वन्ये AV.(P.) xvii.40. 2; अनीश्वरं विब्रुवन्त्यार्यमध्ये युधिष्ठिरं तव पाञ्चालि हेतोः MahāBhā. ii. 62.25; अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः। इन्द्रियाणामनैश्वर्यादैश्वर्याद् भ्रश्यते हि सः MahāBhā. v. 34. 61; SūktiRa. 44.6; अनीश्वरे बलं (v. l. अनीश्वरो बले) धर्मो द्रुमं वल्लीव संश्रिता MahāBhā. xii. 132. 7; लेखकः …। सोऽव्यग्रमना राज्ञः संदेशं श्रुत्वा निश्चितार्थं लेखं विदध्यात् … देशनामधेयोपचारमनीश्वरस्य ArthŚā. i. 168. 2 (2.10) (comm. अनीश्वरस्य अमात्यादेः); आत्मानमपि विज्ञाय चित्तवृत्तेरनीश्वरम्। विश्वसेत कथं स्त्रीषु BhaviP. 29A. 17 (i. 8.49); वयं देवास्तत्फलार्थाः समागताः। न प्रत्याख्याहि शैलेश भव नानीश्वरोऽपि च BṛDharmaP. i. 42. 48; अनीश्वरास्मि प्रियसखि मनोवृत्तेः UdaySuKa. 101. 2; जानीहि रजनीनाथो रजन्या अप्यनीश्वरः PāṇḍaC. 6 959; अये रत्नापीड कथमर्धोन्मीलितलोचन एव संचरन्नतिघूर्णमानानामङ्गानामनीश्वर इवावलक्ष्यसे KaṁVa. 4.7(5); गौतमः — 'योगक्षेमार्थमीश्वरमधिगच्छेन्नान्यमन्यत्र देवगुरुधार्मिकेभ्यः'। अन्यमनीश्वरम् VīraMi. 184. 4 (*on* 1.100); VīraMi.(Āhnika.) 156.24; **AII** not powerful, powerless, helpless, dependent, poor य औपवसथिकं नाश्नाति। अनीश्वरो ह क्षोधुको भवत्यकाम्यो जनानाम् GobhiGS. i. 6.2: शकुनिस्तन्तुबद्धो वा नियतोऽयमनीश्वरः। ईश्वरस्य वशे तिष्ठन्नान्येषां नात्मनः प्रभुः MahāBhā. iii. 31. 24; अनीश्वरोऽयं पुरुषो भवाभवे MahāBhā. v. 39. 1; अनीश्वरोऽयं पुरुषः सुखदुःखाप्तये मतः Rāmā. ii. 1771*(3); नात्मनः कामकारोऽस्ति पुरुषोऽयमनीश्वरः Rāmā. ii. 98. 15; अनीश्वरं हीश्वरदेशिकं जगत् Rāmā. ii. App. I. 18(66); मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते। पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरा Rāmā. vi. 104. 9; चापेऽस्य बाणो निहितोऽपरेण जज्वाल तत्रैव न निष्पपात। अनीश्वरस्यात्मनि धूयमानो दुर्मर्षणस्येव नरस्य मन्युः BuddhaC. 13. 46; पुत्रि गणेन पूर्वमेव क्रियाकारः कृतः स्त्रीरत्नं गणभोग्यमिति। त्वं च स्त्रीरत्नमतोऽहमनीश्वरः GiMs. iii(2). 17.17; दुर्भिक्षमेव सततं तथा क्लेशमनीश्वराः। प्राप्स्यन्ति… मानवाः कलौ ViṣṇuP. vi. 1.26: कल्पान्ते रुद्रः संहरति प्रजाः। जायन्ते मोहयन्तोऽन्यानीश्वरा योगमायया। ऐश्वर्येण चरन्तस्ते मोहयन्ति ह्यनीश्वराः(? रान्) VāyuP. ii.5.142; सर्वमात्मनोऽनीश्वरं विश्वं नश्वरम् HarṣaC. 338. 8 (comm. न स्वायत्तम्); कर्तुः क्रियायां स्वातन्त्र्यं वस्तुवृत्ते ह्यनीश्वरः TaiUBhāVā. 179.1(2); (दहेत् … ध्यानेनानीश्वरान् गुणान्) गुणान् सत्त्वरजस्तमांसि। ते चानीश्वराः परतन्त्राः चेतनाधीनमूर्तयः ManuBh. i. 521. 3 (*on* 6.72); प्रसरेन्नादबिन्दूवादि-

सापेक्षा चेदनीश्वरी ŚivDṛ. 2.42; यो यस्माद् बलवान् बाणि ततोऽन्यं रक्षितुं क्षमः कथं परान् साधयति यदि स्वयमनीश्वरः DevīBhāP. ix. 4.16; बालकश्चायम् ···। करोतीन्द्रमनिन्द्रं वा ··· ईशमनीश्वरम् GaṇeP. ii. 18. 29; यद्यनीश्वरो भवेद् जानतोऽप्यस्याक्षितं न सिद्ध्येत् Kiraṇā. 95.17; अगम्भीराशयानि वा दरिद्रकुलानि — अनीश्वराणि कृपणकुलानि SthānṬ. 420B. 7; द्वाविमौ पुरुषौ लोके सुखिनौ न कदाचन। यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ŚārṅgaPa. 1547; अनीश्वरास्ते शत्रवो मां किं निन्दन्ति NyāySu.(Ja.) 502A. 7 (on iii. 2.8); परतन्त्रास्तु ये केचिद् दासत्वं ये च संस्थिताः। अनाथास्ते तु निर्दिष्टाः ···। अनाथा अनीश्वराः DaṇḍaVi. 59.13; किं तेन ईश्वर इति नाममात्रं बिभ्राणेन वस्तुतोऽनीश्वरेण ŚivārkaMaDī. ii. 47.34 (on ii. 1.35); जाज्वल्यमानोऽपि सन् जातः श्रीशिवभूपतेश्च विषये दिल्लीश्वरोऽनीश्वरः ParamāKā. 5.33(? 32); **AIII** who does not own or possess अनीश्वरश्च पृथिव्यां कथं त्वं दातुमिच्छसि MahāBhā. ix. 30. 55; अनीश्वराः पितृमन्तः स्थितपितृमातृकाः पुत्राः ArthŚā. ii. 31. 1(3.5); **AIV** incapable, unable पृथिवी दक्षिणा दत्ता वाजिमेधे मम त्वया। पुनरस्याः पृथिव्या हि दत्वादातुमनीश्वरः MahāBhā. xii.110*(2); उदर्दैः श्वैर्दृश्यन्ते हार्दिता नराः।··· प्रनष्टाग्निबलाहाराः सर्वचेष्टास्वनीश्वराः CaraS. vi. 13.4 (1922 Ed.); (ऊरुस्तम्भे) संस्थाने पीडने गत्यां चालने चाप्यनीश्वरः।··· पुरुषः CaraS. vi. 27.18 (1941 Ed.); RugVi. 24.9; BhāvPra.(Bhā.) viii. 25. 9; अहं करोमीत्यबुधोऽभिमन्यते तृणस्य कुब्जीकरणेऽप्यनीश्वरः TattvSa.(3) 124.20; काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः RaghuVa. 4.69. सुकुमारतनुर्गर्भे जन्तुः ··· परिवर्तेऽप्यनीश्वरः ViṣṇuP. vi. 5.18; BrahmP. 233.18; समेऽपि यातुं चरणाननीश्वरान् मदादिव प्रस्खलतः पदे पदे Kirātā. 8.22; पूजामिमां पठन्नित्यं पूजां कर्तुमनीश्वरः DevīCatuSt. 71; उत्सवव्यसनयोः प्रभुर्विधिर्विक्रियासु महतामनीश्वरः RāmC. 2. 35; (App.2) 37.22; स किं स्वामी स किं सुतः। यः श्रीकृष्णपदाम्भोजे भक्तिं दातुमनीश्वरः BrahmVaiP. i. 8. 61; महिमानं तु यन्नाम्नः पारं गन्तुमनीश्वराः। मुनयोऽपि मुनीन्द्राश्च कथं तं क्षुद्रको भजे BṛNāraP. 2.42; आत्मविक्रयिणः पापाः प्राणत्यागेऽप्यनीश्वराः CaṇḍaKau. 5. 15; राजानः सेवका जाता आनुकूल्येन तस्य ह। प्रतिकूला गता मृत्युं युद्धं कर्तुमनीश्वराः GaṇeP. i. 39. 9; मूढेन पश्यत मया नु यशःकृतेऽथ क्षोदिष्वनीश्वरमहो सुजता प्रबन्धम् UdaySuKa. 3.19; 87.27: समागमे मे रम्भायास्तनया संभविष्यति। अनीश्वरोऽस्मि दानेऽस्या मुने तत्संगमावधि BṛKathāMañ. 7. 132; स्वकारणाधीनसंनिधयः सहकारिणस्तेषामुपनयानपनययोरयमनीश्वर एव Kiraṇā. 145.16; विहाय मानवानन्ये ज्वरं सोढुमनीश्वराः Mānaso. ii. 6.644; सैव माता वरं माता या पोषितुमनीश्वरी। स्वभाग्यभाजनीकृत्य तत्याजावां नदीरये PariPar. 2.264; 1.443; 6.98; सिद्धादेशं प्रभोरेवं स लङ्घितुमनीश्वरः। आमेलमाषत TriṣaŚaPuC. i. 3.10; i. 3.82; तेषां तदा लब्धुमनीश्वराणां श्रियं निजास्येन नलाननस्य। नालं तरीतुं पुनरुक्तिदोषं बहिर्मुखानामनलाननत्वम् NaiṣC. 10. 21; तयोः संरब्धयोरेवं द्रष्टुं नृत्युमनीश्वरः।··· परलोकं ययौ नृपः PāṇḍaC. 4.459; 5.267; सोढुं तापमनीश्वरा यदपि च ग्रीष्मागमं वाञ्छति। ··· मूढस्तत्र सखीजनः स्फुरति किं सुस्थस्य ते चेतसि SaduktiKa. 90. 7; 315. 2; निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते VedāntKa. 114. 11 (on i.1.20); अतीकमभिभवितुमनीश्वरेण केनापि तत्प्रतिनिधिभूतमन्यद् व्यामोहादभिभूयते Ekāva. 8. 61(3) (316.3); कन्यावरौ···इष्टोभयेऽपि परिकर्म विलम्बमानाः। चक्रुर्विधेयमिति कर्तुमनीश्वरास्ते ŚaṅkaDigVi.(Mā.) 3. 54; स्वप्ना अमी देव विवृद्धिकाराः। एषां फलं वक्तुमनीश्वराः स्मः NemiC. 3.19; एवं ताभिरुदाहृते बत मुहुर्वक्तुं वचोऽनीश्वरो मूर्ध्ना वायुचलेन चन्दनतरुः प्रत्युत्तरं दत्तवान् HariVi. 2.17; शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्। दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते RasGaṅ. 12.5; BhāmiVi. 2. 100; उच्चैः करैरुष्णरुचेः समन्ताद् दह्यमानाखिलदिङ्मुखस्य। आगन्तुमह्नः सविधं स्वकालेऽप्यनीश्वरेवापससर्प रात्रिः BhārCam. 3. 86; **AV** not proficient, not skilled सूतमागधब्राह्मरथकाराणामैश्वर्यतो विभागः शेषास्तमुपजीवेयुः। अनीश्वराः समविभागाः ArthŚā. ii. 38.2 (3. 6); **AVI** not rich वसुपरासु परासुनिवोज्झतीष्वविकलं विकलङ्कशशिप्रभम्। प्रियतमं यतमन्तमनीश्वरं रसिकता सिकतास्विव तासु का KāvyālaṅSū. iv. 1. 2; **AVII** not dedicated to Śiva नैर्ऋतं संगृहीत्वान्यः केशेष्वातोल्य चाक्रुद्। अनीश्वरं हविर्भुक्तं त्वयेत्याताडयत् पदा SkandP. iv. 89. 49; गणाः पश्यत दुर्वृत्तैः प्रारब्धानां च कर्मणाम्। अनीश्वरैरवस्थेयं कुतो द्वेषो महेश्वरे SkandP. iv. 89. 56; अनीश्वरासु सर्वासु क्रियासु परमेश्वर। एवमेव भवन्त्येव विघ्नजाताः सहस्रशः SkandP. iv. 89.106; iv. 89.107; **BI** not belonging to the divine being प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम्। प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् AmṛNāU. 8; ManuSm. 6. 72; MārkP. 39. 10; VāyuP. i. 10.88; BhāgP. iii. 28.11; ViṣṇuDhaP. ii. 131.39; LiṅgaP. i. 8. 76; BhavīP. 217A. 2 (i. 145.8); BṛDharmaP. iii. 7.28; ŚārṅgaPa. 4438; दृश्यं विनश्वरं सर्वं विशेषाद् यदनीश्वरम् SkandP. iv. 89. 6; अनीश्वरा गुणा रागद्वेषादयः Aparā. 990. 3 (on 3.110); ManvaVi. 736.8 (on 6. 72); अनीश्वरान् गुणान् ईश्वरस्य परमात्मनो ये गुणा न भवन्ति क्रोधलोभासूयादयः ManvaMu. 241.16 (on 6. 72); **BII** having none else as the master, supreme ब्रह्मणः पादचतुष्टयं निर्विशेषं भवति।··· अद्वितीयमनीश्वरं भवति TripāMaNāU. 364.24(4); ध्यानोपरमणं कृत्वा विद्यासंपादितं मनः। अनीश्वरः प्रशान्तात्मा ततोऽर्च्छेदमृतं पदम् MahāBhā. xii. 238.7; BrahmP. 236.27; जगदादिरनादिस्त्वं जगदीशो निरीश्वरः (v. l. सोऽप्यनीश्वरः) KumāSam. 2.9; प्राप्नोत्यत्रमसौ क्षयमजातुकमनीश्वरम् BṛĀraUBhVā. v. 15. 9; विश्वज्योतिरनीश्वरः MahāP. 25.103; सर्वसंस्तुत्यमस्तुत्यं सर्वेश्वरमनीश्वरम्।··· ध्यायेज्जगत्त्रयार्चार्हमर्हन्तम् YaśasCam. ii. 396. 5; अनीश्वरस्त्वं जगदीश्वरस्त्वम् SkandP. iv. 78. 34; जजाप रुद्रं भगवान् ···। अघोरभ्यतरं प्राहुः ··· षड्विंशकमनीश्वरम् LiṅgaP. i. 71.109; मोक्षकामा वयं चापि कांक्षामो यदनामयम्। अजेयमजरं नित्यमतीन्द्रियमनीश्वरम् BrahmP. 242. 10; परः पुमानीश्वरस्स शिवः शंभुरनीश्वरः ŚivaP. ii(1). 6. 25 (43B. 10); ददृशुस्ते ··· परमात्मानमीश्वरम्।··· अनीश्वरम्। नित्यं सत्यं निर्गुणं च PāñcaRā. (Nā.) i. 12.26; **BIII** not having a controller or master or lord असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् MahāBhā. vi. 38.8 (BhagGī. 16.8) (Śaṅ. न च धर्माधर्मसव्यपेक्षकः अस्य शासिता ईश्वरः विद्यते इति अतः अनीश्वरं जगत् आहुः); SāṁkhyaPraBh. 2. 34 (on 1. 0); अराजकाः प्रजाः ···। सहितास्तास्तदा जग्मुरसुखार्ताः पितामहम्। अनीश्वरा विनश्यामो भगवन्नीश्वरं दिश MahāBhā. xii. 67. 20; बभूव सा ह्यसमनधिश्रया (v.l. मनीश्वरा) पुरी Rāmā. ii. 1550*(4); अनीश्वरमिदं सर्वं ब्रह्माण्डम् DevīBhāP. iii. 1.42; तत् तावन्निर्मितं न चानीश्वरम् PratyabhiVi. i. 272.5 (on i. 5.16); उक्तस्मृतौ हि यतोऽनीश्वरमीश्वरानुपादानकमतोऽसत्यं सत्योपादानशून्यम् ··· जगदिति ये माध्यमिकादयो वदन्ति तन्निन्दया सत्येश्वरोपादानकं तत् ··· इति प्रतिपादितम् GuruCandr. i. 498.17; LaCandr. 434. 28; निन्दन्ति नित्यं द्विजदेवधर्माननीश्वरं सर्वमिदं वदन्तः Vidvanmo. 7. 3; **BIV** who or which does not accept a god अनीश्वरः कथं मुच्येदित्येवं शत्रुकर्शन। वदन्ति कारणैः श्रेष्ठं योगाः सम्यङ् मनीषिणः MahāBhā. xii. 289.3; BrahmP. 238.3; त्रिगुणात्मप्रधानं च तेन सांख्यमनीश्वरम् ĪśvaSi. (U.) 2.27; ये सांख्याः ··· अनीश्वराः। तत्राप्यस्त्यविवेकाख्यो मलो बन्धविमोक्षदा ŚivDṛ. 6.27; प्रधानं हि सांख्यानां सेश्वराणामनीश्वराणां वेश्वराद् क्षेत्रज्ञेभ्यो वा वस्तुतो भिन्नं शक्यं निर्वक्तुम् Bhām. 284. 18 (on i. 4.3); वेदप्रामाण्यवत् कृत्वाभिमानी न च वैदिकः। ईश्वरं वचनाद् वक्ति परं चानीश्वरः खलः SaurP. 39.62; भद्रं नानीश्वरं मतम् AnuVyā. 24A.6 (on 2.2); NyāySu.(Ja.) 336B.4 (on ii. 2. 2); सांख्यः— अनीश्वरः Bhāsk. i. 55.17 (on i. 1.1); **BV** not having Śiva, bereft of Śiva दृष्ट्वा देवनिकायांश्च तस्मिन् दक्षमहाध्वरे। अनीश्वरांस्ततो वेधा व्याजं कृत्वा गृहं ययौ SkandP. iv. 87. 51 (comm. अनीश्वरान् महादेवरहितान्); अर्धे दानववैरिणा गिरिजयाप्यर्धे च तस्याहृते राजन् विश्वमनीश्वरं समभवद् PrabaCin. 52.13 (FN.); *m.* **I** other than the god, other than the Supreme Self न च ··· अनीश्वरस्य जीवस्य व्याकरणसामर्थ्यमस्ति BrahmSūBh.(Śaṅ.) 519. 7 (on ii. 4.20); न चेश्वरोऽनीश्वरो वा प्रकृतोऽप्राणुलक्षणः ĪśvaSi.(U.) 2.35; अन्योऽसावीश्वरो मत्तस्तस्याचाहमनीश्वरः TaiUBhāVā. 135. r(2); अपि चानीश्वरेण परिमितशक्तिज्ञानेन विग्रहवतानवाप्तकामेन कृतमवगतं घटादि कार्यम् ĪśvaSi.(Yā.) 74.16; अनीश्वरस्य निर्माणं वाक्यत्वमनुमापयेत् ĀgaPrā. 14.14; स हि सर्वप्राणिनां कर्मानुरूपं फलं प्रयच्छन् कथमनीश्वरः स्याद् NyāyKa. 53.26; कर्मणीश्वरोऽनीश्वरः स्याद् TātpaṬ.(Vā.) 594.14 (on iv. 1.20); अनीश्वरस्य ज्ञातृत्वकर्तृत्वे स्वभावविरुद्धे PratyabhiVi. i. 68.4 (on i. 1.3) (Bhāsk. यो यावतीश्वरो न भवति स तावति ज्ञाता कर्ता च न भवति); घटादिकार्यमनीश्वरेणाल्पज्ञानशक्तिना सशरीरेण ··· निर्मितं दृष्टम् BrahmSūBh.(Rā.) 139.5 (on i. 1.3); ŚrutaPra. iB. 123.13 (on i. 1.3); अनीश्वरस्यैव भौतिकं शरीरम् PrakaVi. 559.16; न हि कश्चिदनीश्वरः सन् अर्थमात्रप्रमेयप्रतिपादकोऽस्ति TarkSaṁ.(Ā.) 106. 20; अनीश्वरेष्वपि वैशुचित्त्या धर्मिग्राहकलङ्कावे किं कुर्मः ŚatDū. 151. 23; ब्रह्मादयोऽनीश्वराः सकलजगत्सृष्ट्याद्यकारणत्वात् NyāyPari. 148. 9; 405.1; 509. 8; जडस्य न कारणता न चानीश्वरस्य चेतनस्यापि SarvaDaSaṁ. 8.97; एवमनीश्वरेष्वपि···निमित्तोपादानत्वसमुच्चयः सिद्धः NyāySiA. 233.14; लोके पित्राचार्दीनामनीश्वराणां तादृशशक्तिमत्त्वे सर्वेश्वरस्य सुतरां तत्सिद्धेः TattvPrakā. 89B. 11 (on ii. 1.26); अनीश्वरा हि स्वसंप्रतिमातेऽप्यर्थे (समाश्रा) आभासार्थं वेदमुपजीवन्ति NyāySu.(Ja.) 595A.9 (on iii. 4.5); तार्किकेश्वरो वितथसंकल्पत्वादनीश्वर एव स्यात् ŚivārkaMaDī. i. 149.29 (on i. 1.3); न ह्यनीश्वरस्य पुरुषोत्तमत्वं पुरुषेष्वनुत्तमस्य च महेश्वरत्वम् VīraMi.(Bhakti.) 142. 30; अनीश्वरे शब्दगुणैश्वर्ययोगेन (भगवच्छन्दस्य) गौणत्वं स्याद् SiddhāSi. i. 28. 1; ईश्वरीभूताः — अनीश्वराः सन्तः ईश्वराः संवृत्ताः Bhāsk. i. 29.16 (on i. 1.1); **II** other than the god Śiva सकलं निष्कलं चेति स्वरूपद्वयमस्ति मे। नान्यस्य कस्यचित् तस्मादन्यः सर्वोऽप्यनीश्वरः ŚivaP. i. 9.30 (7B. 13)

अनीश्वरकर्तृक (anīśvarakartṛ-ka) *adj.* [*f.* -ā] not created by God अद्भ्यः संभूतः पृथिव्यै रसाच्चेत्यादेरनीश्वरकर्तृकावान्तरसृष्टिविषयत्वस्योक्तत्वाद् NyāySu.(Ja.) 299A. 11 (on ii. 1. 6); न हि हिरण्यगर्भसृष्टिरनीश्वरकर्तृका NyāySu.(Ja.) 299B.4 (on ii. 1.6)

अनीश्वरकार्यत्व (anīśvarakārya-tva) *n.* the state of being a product of one other than the god हिरण्यगर्भस्यानीश्वरकार्यत्वात्सत्त्वेन विष्वन्तानां परमात्मत्वस्यावश्यवक्तव्यत्वात् VīraMi.(Bhakti.) 163.2.

अनीश्वरचैतन्य (anīśvara-caitanya) *n.* consciousness of one other than the Supreme Self, consciousness of the individual self अनीश्वरचैतन्यप्रयत्नयोरीश्वराधिष्ठितत्वाभ्युपगमात् NyāyPari. 293.2.

अनीश्वरज्ञ (an-īśvarajña) *adj.* who does not know the god उल्लङ्घ्य शास्त्रीयविधिं तमःस्था निपीडयन्तः स्वशरीरमात्रम्। क्रोधेन हिंसैकपराः कदाचित्तपश्चरन्त्येवमनीश्वरज्ञाः Vidvanmo. 7.8.

अनीश्वरज्ञान (anīśvara-jñāna) *n.* knowledge other than that of the Supreme Self प्रकृतप्रवृत्तिहेतुरनीश्वरज्ञानं पक्षीक्रियत इति चेत् NyāySu.(Ja.) 45A.11 (*on* i. 1.1)

अनीश्वरता (anīśvara-tā) *f.* I the state of being other than the Supreme Self, powerlessness, non-supremacy चेतनस्यापि अनीश्वरतायां नैतद् घटते PratyabhiVi. ii. 151.11 (*on* ii. 4.1); अनीश्वरतयैव स्वात्मन उपलम्भात् ŚatDū. 152.6; II incapability नेमेर्विकारमाधातुमनीश्वरतयात्मनः। लज्जयेवातिचक्राम वसन्तर्तुरितिद्रुतम् PāṇḍaC. 16.98.

अनीश्वरताज्ञान (anīśvaratā-jñāna) *n.* knowledge as not being the Lord भ्रान्तिः—अनात्मानीश्वरताज्ञानरूपो विपर्यासः Bhāsk. i. 82.23 (*on* i. 2.1)

अनीश्वरतादोष (anīśvaratā-doṣa) *m.* defect of not being the Supreme Self, defect of non-supremacy (ब्रह्मा सृष्टिम्) यदि धर्माधर्मावपेक्ष्य करोति नास्य स्वाधीनं कर्तृत्वमित्यनीश्वरतादोषः NyāyKa. 53.24.

अनीश्वरतारूप (anīśvaratā-rūpa) *adj.* of the nature of not being the Supreme Self यद्यपि जीवस्यापि स्वप्राधान्येनाप्यहंपरामर्शो विद्यत एव तथापि सः ··· प्रतियोगीदन्तापरामर्शरूपितत्वेन नैश्वर्यरूपः। अपि त्वनीश्वरतारूप एव Bhāsk. i. 12.2 (*on* i. 1.1); तदेवं सति व्यामोहे — स्वात्मनि अनीश्वरतारूपे मोहे, व्यपोहिते — अपसारिते सति Bhāsk. ii. 146.12 (*on* ii. 3.17)

अनीश्वरत्व (anīśvara-tva) *n.* AI the state of not being the master एकस्मिन् वस्तुनि विरुद्धाभिप्राययोरेकाभिप्रायानुविधायित्वे तस्येतरस्यानीश्वरत्वम् BrahmSi. 121.8; AII the state of not being the Supreme Self, non-supremacy, powerlessness हीनमध्यमोत्तमभावेन हि प्राणिभेदान्विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेः अस्मदादिवदनीश्वरत्वं प्रसज्येत BrahmSūBh.(Śaṅ.) 410.12 (*on* ii. 2.37); अभिभूतः स एवात्मा जीव इत्यभिधीयते। किंचिज्ज्ञत्वानीश्वरत्वसंसारित्वादिधर्मवान् SarvaVeSāSaṁ. 320; अनीश्वरत्वकिंचिज्ज्ञत्वशरीरित्वपुण्यपापपरवशत्वमनुष्यत्वादिविशेषप्रहाणेन कार्यस्य स्वनिर्माणसमर्थबुद्धिमत्कर्तृमात्रेण संबन्धनियमनिश्चयः ĪśvaSi.(Yā.) 79.6; ĀgaPrā. 16.18; एकाभिप्रायानुरोधेन सर्वेषां प्रवृत्तावेकस्येश्वरत्वं नापरेषाम् मठपरिषदामिव कार्योत्पत्त्यनुरोधेन सर्वेषामविरोधे प्रत्येकमनीश्वरत्वम् NyāyKa. 57.20; ईश्वरस्य भोगादिप्रसक्तितया चानीश्वरत्वम् Bhām. 466.4 (*on* ii. 2.40); कार्यत्वस्यासाधकानामनीश्वरत्वादीनां लिङ्गिन्यप्राप्तेः BrahmSūBh.(Rā.) 141.17 (*on* i. 1.3); न च अविद्यासाचिव्ये ब्रह्मणोऽनीश्वरत्वमुपकरणस्य स्वातन्त्र्याविघातकत्वात् VedāntKa. 2.24 (*on* i. 1.0); न च तद्व्यपास्तत्वे संसारिवत् अनीश्वरत्वं, इच्छादिमत्त्वेऽपि तुल्यत्वात् TarkSaṁ.(Ā.) 113.2; ब्रह्मादिषु केषुचिदीश्वरतया शङ्क्यमानेषु तेनानीश्वरत्वं साध्यते NyāyPari. 146.7; अशक्यविषयप्रयत्नत्वादीश्वरस्यैवानीश्वरत्वं वा NyāySiA. 230.12; एतदुपहितचैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते VedāntSā.(Sa.) 6.18; न चानीश्वरत्वम्। मर्यादामार्गस्य तथैव निर्माणात् AṇuBh. 154.12 (*on* ii. 3.42) जगद्धि निम्नमुन्नतं च पापपुण्यतत्फलैः सृजत्यदो यदि प्रभुस्तदास्य पक्षपातिता। न पूर्वपूर्वकर्मणेति वक्तुमत्र युज्यते तदा ह्यनीश्वरत्वमस्य दूषणं प्रसज्यते NayaMañ. II. i.12.23; B the state of not being the owner अविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्यानीश्वरत्वात् सर्वाभ्यनुज्ञावश्यं कार्या Mitā. 219.20 (*on* 2.114); BālamBha. ii. 133.20 (*on* 2.113)

अनीश्वरत्वदोष (anīśvaratva-doṣa) *m.* defect of not being the master, defect of powerlessness or non-supremacy न चानीश्वरत्वदोषः; न हि सेवाभेदानुरोधेन फलभेदप्रदः प्रभुरप्रभुर्भवति BrahmSi. 11.5.

अनीश्वरत्वपक्ष (anīśvaratva-pakṣa) *m.* view as not being the Supreme Lord अनीश्वरत्वपक्षे तु तेजोविशेषैणैव सोढव्यम् ŚatDū. 239.8.

अनीश्वरत्वप्रसङ्ग (anīśvaratva-prasaṅga) *m.* undesired contingency of not being the Supreme Lord or of non-supremacy स्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्रसङ्गात् BrahmSūBh.(Śaṅ.) 410.19 (*on* ii. 2.37); प्राक् प्रकृतिपुरुषयोः उत्पत्तेः ईशितव्याभावात् ईश्वरस्य अनीश्वरत्वप्रसङ्गात् GītāBh.(Śaṅ.) 389.15 (*on* 13.19); केवलस्य कर्तृत्वे विश्वस्य वैश्वरूप्यव्याघातः, सततोत्पत्तिप्रसङ्गश्च। अदृष्टापेक्षायां कल्पनागौरवम्, तत एव तदुत्पत्तेः। स्वार्थं प्रवृत्तावनीश्वरत्वप्रसङ्गः ĀtmaTaVi. 872.9; वैषम्यं कुर्वतो रागादिमत्त्वं दृष्टमिति तदप्यनुमातव्यमित्यनीश्वरत्वप्रसङ्गः PrakaVi. 555.11; VedāntKa. 247.10 (*on* ii. 1.34); कर्मसापेक्षत्वे तस्यानीश्वरत्व-प्रसङ्गात् ŚivārkaMaDī. ii. 46.28 (*on* ii. 1.34)

अनीश्वरत्वव्याप्ति (anīśvaratva-vyāpti) *f.* concomitance with non-supremacy or powerlessness ईश्वरादिलक्षणव्यतिरेकस्यानीश्वरत्वव्याप्तेर्ब्रह्मादिषु केषुचिदीश्वरतया शङ्क्यमानेषु तेनानीश्वरत्वं साध्यते NyāyPari. 146.5.

अनीश्वरत्वापत्ति (anīśvaratvāpatti) *f.* undesired contingency of non-supremacy or powerlessness पुण्यपापलेपप्रसङ्गेनानीश्वरत्वापत्तेः TattvPrakā. 121A.3 (*on* ii. 3.33); न कर्मापेक्षायामीश्वरस्यानीश्वरत्वापत्तिदोषः ŚivārkaMaDī. ii. 47.30 (*on* ii. 1.35)

अनीश्वरत्वोपलम्भ (anīśvaratvopalambha) *m.* perception of being other than the Supreme Self अत्यतिशेश्वराणामपि स्वगतेच्छाविघातदुःखादिदर्शनात्तावत एवानीश्वरत्वोपलम्भरूपत्वात् ŚatDū. 152.9.

अनीश्वरनय (anīśvara-naya) *m.* doctrine of denial or non-acceptance of a god अनीश्वरनयेन स्वच्छन्ददारितकुरङ्गकण्ठीरववत् स्वातन्त्र्यमोक्तृ TattvPradī.(A.) 371.5 (*on* 3.75)

अनीश्वरपक्ष (anīśvara-pakṣa) *m.* the view of non-acceptance or denial of a god अनीश्वरपक्षे चाक्षसंयोगादिभिरेव सव्यापारे कर्मण्यपि प्रसङ्गात् KhaṇḍanKhā. 521.20; विशेषणस्य च अनीश्वरपक्षे — वैयर्थ्यात् TarkSaṁ.(Ā.) 54.9.

अनीश्वरपरिस्पन्द (anīśvara-parispanda) *m.* vibration of what is different from the Supreme Lord क्वचिदनीश्वरपरिस्पन्दानामपि नित्यत्वस्य वक्ष्यमाणत्वात् NyāySu.(Ja.) 159B.4 (*on* i. 2.2)

अनीश्वरप्रक्षिप्तत्व (anīśvaraprakṣipta-tva) *n.* the state of being an interpolation by one who is not the Supreme Lord or by one other than the Supreme Lord शैवस्तुतिवचनस्यास्य ··· अनीश्वरप्रक्षिप्तत्वमितिवादरूपतया स्वीयतन्त्राधिकारिशैवस्तुतिमात्ररूपत्वं वा कल्पनीयम् PāñcRāRa. 28.5.

अनीश्वरप्रणीतत्व (anīśvarapraṇīta-tva) *n.* the state of being composed by one who is other than the god अनीश्वरप्रणीतत्वस्यापि·शक्यसाधनत्वात् NyāySu.(Ja.) 84A.7 (*on* i. 1.1)

अनीश्वरप्रत्यक्ष (an-īśvarapratyakṣa) *n.* perception of one other than the god अस्मदयोग्यविषयं अनीश्वरप्रत्यक्षं योगिप्रत्यक्षम् — इति अयुक्तम् TarkSaṁ.(Ā.) 88.30; 89.3.

अनीश्वरप्रमा (anīśvara-pramā) *f.* valid knowledge of one other than the Supreme Lord (i. e. of *jīva*) अनीश्वरप्रमा विज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वाद् घटवत् TattvPradī.(Ci.) 117.13.

अनीश्वरप्रमापक्षीकार (anīśvarapramā-pakṣīkāra) *m.* making the valid knowledge of one other than the Supreme Self as the subject of inference अनीश्वरप्रमापक्षीकारे यावदीश्वरसिद्धि व्यर्थं विशेषणम् NyāyPari. 379.8.

अनीश्वरबुद्धित्व (anīśvarabuddhi-tva) *n.* the state of being the knowledge other than that of the Supreme Lord व्यासादिबुद्धिः न वेदार्थविषया, बुद्धित्वात्, अस्मदादिबुद्धिवत् – इति चेत्, न, तव ईश्वरबुद्धौ व्यभिचारात्, अनीश्वरबुद्धित्वात् — इति विशेषणेऽपि निरीश्वरवादे — विशेषणवैयर्थ्यात् TarkSaṁ.(Ā.) 89.18.

अनीश्वरभक्त (anīśvara-bhakta) *m.* devotee of one other than Śiva मा वानीश्वरभक्तो भवामि भवनेऽपि शक्रस्य MahāBhā. xiii. 109*(2)

अनीश्वरमत (anīśvara-mata) *n.* system or doctrine not admitting (the existence of) a god अनीश्वरमतमसमञ्जसम् BrahmSūBh.(Ma.) 29A.9 (*on* ii. 2.10); एवं प्रत्येकं दूषितान्यनीश्वरमतानि सामान्यदूषणेन निराकुर्वन् सूत्रमुपन्यस्य व्याचष्टे। विप्रतिषेधादिति TattvPrakā. 97A.8 (*on* ii. 2.10)

अनीश्वरमति (anīśvara-mati) *f.* idea or notion as not being the Supreme Lord त्वय्यनीश्वरमतिं न च कुर्मः Yādavā. 21.25.

अनीश्वरमीमांसक (anīśvara-mīmāṁsaka) *m.* Mīmāṁsaka who does not admit (the existence of) the Supreme Lord अदृष्टं कारणमित्यनीश्वरमीमांसकादिमतम्, तन्न LalitāTriBh. 260.12 (*on* 4); तत्साधनानुष्ठापयिता सन् तत्फलकामनां पूरयतीत्यनीश्वरमीमांसकमतनिरासो द्रष्टव्यः LalitāTriBh. 274.10 (*on* 9)

अनीश्वररूप (an-īśvararūpa) *adj.* not having the nature of the Lord पूजयितुः ध्यातुः वापृथग्भूतं तत् प्रमेयम्, पूज्यम्, ध्येयं च भाति इति तत् तावत् ··· न च अनीश्वरम् (v. l. अनीश्वररूपम्) PratyabhiVi. i. 272.5 (*on* i. 5.16)

अनीश्वरलिङ्ग (anīśvara-liṅga) *n.* characteristic of what is other than the Supreme Lord आदित्यस्य तु नियम्यत्वजन्यत्वपराङ्गत्वपरतन्त्रप्रकाशकत्वादीनाम् अनीश्वरलिङ्गादीनां श्रवणाज्जीवत्वं स्पष्टमेव VedāntRaMañ. 58.3 (1.4)

अनीश्वरवत् (anīśvara-vat) *adv.* like that of one who is other

than the Supreme Lord अनादिनिधना ह्यषा वागुत्सृष्टा स्वयंभुवा । वदस्य वेदं सनातनम् इत्यादिभिरीश्वरस्याप्यनीश्वरवदेव वेदप्रवर्तनमात्रसिद्धेः NyāyPari. 388. 17.

अनीश्वरवाद (anīśvara-vāda) *m.* theory of non-existence of the Supreme Lord अनीश्वरवादे अङ्कुरादीनामकरणकत्वप्रसङ्गात् KhaṇḍanKhā. 463. 19; अनीश्वरवादेऽपि राजादिप्रेरितभृत्यादेरकर्तृत्वापत्तेः TattvPradī.(Ci.) 289.2; न तावत् अनीश्वरप्रत्यक्ष इति विशेषणम् अनीश्वरवादे संभवति TarkSaṁ.(Ā.) 89. 3; 4. 3.

अनीश्वरवादपादप्रसारिका (anīśvaravāda-pādaprasārikā) *f.* causing of a firm footing in the doctrine of the non-existsence of a god स्वभावोऽयं पदार्थानामिति चेन्न । अनीश्वरवादपादप्रसारिकापातात् NyāySu (Ja.) 305A. 8 (*on* ii. 1. 7)

अनीश्वरवादप्रसङ्ग (anīśvaravāda-prasaṅga) *m.* undesired contingency of the theory of non-existence of a god महानुभावानाम् ··· मूर्तित्रयदेवानां ध्यानाद्युपकाराय तादृशमूर्तिमत्त्वम् अस्तीति न किंचिदनीश्वरवादप्रसङ्गावकाशः LalitāTriBh. 302. 13 (*on* 29)

अनीश्वरवादाङ्गीकार (anīśvaravādāṅgikāra) *m.* acceptance of the theory of the non-existence of a god भवदभिमते ब्रह्मणि हेतुरनैकान्तिक इति चेन्न । केवलानुमानवादिनं प्रत्यनीश्वरवादाङ्गीकारेण प्रत्यवस्थानात् NyāySu.(Ja.) 110B.1 (*on* i. 1. 3)

अनीश्वरवादिन् (anīśvara-vādin) *adj.* who holds the view of the non-existence of a god एवमनीश्वरवादिनां सौगतादीनां शुद्धसंवित्संतानादिषु ··· समाश्वर्चाः NyāyPari. 381.14; अनीश्वरवादिनं प्रतीदं दोषाभिधानम् NyāySu.(Ja.) 165B.11 (*on* i. 2.4); अनीश्वरवादिनः ··· स्वकीयेषु स्वस्योत्कर्षं प्रकटयन्ति SiddhāTaVi.(ŚeṣaVā.) 7. 11.

अनीश्वरविनाश्यादिकर्तृमत्त्व (anīśvaravināśyādikartṛmat-tva) *n.* the state of having a creator who is not a god and who is perishable etc. यथासिद्धे च दृष्टान्ते भवेद्धेतोर्विरुद्धता । अनीश्वरविनाश्यादिकर्तृमत्त्वं प्रसज्यते Śloka-Vār. 5(15).80 (661.4)

अनीश्वरविषयता (anīśvaraviṣaya-tā) *f.* the state of having reference to one other than a god न च मुक्तस्वातन्त्र्यविषयाणां श्रुतीनाम् ··· अनीश्वरविषयतया संकोचः ŚatDū. 155. 1.

अनीश्वरशरीरविषयता (anīśvaraśarīraviṣaya-tā) *f.* the state of having reference to the body of one other than the Supreme Lord रमणीयचरणादिवाक्यमेवानीश्वरशरीरविषयतया व्यवस्थापनीयम् ŚivārkaMaDī. i. 252.7 (*on* i. 1. 21)

अनीश्वरशिरस् (anīśvara-śiras) *n.* head of one other than a god (i. e. head of a mortal) ननु प्रत्यक्षेण योऽर्थो नोपलभ्यते स सर्वथा नास्तीति मतं संगच्छते । यथा द्वितीयमनीश्वरशिरः, तृतीयो बाहुः शशविषाणादयो वा MāṭhVṛ. 14.13 (*on* 7); 15.11 (*on* 7); 25.15 (*on* 14)

अनीश्वरसांख्यमत (anīśvarasāṅkhya-mata) *n.* doctrine of the Sāṁkhya not accepting the existence of the Supreme Lord एवमनीश्वरसांख्यमतम् ··· अपाकृत्य NyāySu.(Ja.) 328A.8 (*on* ii. 2.1)

अनीश्वरसूत (anīśvara-sūta) *adj.* having as charioteer who is crippled (i. e. Aruṇa) तं विलोक्य पथि कान्यपि दूरं भेजिरेऽभिजलवाहकुलानि । अव्रजत् क्षणमनीश्वरसूतस्तद्दिशैव दिवसेश्वरथोऽपि RāmC. 16. 36.

अनीश्वरसेवा (anīśvara-sevā) *f.* service or worship of one who is other than the Supreme Lord अनीश्वरसेवापक्षीकारे सिद्धसाधनात् NyāySiA. 221.9.

अनीश्वरात्मन् (an-īśvarātman) *adj.* I (individual self) which is of a nature different from that of the Supreme Being न च प्रमाश्रयैरनीश्वरात्मभिः ··· अतिव्याप्तिः TārkiRa. 7. 6; II of the nature of one not admitting the existence of a god विषयार्णवे । घोरदुःखभयाक्रान्ते समाजेऽनीश्वरात्मनि ··· न विशेषो विभाव्यते BhaviP. 85B.2 (i. 43. 48)

अनीश्वरात्मवत् (anīśvarātma-vat) *adv.* like the individual self which is other than the Supreme Lord ब्रह्म शरीरित्वात्यन्ताभावरहितम् । आत्मत्वादनीश्वरात्मवत् NyāyPari. 258.2.

अनीश्वराधिष्ठित (an-īśvarādhiṣṭhita) *adj.* not controlled by the Supreme Self तत्र च घटो दृष्टान्तो भवत्येवास्ति तस्यानीश्वराधिष्ठितस्यापि चेतनाधिष्ठितत्वम् NyāyRa. 661. 23 (*on* 5(15). 80)

अनीश्वरापेक्षत्व (anīśvarāpekṣa-tva) *n.* the state of not being dependent on the Supreme Self जीवस्य जीवान्तरनियामकत्वे अनवस्थितेः । साम्यादसंभवाच्च न जीवः । नियमे प्रमाणाभावात् । अनीश्वरापेक्षत्वाच्च BrahmSūBh.(Ma.) 11B. 8 (*on* i. 2. 17) (TattvPrakā. परमेश्वरानङ्गीकारादिति भावः)

अनीश्वरासर्वज्ञाशङ्का (anīśvarāsarvajñāśaṅkā) *f.* doubt of (being) neither the Supreme Lord nor the omniscient one वा वासुदेवे अनीश्वरासर्वज्ञाशङ्का मूर्खाणाम्, तां परिहरन् श्रीभगवानुवाच GītāBh.(Śaṅ.) 113.9 (*on* 4. 5)

अनीश्वरीया (anīśvar-īyā) *adj.* (*f.*) coming from one other than the Supreme one प्रमाणपदमाप्नुयात् कथमनीश्वरीयापि चेदतः श्रुतिरियं श्रुता जगति तव्यमैशी कृतिः Vidvanmo. 5.13.

अनीश्वरेच्छा (anīśvarecchā) *f.* will of one who is not the Supreme one न च सामग्र्यां सत्यां कचित् शानं क्वचिन्नेति नियन्तुं शक्यम्, अनीश्वरेच्छया तन्नियमासिद्धेः ŚatDū. 221.23.

अनीश्वरोचिता (an-īśvarocitā) *adj.* (*f.*) not worthy of a king अनीश्वरोचिता तस्य क्रीडापि अपराभवत् RājTa.(Ka.) 1. 357.

अनीषच्छासन (an-īṣacchāsana) *adj.* [SiddhaHe. v. 3.141; *cf.* Vār. 1 *on* P. iii. 3. 130] not easy to be punished, difficult to be punished अनीषच्छासनो दुर्धर्षो दुर्मर्षणोऽपि च । मया सुशासनस्तेऽरिः Dvyāśra-Kā. 13.38.

अनीषत् (an-īṣat) *adv.* not slightly, profusely तिमिरकुलैरनीषदुदमेषि मसीमलिनैः Kapphiṇā. 11. 33.

अनीषत्कर (an-īṣatkara) *adj.* not easy to be done, difficult to be done न किंचिदनीषत्करं नाम कृतान्तस्य AnarghaRā. 6.81(3); अनीषत्कराः परिहर्तुमुत्तापाः TilaMañ. 259. 1; यत्रानीषत्करं कृत्यं तत्रापीषद्वचं त्वया DvyāśraKā. 13.35 (comm. न केवलं सुखसाध्यं दुःखसाध्यम्); अति(नी)षत्करमप्युच्चैः कार्यमनीषत्करं भवेद् । यत्रैकहृदयोत्साहधारिणः सहकारिणः PāṇḍaC. 12.352.

अनीषदर्थ (anīṣad-artha) *adj.* meant for the sake of (the sense) 'other than small' (का पथ्यक्षयोः) अनीषदर्थे आरम्भः । कापथः Nyāsa. ii. 478. 3 (*on* vi. 3. 104); PadMañ. *on* KāśiVṛ. *on* P. vi. 3. 104; Prasā. i. 666.12.

अनीषद्दान (an-īṣaddāna) *adj.* [SiddhaHe. v. 3.141; *cf.* P. iii. 3. 126] not easy to be given, difficult to be given ईषद्दानं मयानीषद्दानेऽपि त्वत्कृते सखे DvyāśraKā. 13. 39 (comm. अनीषद्दाने दुःखेन देयेऽपि वस्तुनि विषये)

अनीह (an-īha) *adj.* [*f.* -ā] 1 free from desire, indifferent स नेह (v.l. अनीह) आयाति परं परात्मा MahāBhā. v. 246*(7); xii. 208. 15; न चापि युक्तं त्वद्बाहुनिर्जितं मम मानिनः । राज्यं भोक्तुमनीहस्य दुर्बलस्येह कस्यचित् MārkP. 114.22; अनीहा निरपणा ब्राह्मणा बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसः TaiUBh. 264.11 (*on* 2.7); शुद्धं ब्रह्माहमस्मीत्यविरतमधुनात्रैव तिष्ठेदनीहः ŚatŚlo. 64; एकोऽहम् ··· स्फुरितभेदरहितोऽहम् । एकोऽहमनीहः SvātmNi. 112; ईशम् ···। अनीहः समर्चयेद् ParāSū. 9. 16; योऽनीहो देहगेहेऽपि सोऽनागारः सतां मतः YaśasCam. ii. 411. 4; त्वत्तोऽस्य जन्मस्थितिसंयमान् विभो वदन्त्यनीहादगुणादविक्रियात् BhāgP. x. 3. 19; x. 16. 49; xi. 23. 45; अनीह एतद् बहुधैक आत्मना सृजत्यवत्यत्ति SkandP. ii(7).16.5; मनः प्रशान्तमत्यच्छम् ···। अनीहं विगताभीष्टं नाभिवाञ्छति नोज्झति YogVā. ii. 13.49; निर्ग्रन्थो निर्ममोऽनीहः स्वामी ··· विजहार वसुंधराम् TriṣaŚaPuC. ii. 3. 309; अनीहैरिव नागेन्द्रैर्विवापिण्डोऽप्युपाददे PāṇḍaC. 12. 237; अनीहमकाममवाममनाधि । जिनेन्द्र मनो मम वाञ्छति नाम न विभ्रमधाम न मौक्तिकदाम ChandaśCū. ii. 172.2; ते प्राहुरनीहानां कार्यं नः किमपि नास्ति शुभे PrabhāC. 45. 10; सा ···। विलोक्य वदनं शार्ङ्गिकलाप मुहुर्मुहुः ···। हा निर्मम इहानीह ŚāliC. 7. 63; स्वयं तथा चानीहो भूत्वा निवसेत् ManvaVi. 752 12 (*on* 6.95); अथानीहस्य किंचिद् दत्त्वा विभागमाह VyavaNi. 418.3; सोऽहम् ··· स्वयमनुपतिते मोक्षसौख्येऽप्यनीहः Nāray. xi. 95. 4; 2A effortless, devoid of activity एकान्तेन ह्यनीहोऽयं पराभवति पूरुषः MahāBhā. iii. 33. 36; प्रत्यक्षस्य मानत्वमित्येव केनावसीयते । तथा च पुरुषार्थतत्साधनमात्रसिद्धौ जगदनीहमापद्येत NyāySu.(Ja.) 333A.9 (*on* ii. 2. 3); 2B free from any undertaking, free from any act या मुदा कुमिततुः । साथ ··· अनीहा प्रेतावासे निवसति YaśasCam. i. 129. 3; कर्मण्यनीहस्य भवोऽभवस्य ते ··· स्वात्मरतेः खिद्यति धीर्विदामिह BhāgP. iii. 4.16; *m.* I epithet of Śiva नमस्ते परमेशाय ···। नमोऽनीहाय बीहाय ŚivaP. ii(3). 11. 15 (134B.8); भावग्राह्यमनीहाख्यं भावाभावकरं शिवम् ।···ये विदुस्ते जहुस्तनुम् ŚivaP. vii(1).6. 48 (509A. 10); II epithet of Viṣṇu (Kṛṣṇa) अनीहोऽनीशोऽव्ययोऽक्षयः ।··· इत्येतद्वासुदेवस्य विष्णोर्नामसहस्रकम् PāñcaRā.(Nā.) iv. 3.14; III name of a king of Ayodhyā, belonging to the solar dynasty, PW., MW., APTE.

अनीहक (anīha-ka) *adj.* having no desire धनेशीलो नरो विद्वानीहकोऽनीहकोऽपि वा ।··· चरेद् भूतान्यहिंसयन् MahāBhā. xii. 283. 29; नैव कर्मितुं शक्तोऽस्म्यनुरूपमनीहकम् BrahmVaiP. iii. 13. 41.

अनीहता (anīha-tā) *f.* the state of having no desire, detach-

ment विनयानोद्दताक्षान्तिनैर्ग्रन्थप्रमुखा गुणाः । दुर्लभा ये कलौ सर्वे तेऽपीक्ष्यन्तेऽत्र निर्मलाः Gurvā. 469.

अनीहन (an–īhana) *n.* (Jain.) absence of investigation or speculation अवग्रहेहादीनां गृहीतग्राहित्वेऽपि प्रामाण्यमिष्यत एव । न चैषां भिन्नविषयत्वम्, एवं ह्यवगृहीतस्य अनीहनात्, ईहितस्य अनिश्चयादसमञ्जसमापद्येत Pramā-Mī. 4.25 (*on* i. 1. 4)

अनीहमान (an–īhamāna) *adj.* [*f.* -ā] **1** not wishing, not desiring महायज्ञान् यज्ञशास्त्रविदो जनाः । अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ManuSm. 4.22; गृहा नानीहमानस्य न चैवावदतो मृषा JātaMā. 107.18 (18.13); विभागं चेत् पिता कुर्यादिच्छया विभजेत् सुतान् ··· शक्तस्यानीहमानस्य किंचिद् दत्त्वा पृथक्क्रिया YājñaSm. 2.116; AgniP. 255. 3; विशदायां शरदि ··· स्वकरतलोपधानच्छायोपरक्ता रिक्ता इति मुग्धयुवतयः क्षणमनीहमानाः पातुमस्युः(?) AvantiKa. 32.18; प्रशस्य तावद् वणिजां प्रहारान् प्राणक्षयं कर्तुमनीहमानान् इति ब्रुवाणो वरवारणेन्द्रं कश्चिद् भटो योद्धुमुपानिनाय VarāṅgaC. 18. 39; कुसुमशेखरोऽपि किंचित् सदर्पतया तमुपसर्पितुमनीहमानो हीनबलतया च योधयितुमपारयत् TilaMañ. 82.13; पितृद्रव्यमनीहमानस्यानिच्छतोऽपि Mitā. 221.19 (*on* 2.116); VīraMi. 569. 2 (*on* 2.116); (अस्पृहः) गृहस्थ एव ··· अनीहमानः ··· ब्रह्मभवति Manva-Vi. 752. 25 (*on* 6.96); मन्वादिष्वनीहमानस्यापि योगिनोऽन्तर्यागविधानात् YogSā. 24.5 (2); अर्जनसमर्थस्य पुत्रस्यानीहमानस्य दायजिघृक्षाभावमाह स एव (याज्ञवल्क्यः) VyavaMa. 99. 14; प्रचण्डे च वलति पवमाने ··· सागरानपि शोषयतस्तस्य सनीडमागन्तुमनीहमानेषु च यादोगणेषु ··· प्रचेताः प्राकृतलोकसाधारणतटस्थ एव बहिरवतस्थे NīlaVi. 24.6; **2** not making any effort, not exerting, inactive यदि चाभावात् भावोत्पत्तिरभ्युपगम्येत, एवं सत्युदासीनानाम् अनीहमानानामपि जनानामभिमतसिद्धिः स्यात् BrahmSūBh.(Śaṅ.) 393.17 (*on* ii. 2. 27)

अनीहलभ्य (anīha–labbya) *adj.* attainable by one who has no desire or attachment हित्वा तदात्मनि सुखं त्वदनीहलभ्यं क्लिश्यामहेऽतिकृपणास्तव माययेह BhāgP. x. 70.28.

अनीहा (an–īhā) *f.* **1** absence of exertion or endeavour, indifference, disinterest ऋणं धारयमाणस्य कुतः सुखमनीहया MahāBhā. v. 105. 6; ऐकगुण्यमनीहायामभावः कर्मणां फलम् MahāBhā. v. 133. 25; अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया । अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः Kirātā. 2. 10; स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् । अभयं चाप्यनीहायां संकल्पाद् विरमेत् कविः BhāgP. vi. 16. 59; xi. 18.17; **2** absence of desire, detachment ईहते धनहेतोर्यस्तस्यानीहा गरीयसी MahāBhā. xii. 20.7; मनुष्येभ्यस्त्वनीहा PārāSū. 19.27; अन्ये भक्ता दीक्षिताः सर्वत्रानीहामीश्वरदर्शन एवेहां कर्तुमसमर्थाः PārāSū. 21. 15; सत्त्वस्थाः सात्त्विकान् धर्मान् विष्णुप्रीतिकरान्छुभान् । कुर्वन्त्यनीहया नित्यं ते वै भागवताः स्मृताः SkandP. ii(7). 20. 59; vi. 234. 23; नियमः स्यादनीहा च शौचं तुष्टिस्तपस्तथा LiṅgaP. i. 8.30; यस्य धर्मार्थमीहा तस्यानीहा गरीयसी PadmP. v. 19. 252; SūktiRa. 165. 4; Subhāṣi. 3001; क्षान्त्या क्रोधो मृदुत्वेन मानो मायाजवेन च । लोभश्चानीहया जेयाः कषायाः YogŚā. 4. 23; अनीहैरिव (v.l. अनीहयैव Bhavnagar Ed.) नागेन्द्रैर्विधापिण्डोऽप्युपाददे PāṇḍaC. 12.237.

अनीहाकृत (anīhā–kṛta) *adj.* done without any desire अकर्मणः श्रेष्ठतमं कर्मानीहाकृतं तु यत् GaṇeP. ii. 139. 7.

अनीहादि (an–īhādi) *adj.* other than those (verbal bases) (belonging to the list) beginning with *īh-* व्यतिहारेऽनीहादिभ्यो ञः Siddha-He. v. 3.116 (Vṛtti ईहादिवर्जेभ्यो धातुभ्यः स्त्रियां ञः स्यात्)

अनीहामय (anīhā–maya) *adj.* full of dislike ईहानीहामयैरन्तर्या चिदावलिता मलैः । सा हि नोद्धर्तुं शक्ता YogVā. v. 34. 104.

अनीहार्थ (anīhārtha) *m.* wealth obtained without striving (for it) न हि संचयवान् कश्चिद् दृश्यते निरुपद्रवः । अतश्च धर्मिभिः पुंभिरनीहार्थः प्रशस्यते । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् MahāBhā. iii. 2.47 (BhārBhā-Dī. यदृच्छालब्धोऽर्थः)

अनीहालक्षण (anīhā–lakṣaṇa) *adj.* characterised by indifference इयत्कालं नागतः स्मो यतो हेतोः स किं ययौ । अनीहालक्षणः कापि यामो येनाथ चक्रिणम् TriṣaŚaPuC. i. 5.138.

अनीहित (an–īhita) *adj.* [*f.* -ā] **AI** not having desires मनस्यनीहिते शान्ते ··· न हि कश्चित् कृतैरर्थैः YogVā. ii. 19.25; निर्भावं निरहंकारं निर्मनस्कमनीहितम् । केवलं स्पन्दशुद्धात्मन्येव तिष्ठति ते वपुः YogVā. v. 35. 78; **AII** in which there is no desire (for fruit) अनीहितासौ सविशेषविधावेवं समस्तं क्षमयेत कर्म NayaMañ. IV. i. 12.22; **BI** not wished for, not desired इदमीहितमिदमनीहितमित्यात्मानं न स्पृशन्ति विकल्पाः YogVā. iv .37. 11; **BII** not sought after एते व्यापारा नियतयः स्वभावा अनीहिताः TātpaVṛ. 57. 15 (*on* 1. 44) [displeasing, MW.; *n.* disinclination, apathy, MW.]

अनीहितभेद (anīhita–bheda) *adj.* in which distinction is not desired (i. e. not differentiating) जनयसि मनसि किमिति गुरुखेदम् । शृणु मम वचनमनीहितभेदम् GītGo. ix. 18. 6.

अनीहिताकारा (anīhitākārā) *adj.* (*f.*) having the form of aversion ईहितानीहिताकाराः कलनामृगतृष्णिकाः । सत्यावबोधमेघेन यस्य शान्ताः स जीवति YogVā. v. 34. 110.

अनु (ánu) *ind.* (also *adn.*, or *adv.* or *prvb.*) [GRASSMANN; AltGr. I. 322; II. 1.258; 272; 282; 308; 312; MAYR.; accent PhiṭSū. 81-82; VājaPrāti. 6. 8; 6.24; sometimes *nu* in Vedic language AltGr. II. 1. 73; listed in *cādigaṇa* GaṇPā. 85. 118; listed in *prādigaṇa* GaṇPā. 154. 5; CāndraVṛ. *on* i. 1. 109; also Gaṇasūtra *on* P. v. 4. 107; MugdhaBo. 6. 65(62. 3)] **1A** as a *karmapravacanīya* or *adn.* governs the Acc. case (P. i. 4.90; MugdhaBo. 5.7 (47.8-9)); but in some instances the Abl. or Gen. case also; meanings as stated in the grammatical works — *lakṣaṇa*, *cihna* 'sign, indication, in the direction of, towards' P. i. 4.84; JaineVyā. i. 4. 2; CāndraVyā. ii. 1. 56; Siddha-He. ii. 2.36; *itthaṃbhūtākhyāna* 'statement of attitude, towards' P. i. 4.90; JaineVyā. i. 4.11; SiddhaHe. ii. 2.36; *bhāga* 'share, falling to one's share' P. i. 4. 90; JaineVyā. i. 4.12; SiddhaHe. ii. 2. 37; *vīpsā* 'pervasion, in each and every case' P. i. 4.90; JaineVyā. i. 4.11; SiddhaHe. ii. 2. 36; MugdhaBo. 5.7 (47.10-11); *tṛtīyārtha* or *sahārtha* 'along with' P. i. 4.85; JaineVyā. i. 4. 14; CāndraVyā. ii. 1.57; SiddhaHe. ii. 2. 38; MugdhaBo. 5.7 (47. 11); *hetu* 'on account of, because of' Vār. 2 *on* P. i. 4. 84; JaineVyā. i. 4.13; *hīna* 'inferior to (in rank)' P. i. 4.86; JaineVyā. i. 4.15; CāndraVyā. ii. 1.58; MugdhaBo. 5.7 (47.11); **1BI** as first member of an *avyayībhāva* or adverbial Cpd. (अनुवनम्) अनुर्यत्समया P. ii. 1. 15; JaineVyā. i. 3. 12; CāndraVyā. ii. 2. 9; (अनुगङ्गम्) यस्य चायामः P. ii. 1. 16; ŚākaṭāVyā. ii. 1.13; **1BII** causes a change (addition of *a*) at the end of a Cpd. (अन्वक्षम्) Gaṇasūtra *on* v. 4.107; JaineVyā. iv. 2. 109; ŚākaṭāVyā. ii. 1. 150; SiddhaHe. vii. 3. 87; SaraKaṇṭhā.(Gr.) v. 4.123; MugdhaBo. 6.65 (62. 3); **2** as an adverb, when not governing a noun or not combined with a verb or verbative in a single unit; **3** as an *upasarga* or preverb *anu* will be treated under the separate entries along with the verbal base and verbal derivatives etc.; in connection with the particular verbs **3AI** requires P. (prohibiting Ā.) for the desiderative forms of the verbal base *jñā-* नानोर्ज्ञः P. i. 3. 58; JaineVyā. i. 2.54; **3AII** requires P for the verbal base *kṛ-* अनुपराभ्यां कृञः P. i. 3. 79; CāndraVyā. i. 4. 131; ŚākaṭāVyā. i. 4. 72; SiddhaHe. iii. 3.101; **3BI** requires Ā. for the verbal base *krīḍ-* क्रीडोऽनुसंपरिभ्यश्च P. i. 3. 21; JaineVyā. i. 2.15; CāndraVyā. i. 4. 58; ŚākaṭāVyā. i. 4. 11; SiddhaHe. iii. 3.34; MugdhaBo. 23.4 (135.14); **3BII** requires Ā. for the verbal base *vad-* (intra.) अनोरकर्मकात् P. i. 3.49; JaineVyā. i. 2.45; CāndraVyā. i. 4. 94; ŚākaṭāVyā. i. 4.54; SiddhaHe. iii. 3.81; MugdhaBo. 23.40 (139.7); **3CI** when followed by *gṛ-* VIII. P. governs the dative अनुप्रतिगृणश्च P. i. 4. 41; ŚākaṭāVyā. i. 3. 145; SiddhaHe. ii. 2. 57; SaraKaṇṭhā.(Gr.) i. 1.64; **3CII** causes transitivization of the verbal base *vas-* उपान्वध्याङ्वसः P. i. 4.48; JaineVyā. i. 2. 118; ŚākaṭāVyā. i. 3.123; SiddhaHe. ii. 2. 21; SaraKaṇṭhā.(Gr.) i. 1.49; **3CIII** prohibits the pass. aor. marker III. per. sg. (reflexive passive) when followed by the verbal base *tap-* तपोऽनुतापे च P. iii. 1. 65; CāndraVyā. i. 1. 79; SaraKaṇṭhā.(Gr.) i. 3. 102; **3DI** referred to as *upapada* 'accompanying word' (अनुज etc.) अनौ कर्मणि P. iii. 2. 100; ŚākaṭāVyā. iv. 3. 197; SiddhaHe. v. 1. 168; SaraKaṇṭhā.(Gr.) i. 4. 132; **3DII** causes a *kṛt* formation with *rudh-* (अनुरोधिन्) संपृचानुरुध° ··· °अभ्याहनश्च P. iii. 2. 142; SiddhaHe. v. 2.63; **3DIII** causes *kṛt* formation with *vad-* (अनुवादिन्) SiddhaHe. v. 2.58; **3DIV** causes *kṛt* formation optionally with *bhū-* (अनुभव and अनुभाव) व्यनुभ्येषु च भुवः SaraKaṇṭhā.(Gr.) ii. 4. 36; **3DV** has its final vowel lengthened with *dā-* before the participle *tta* (अनूत्त) निविस्वन्ववात् ŚākaṭāVyā. iv. 2.115; SiddhaHe. iv. 4.8; **3E** causes a *taddhita* formation (अनुक) अनुकाभिकाभीकः कमिता P. v. 2. 74; ŚākaṭāVyā. iii. 3. 105; SiddhaHe. vii. 1. 188; **3F** as the first

अनुकम्प्यत्वाभिप्राय (anukampyatvābhiprāya) *m.* [Inst.] with the intention of being fit to be pitied कुत्सिता ··· निन्द्या सुत्प्रीतिर्येषां ते कुमुदो वैधयिकाः। अत एव तेषामनुकम्प्यत्वाभिप्रायेण कृपणे कुमुदे कुमुदिति शाश्वतः LalitāSaBh. 107.5 (*on* 138)

अनुकम्प्यमान (anu-kampyamāna) *adj.* [*f.* -ā] **I** being favoured, being shown pity उपरताप्यनुरता महासेनपुत्री एवमनुकम्प्यमानार्यपुत्रेण SvapnaVā. 6.9(7); रामः ··· हटवनपवनैरनुकम्प्यमानः पम्पामभजद् RāmāCam. 3.43(9); **II** (the word expressive of the object) being pitied on (नीतौ च तद्युक्तात्) पूर्वेणाप्रत्यासत्त्वानुकम्पासंबन्धादनुकम्प्यमानादेव प्रत्ययो विहितः KāśīVṛ. *on* v. 3.77; Nyās. ii. 131.19 (*on* v. 3.77); पूर्वत्रानुकम्प्यमानादेव प्रत्ययः इह तु व्यवहितादपि Prasā. i. 931.5; पूर्वेणानुकम्प्यमानात् प्रत्ययः। अनेन तु परंपरासंबन्धेऽपीति विशेषः SiddhāKau. 315B.4 (*on* v. 3.77)

अनुकम्प्यमानता (anukampyamāna-tā) *f.* the state of being one who is being sympathized with दैवइतिके इति शब्देन लब्धायां नियत्युपाधौ सर्वथैवानुकम्प्यमानतायां सहकारसंवर्धननिबन्धनत्वमेवास्याः कला द्योतते SaraKaṇṭhā. 718.8.

अनुकम्प्यमानसंबन्ध (anukampyamāna-sambandha) *m.* connection with one who is being favoured अनुकम्प्यमोदनदानेनाराधयतीति धात्वादेरनुकम्प्यमानसंबन्धादनुकम्पायुक्तत्वमिति बोध्यम् LaŚabdeŚe. ii. 377.3.

अनुकम्प्यानुग्रह (anukampyānugraha) *m.* favour to one who is worthy of compassion यादृशोऽतिथिभोजनादुत्कृष्टो धर्मः अनुकम्प्यानुग्रहात्र तादृशस्ततो निकृष्टः ManuBh. i. 254.19 (*on* 3.102)

अनुकम्प्याभाव (anukampyābhāva) *m.* absence of those fit to be sympathised with अनुकम्प्याभावाद् नानुकम्पा संभवति NyāyRa. 652.29 (*on* 5(15).51)

अनुकम्प्र (anu-kampra) *adj.* [P. iii. 2.167] who habitually shows compassion; cf. अनुकम्प्रता.

अनुकम्प्रता (anukampra-tā) *f.* the state of being one who habitually shows compassion स्वः प्रपद्योत्कतयानुकम्प्रताम्।··· पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव NaiṣC. 1.126; सुरापराधस्तव वा कियानयं स्वयंवरायानुकम्प्रता मयि NaiṣC. 9.153.

अनुकर (anukar-á) *adj.* [P. iii. 2.20; Dhātu. 66] who helps, helper अघशंसदुःशंसाभ्यां करेणानुकरेण च। यक्ष्मं च सर्वं तेनेतो मृत्युं च निरजामसि AV. xii. 2.2; AV.(P.) xvii. 30.2.

अनुकरण (anu-karaṇa) *n.* **AI** (word or expression uttered in) imitation (of another sound), onomatopoeia अनुकरणं चानितिपरम् P. i. 4.62; SaraKaṇṭhā.(Gr.) i. 1.141; अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच् P. v. 4.57; SaraKaṇṭhā.(Gr.) v. 4.70; अव्यक्तानुकरणस्यात इतौ P. vi. 1.98; लकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः Vār. 1 (*on* ŚivSū.(Gr.) 2); अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु Vār. 3 (*on* ŚivSū.(Gr.) 2); अनुकरणस्येतिकरणपरत्वप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः Vār. 1 *on* P. i. 4.62; 1 *on* P. i. 4.80; तस्यानुकरणं ब्राह्मण्यलक इत्याह MahāBh. i. 19.22 (*on* ŚivSū.(Gr.) 2); अनुकरणं हि शिष्टस्य साधु भवति MahāBh. i. 20.15 (*on* ŚivSū.(Gr.) 2); प्रकृतिवदनुकरणं भवति MahāBh. i. 21.7 (*on* ŚivSū.(Gr.) 2); SaraKaṇṭhā.(Gr.) i. 2.53; PariVṛ.(Nī.) 11.17; अथवाकारान्तमेतदनु-

करणम् MahāBh. iii. 77. 8 (*on* vi. 1.99); i. 283.9 (*on* i. 3.48); भनिता-वनुकरणम् JaineVyā. i. 2. 133; अनुकरणम् CāndraVyā. ii. 2.26; झंकार-स्यानुगीतैरनुकरणमिवारभ्यते भृङ्गसार्थैः Ratnā. 1.18; यथानुकरणे ह्रस्व लकारोऽस्ति तथा दीर्घोऽप्यस्तीति मतम् KātanVṛ. *on* i. 1.2; *on* iv. 6.55; डाच्प्रत्ययानुकरणं च ति ŚākaṭāVyā. i. 1.26; (वृत्तिम्) परपाभिधायिवचनादनुकरणाच्चापरत्र नो परुपाम्। रचयेत् Kāvyālaṅ.(Ru.) 2. 28; Nyās. i. 65.26 (*on* i. 1.16); शब्दस्य तादृग्येणाभिधानमनुकरणम् ŚṛṅgāPra. 20.12; 38. 1; या ... असाधुता। निरूपितानुकरणे गुणत्वं सा प्रपद्यते SaraKaṇṭhā. 87.11; 149.4; समासानुकरण-निपाताश्च SaraKaṇṭhā.(Gr.) i. 1.7; v. 4.70; अदुष्टता। (अ)नुकरणे तु सर्वेषाम् KāvyPra. 412.1; 'न दोषोऽनुकरणे' इति वक्ष्यमाणत्वात् ... अत्र न दोषः Kāvyānu.(He.) 164.9; 232.2; Kāvyānu.(Vā.) 20.13; द्विविधमनुकरणम् PariVṛ.(Sī.) 37.7; अनुकरणम्!...एषामव्ययानाम् ... गतिसंज्ञा ज्ञेया PrakriKau. i. 517.1; अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् Prasā. i. 81 19; i. 517. 8; i 952. 13; ii. 108.6; ii. 549.18; ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात् SiddhāKau. 21B. 2 (*on* vi. 1.98); 67B. 1 (*on* vi. 4.6); पटदिति कुर्विल्याद्यनुकरणस्थलेऽनुकार्यध्वनीनामनुकरणाद् भेदः VaiyāBhū. 126.4 (*on* 26); 'शं नो देव्येति' रेफं विहायानुकरणम् BālamBha. i. 510.19 (*on* 1.230); अनुकरणमिदं ध्वनेः BālamBha. ii. 121.16 (*on* 2. 113); प्रपरेत्यादावनुकार्यानुकरणयोरभेदविवक्षया सुबनुत्पत्तिः LaŚabdeŚe. i. 45. 3; **AI** repetition or imitation किम् ... तदध्यापनम्, आहोस्विन्नृत्योपदेशवद् गृहीतस्यानुकरणमध्यापनमिति NyāyBh. 138. 10 (*on* ii. 2.28); **BI** following (behaviour, action, quality etc.) त्वदीयमुचरितैकदेशस्यानुकरणं किलैतत् MudrāRā 7.4(2); दन्तानां निपेक° ... °दुर्बलताः ... मातापित्रोरनुकरणात् ... इत्याचक्षते महर्षयः KāśyaS. 12A. 35; अनुकरणमनुकृतिः BrahmSūBh.(Śaṅ.) 181.16 (*on* i. 3.22); BrahmSūBh.(Bhā.) 59.9 (*on* i. 3.22); (नायकस्य) व्रतं नियमं स्वयमनुकरणेनानुवर्तेत भक्तिख्यापनार्थम् JayaMa. 237.15 (*on* 4.1); इदम् ... कुलभवनमाद्यं रतिपतेर्निवासश्चित्राणामनुकरणमेकं जलमुचाम्। ... न केषामत्यर्थं भवति नयनानन्दजननम् SamarāSū. 31. 148; अनुकरणादर्थवादवचनमुपपद्यते SaṅkarKāBh. 186.10 (*on* iv. 2.1); तस्य दहराकाशस्य नित्याविर्भूततद्गुणाष्टकस्य आविर्भूतापहतपाप्मत्वादिवत्तयानुकरणात् दहरः परमात्मैव VedāntKau. 94.24 (*on* i. 3.22); अथोद्दीपनाः ... राजदेवावताराद्विचेष्टानुकरणादयः BhaktiRaSi. iii. 3.28; सूर्योदयादिवत् किल नैषां गुप्ता मवेदसौ चेष्टा। अनुकरणे च निरर्गलमेतस्याः सर्वलोके स्यात् KandaCū. v. 5.3; तत्र भगवतो जीवसाम्येऽन्तःकरणेन्द्रियधर्माः प्राप्नुवन्तीति तत्रानुकरणमाह। ध्यायतीव लेलायतीवेति AnuBh. 98.7 (*on* i. 3.42); दहरस्य ... जीवेनानुकरणात् तस्मादितरः सः GoviBh. 49.6 (*on* i. 3.22); **BII** representation or portrayal by acting प्रकृतिविशेषावस्थाप्रतिपादकवेषरचनसामग्र्या। अनुकरणमभ्यतितं सिद्धिद्वयसंपदा धाराम् KuṭṭaMa. 945; त्रैलोक्यस्यानुकरणं नृत्ते देवि प्रतिष्ठितम् ViṣṇuDhaP. iii. 34.17; अन्ये तु नटनीयमनुकरणं दशरूपकमेव नाट्यम्। तस्येदं शास्त्रम् AbhinBhā. i. 5.11 (*on* 1.1); अथ पश्चात् करणमनुकरणं तल्लोकेऽप्यनुकरणात्मतातिप्रसक्ता AbhinBhā. i. 275.18 (*on* 6.31); Kāvyānu.(He.) 72.15; किं नाट्यम्। नाट्यमनुकरणम् NāṭaLaRaK. 266; **BIII** compliance, consent ओम् इत्येतत् अनुकृतिः अनुकरणम् TaiUBh. 209.2 (*on* 1.8); **BIV** mimicry शृङ्गारस्यानुकरणं हास्य इत्यभिधीयते BhāvPra.(Śā.) 55.10(3); **C** coming after in a cyclic order तेषां जननमरणसंततेरनुकरणमिदमुच्यते ChāndoUBh. 308 14 (*on* v. 10.8); [ŚabdaRa.(Vā.) 3421 has *anuhāra* as a synonym of *anukaraṇa* and KośaKaTa. 2. 7143 gives it as the meaning of *gaulomi*]; *m.* imitation कथं प्रातिपदिकसंज्ञा। ... ननु चाधातुरिति प्रतिषेधः प्राप्नोति। नैष धातुर्धातोरेषोऽनुकरणः [sic.] यथनुकरण इयङादेशो न प्राप्नोति MahāBh. iii. 408.3 (*on* viii. 2.46); *adj.* one who imitates पक्वो विकत्थनः। अनुकरण इत्यन्ये GaṇRa. 1.32(63)

अनुकरणकाल (anukaraṇa-kāla) *m.* [Loc.] at the time of imitation (of an expression or word) शब्दोऽनुकरणकाले अर्थं जहाति न रूपम् PariVṛ.(Sī.) 20.11.

अनुकरणक्रिया (anukaraṇa-kriyā) *f.* act of imitation अभिमन्युरर्जुनतः प्रतीति ... अत्रानुकरणक्रियाजनितः संबन्धविशेषः ... प्रतिना द्योत्यते Nyās. i. 321.8 (*on* i. 4.92)

अनुकरणता (anukaraṇa-tā) *f.* the nature of being a representation नटगतं किं तदुपलब्धं सदनुकरणतया भातीति चिन्त्यम् AbhinBhā. i. 274.6 (*on* 6.31)

अनुकरणत्व (anukaraṇa-tva) *n.* the state of being an imitation अत्र हुं हु म म मेत्यसाध्वोरपि म्लिष्टम्लेच्छितयोरनुकरणत्वादुपात्वम् SaraKaṇṭhā. 87.15; PradI. i. 105B.7 (*on* ŚivSū.(Gr.) 2); क्षीप्रभृतयश्च शब्दा अनुकरणस्वेनाभातवः PariVṛ.(Sī.) 37.22; मतुबर्थे छः स्यात्...। अनुकरणत्वाद्भिन्नपदादपि PrakriKau. i. 880.4; अनुकरणत्वेन सौत्रत्वाच्च वर्णेभ्यो न विभक्त्युत्पत्तिः LaŚabdeŚe. i. 5.1.

अनुकरणदशा (anukaraṇa-daśā) *f.* [Loc.] at the stage (i.e. time) of imitation इह ... शब्दस्य स्वार्थो हि स्वप्रतीतौ संबन्धग्रहणमपेक्षते ... अनुकरणदशायाम् (अर्थप्रतीतेः) अभावात् PadMañ. *on* KāśiVṛ. *on* P. i. 1.68.

अनुकरणनिपुण (anukaraṇa-nipuṇa) *adj* skilful in resembling वेगाकृष्टोद्धचक्रानुकरणनिपुणश्वेतडिण्डीरम्व(? ख)ण्डाछिद्योर्मीनिर्मितोर्वीवलयविलयना-शङ्कसातङ्कदेवा। विभ्रश्यन्त्यभ्रगङ्गा ... निलिम्पे Jīvān. 444.2

अनुकरणप्रतिषेध (anukaraṇa-pratiṣedha) *m.* prohibition of imitation उपहासबुद्धयायमनुकरणप्रतिषेधः ManuBh. i. 181.6 (*on* 2.199)

अनुकरणप्रत्यायित (anukaraṇa-pratyāyita) *adj.* made known through imitation (of word) असावामोऽस्मिन्नस्तीत्युक्तेऽनुकरणप्रत्यायितस्यानुकार्यस्यैव शब्दस्य प्रथमाप्रसर्थत्वमस्ति Nyās. ii. 81.22 (*on* v. 2.59)

अनुकरणप्राप्ति (anukaraṇa-prāpti) *f.* possibility of the replica कारयेत् पृथिवीम् ... नानापर्वतान्वितानुकारप्रसङ्गे नर्यादापर्वतवतीमिति तथा सति मेरोरनुकरणप्राप्तौ मध्ये मेरुसमन्विताम् CaturCin. i. 294.19.

अनुकरणभङ्गी (anukaraṇa-bhaṅgī) *f.* manner of doing (something) by following (something else) ददातीति पितृतीर्थेन ददतो हस्तस्यानुकृतिः प्रदर्श्यते। ... अर्थवादेऽनुकरणभङ्ग्यैव देवमनुष्यपितृतीर्थानां देवादिप्रतिनियतहोमोद्धरणदानसंबन्धप्रतिपादनात् CaturCin. iii(1). 1433. 7.

अनुकरणभाव (anukaraṇa-bhāva) *m.* nature of imitation (of expression) (वाक्यम्) अनुकरणभावम् ... स्वरूपतो गच्छन्(?त)। न भवति दुष्टम् Kāvyālaṅ.(Ru.) 6.47.

अनुकरणभूतशब्द (anukaraṇabhūta-śabda) *m.* the word which is an imitation सर्वत्र ह्यनुकरणभूतशब्दः शब्दस्वरूपस्यैवानुकरणम् Nyās. i. 765.19 (*on* iii. 4.60)

अनुकरणमन्त्र (anukaraṇa-mantra) *m.* **I** *mantra* (recited) subsequent to the performance जपोऽनुकरणमन्त्रः KāśiVṛ. *on* i. 2. 34; **II** *mantra* which is not clearly or distinctly uttered जपोऽनुकरणमन्त्र इति। जप इत्युक्तेरर्थकथनमनुकरणमन्त्र इति। ... सर्वत्र मन्त्रे(?ऽ) स्फुटमुच्चारणमित्यनुकरणमन्त्रः Nyās. i. 175.6 (*on* i. 2.34)

अनुकरणमात्रत्व (anukaraṇamātra-tva) *n.* the state of being mere imitation 'अहं बहु स्यां प्रजायेये' ति ह्यहंकारपूर्विकैव सृष्टिः श्रूयते। तत्राहंशब्दस्यानुकरणमात्रत्वे प्रमाणाभाव इति SāṁkhyaPraBh. 162.13 (*on* 6.61)

अनुकरणमात्रपरता (anukaraṇamātrapara-tā) *f.* the state of being intent on mere imitation or representation नटस्यानुकरणमात्रपरतया नैव रसाश्रययोग्यता PratāYaBhū. 288.1.

अनुकरणरूप (anukaraṇa-rūpa) *adj.* of the form or nature of imitation or representation अनुव्यवसायात्मकं कीर्तनम् ... नाट्यम्। न त्वनुकरणरूपम् AbhinBhā. i. 37.24 (*on* 1.107); अनुकरणरूपो रस इति यदुच्यते तत्किं समाजप्रतीत्यभिप्रायेण उत नटाभिप्रायेण AbhinBhā. i. 274.1 (*on* 6.31); Kāvyānu.(He.) 70.28.

अनुकरणरूपत्व (anukaraṇarūpa-tva) *n.* the state of being of the form of imitation or representation अनुकरणरूपत्वादेव च नामान्तरेण व्यपदिष्टो रसः AbhinBhā. i. 272.23 (*on* 6.31); Kāvyānu.(He.) 70.3.

अनुकरणवाद (anukaraṇa-vāda) *m.* theory of imitation or representation न हि सामाजिकोऽनुकार्यानुकर्तृविभागमवैति। दूषितः स्वा(तथा)नुकरणवादः AbhinBhā. i. 292.15 (*on* 6.34)

अनुकरणविषय (anukaraṇa-viṣaya) *m.* [Loc.] in the domain of imitation (of a sound) अनुकरणविषये निरर्थकादयः शब्दार्थदोषा न भवन्ति Kāvyānu.(He.) 232.3.

अनुकरणव्यवहार (anukaraṇa-vyavahāra) *m.* usage as *anukaraṇa* (i. e. indistinct utterance) यद्यपि स एव मन्त्र उच्चार्यते, तथापि वर्णाभिव्यक्त्यनभिव्यक्तिभ्यां भेदपरिकल्पनयानुकरणव्यवहारः PadMañ. *on* KāśiVṛ. *on* P. i. 2. 34.

अनुकरणशब्द (anukaraṇa-śabda) *m.* word or expression uttered in imitation अयं खल्वपि भूयोऽनुकरणशब्दोऽपरिहार्यो यदर्थ उपदेशः कर्तव्यः MahāBh. i. 21.3 (*on* ŚivSū.(Gr.) 2); अनुकरणशब्दः क्रियार्थैः सुबन्तैरेकार्थो भवति CāndraVṛ. *on* ii. 2.26; अनुकरणशब्दानां स्वरूपार्थत्वान्नैवेयं विभक्तिः CāndraVṛ. *on* iv. 2.153; अनुकरणशब्दा ह्यर्थं जहति। न तु स्वरूपम् Nyās. i. 129.6 (*on* i. 1.68); त एवोपचारादकमिष्टशब्देनानुकरणशब्देनोच्यन्ते PradI. iii. 100B.20 (*on* iii. 1.48); उत्पादयन्ति ... अनुकरणशब्दाः प्रथमासमर्थाः स्वेनार्थेनानुकार्येण तद्धति छप्रत्ययमिति न कश्चिद्दोषः PradI. iv. 334B. 38 (*on* v. 2.59); टिरिटिरिद्धुरुदुर्विल्यनुकरणशब्दो तदाकारिणि व्यवहियेते GaṇRa. 2.104(149);

क्रीत्यादेरनुकरणशब्दस्य विभक्त्युत्पत्त्यर्थं प्रातिपदिकसंज्ञाभ्युपगमेऽपि धातुत्वाश्रयस्ये-यङादेशस्य करणम् PariVṛ.(Sī.) 36.21; नन्वेवमपि अनर्थकत्वादनुकरणशब्दस्य प्रातिपदिकसंज्ञा न प्राप्नोति PariVṛ.(Sī.) 38.6; VaiyāBhū. 131.16 (*on* 26); अव्यक्तो परिस्फुटवर्णो यः शब्दस्तस्य योऽनुकरणशब्दो ध्वनिसादृश्येन व्यक्तवर्ण एव तस्य ... एकादेशः स्यात् Prasā. i. 66.12; i. 880.9.

अनुकरणशब्दत्व (anukaraṇaśabda-tva) *n.* the state of being a word uttered in imitation अमहत्पूर्वेत्यत्र महच्छब्दस्यानुकरणशब्दत्वात् ... आत्वाभावः Pradī. iv. 31B.14 (*on* iv. 1.4)

अनुकरणशब्दार्थम् (anukaraṇaśabdārtham) *adv.* for the sake of words uttered in imitation सर्वं नाम धातुजमित्यत्रापि पक्षेऽव्ययार्थमनुकरण-शब्दार्थं च सूत्रमारभ्यमेव PadMañ. *on* KāśiVṛ. *on* P. i. 2.45.

अनुकरणश्रवण (anukaraṇa-śravaṇa) *n.* Upaniṣadic statement of resemblance तस्य दहराकाशस्य परज्योतिषोऽनुकरणश्रवणाच्च जीवस्य, न जीवो दहराकाशः VedāntSā.(Rā.) 98.1 (*on* i. 3.21)

अनुकरणस्थल (anukaraṇa-sthala) *n.* [Loc.] in the case of imitation (of sounds) पटदिति कुर्विलायनुकरणस्थलेऽनुकार्यध्वनीनामनुकरणाद् भेदो ध्वनिमयत्ववर्णमयत्वादिविरुद्धधर्मवत्त्वसिद्धः VaiyāBhū. 126.3 (*on* 26)

अनुकरणाकृति (anukaraṇākṛti) *f.* generic feature of imitation (of a sound) इहापि तर्ह्यनुकरणाकृतिर्निर्दिश्यते MahāBh. i. 343.22 (*on* i. 4.62); अनिताविति वक्तव्ये परग्रहणं तु अनुकरणाकृतावनितिपरत्वविवक्षार्थम् LaŚabdeŚe. ii. 56.1.

अनुकरणात्मता (anukaraṇātma-tā) *f.* the state of being that which has the nature of imitation or representation अथ पश्चात्करणमनुकरणं तल्लोकेऽप्यनुकरणात्मतातिप्रसक्ता AbhinBhā. i. 275.19 (*on* 6.31); Kāvyānu. (He.) 72.15.

अनुकरणादि (anukaraṇādi) *adj.* imitation (of words) etc. पदाद्या-श्रितदोषाणां ये चानुकरणादिषु । गुणत्वापत्तये नित्यं तेऽत्र दोषगुणाः स्मृताः Sara-Kaṇṭhā. 87.6; तत्र तत्राभिधातव्ये तथानुकरणादिषु । उन्मत्ताद्यभिधानेषु कोऽपि दोषो न विद्यते AlaṅkāŚe. 9.6.

अनुकरणार्थत्व (anukaraṇārtha-tva) *n.* the state of being meant for the sake of imitation (of words) भाष्यकारस्त्वनुकरणार्थत्वं समर्थयते (लकारोपदेशस्य) Pradī. i. 105B.3 (*on* ŚivSū.(Gr.) 2)

अनुकरणावश्यकत्व (anukaraṇāvaśyaka-tva) *n.* the state of being required for the sake of imitation (i. e. inclusion or listing of items) बोधकमहासंज्ञया सर्वार्थोपस्थापकसर्वादीनामनुकरणावश्यकत्वेनेतरेषामनुकरणे मानाभावः LaŚabdeŚe. i. 220.2; तादृशमहासंज्ञाकरणात्तादृशार्थानां गणेऽनुकरणावश्यकत्वे इतरेषामनुकरणे मानाभावेन समुदायस्य नाव्ययत्वम् LaŚabdeŚe. i. 363.5.

अनुकरणीय (anu-karaṇīya) *adj.* 1 to be followed सर्व(त्रा ? ना)ग-रिकानुकरणीयलीलासौष्ठवः ... रणमल्लसेनापतिकुमारः ... अब्रवीत् AvantiKa. 13.18; II to be represented or portrayed by acting विभावैर्जनितोऽनुभावैः प्रतीति-पदं नीतो व्यभिचारिभिरुपचितो मुख्यवृत्त्यानुकरणीये रामे तद्रूपतानुसंधानादनुकर्तरि प्रतीयमानः स्थायी रसः Kāvyānu.(He.) 68.21.

अनुकरणीयता (anukaraṇīya-tā) *f.* the state of being fit to be imitated (गायनैर्गायते शुष्कम्) यच्छन्दो निपातः ... तेन यत्र काव्ये प्रयोगे वा शुष्कमित्यनुकरणीयतया शून्यं गायनैरिति न तु पात्रैः AbhinBhā. iii. 67.25 (*on* 19.121)

अनुकरणोद्युक्ता (anukaraṇodyuktā) *adj.* (*f.*) striving to imitate तसे हंस न गीतिरत्र सरसा सा कान्तसीमन्तिनीलीलाचङ्क्रमणक्रमानुकरणोद्युक्ता च युक्ता गतिः AnyoMuLa. 101.

अनुकरशीतमुख (anukara-śītamukha) [grammar and meaning ?] अनुकरशीतमुख इव भैरवता(? तां) वहता बहुबाहुषण्ड परिपुञ्जनया नूपुरन् । अजनि परस्परान्वयविधिर्जगदाक्रमणप्रवणमहोदयेन तमसा नु तदा ककुभाम् Kapphiṇā. 11.32.

अनुकर्णम् (anukarṇam) *adv.* 1A behind the ear संतप्तस्तपनमरीचिभिः ...। क्षुण्णोऽपि भ्रमरगणः स्थितोऽनुकर्णं छाया यत्पदमपि सा वरं न तूष्णम् RāghPāṇ. (Dha.) 14.18 (comm. कर्णपश्चाद्भागे); 1B upto the ear विना कर्णेन तेन स्त्रीनेत्राणां न रतिः कचित् । इतीव जज्ञिरे तेषामनुकर्णं प्रवृत्तयः PrabaCin. 55.7; 2 towards the king Karṇa, PrabaCin. 55.7.

अनुकर्तव्य (anu-kartavya) *adj.* to be imitated or followed यतो यच्छति भूतानि सर्वाण्येवाविशेषतः । तस्य राज्ञानुकर्तव्यं यन्तव्या विधिवत्प्रजाः MahāBhā. xii. 92.40; प्रयोगादनुकर्तव्यो विस्तरो ह्यतिविस्तरः । देशेषु देशेषु ViṣṇuDhaP. iii. 7.10.

अनुकर्तव्यरुत (anukartavya-ruta) *adj.* whose (sweet) sounds are to be imitated पारावतपरभृतशुकमधुकरहारीतहंसदात्यूहाः । अनुकर्तव्यरुताः KandaCū. ii. 7.8.

अनुकर्तुकाम (anukartu-kāma) *adj.* desirous of imitating नैकं तमः-स्तवकमूर्ध्वमपाकुथास्त्वम् एणं त्यजास्य विमले नयने गृहाण । लोलालकं तरलवीक्षित-मायताक्ष्याः साक्षान्मुखं यदि भवाननुकर्तुकामः SubhāRaK. 16.15; SūktiMu. 53.36.

अनुकर्तुम् (anu-kartum) *inf.* in order to imitate, to emulate or to follow न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि । अप्यायुषा वा कार्त्स्न्येन BhāgP. iii. 14.20; ज्ञानं वा तद्रूपविकलार्थसामर्थ्येनोत्पद्यमानं तद्रूपमनुकर्तुं युक्तम् HetuBiṬ. 97.28; स तदाभ्युदास वेलातटम् ... हरीशः । मैनाकमम्बुनिधिमग्नमिवानुस(v. l. क)र्तुं मेरुर्महीधरसहस्रशरीरमूलः RāmC. 25.47; उपजातकुतूहलो नीलकलपक्ष-माप(? पा)टलचञ्चुपुटमनुकर्तुमिव तस्य शुकविहङ्गस्याशेषम् ... अस्तगतो निनाय निज-मण्डलं चण्डभानुः TilaMañ. 330.7; भवतामपि युक्तं वैनतेयानुकूलं जीवितफलं तदनुकर्तुमिति श्रद्धा च जनयन्त्यात्मामपि तद्दर्शनेन गोष्ठीश्च प्रवर्तयेत् JayaMa. 60.3 (*on* 1.4); स्फुरदन्दुकलासदृशं तामनुकर्तुं कलयापि धाष्ट्र्यमेति । न रतिर्न शची NavaSāC. 5.24; लोके त्वत्सदृशी लक्ष्मीर्न श्रुता न विलोकिता । शक्यानुकर्तुं केनेन या न पूर्वैर्न चापरैः DaśāvaC. 5.138; तव मुखमनुकर्तुं तन्वि वाञ्छा द्वयोश्च SubhāRaK. 16.27; उषसि गुरुसमक्षं लज्जमाना मृगाक्षी रतिकृतमनुकर्तुं राजकीरे प्रवृत्ते । तिरयति SubhāRaK. 29.5; तनूजस्ते किं प्रश्नेनामुना प्रभो । वस्तु कश्चिद-तिक्रान्तं नानुकर्तुं क्षमोऽधुना RājTa.(Ka.) 4.406; तदन्तशोभामनुकर्तुमेषा नाभूद्यतो दाडिमबीजपङ्क्तिः । ... RāghPāṇ.(Ka.) 2.15; विष्णुम् । अनुकर्तुमयं च तद्दरीशः ... Yādavā. 15.53; समग्रविद्याविदुरैर्न नो गुरोस्तथानुकर्तुं चरितं प्रगल्भ्यते Garvā. 233; अनुमनेकम् ... स पश्यन् । विभवेन बिडौजसोऽनुकुर्वन्नपि नेत्रैरनुकर्तुमाहतोऽभूत् Acyutarā. 2.26; दिव्यं पयः क्षोणि-तलेऽवतार्य संस्कीर्ति तनिवानुकर्तुम् । भौमं रजो वाजिखुरप्रसूतं पताकिनी तस्य दिवं निनाय Gaṅgāva. 8.80; कन्यानिमित्तमनुकर्तुमनर्हमेषं मानः कथं बत सह त्रपयो-ज्झितव्यः JānaPa. 1.25.

अनुकर्तृ (anu-kartṛ) *adj.* 1A who follows, follower कर्ताहमनुकर्ता त्वं लोकानां स्थितिकारणे SkandP. v(1). 4.80; 1B accompanyist गीतस्यान्तेऽ-नुकर्तापि भागशश्चातुरीवशात् । निरन्तरैः पाणिघातैः समुदायानुकारिणम् । वादको दर्शयेद्यत्र यत्रैवं तं प्रचक्षते SaṅgīRa. iii. 264.3 (6.175); 2 who acts in imitation, actor तेन स्थाय्येव विभावानुभावादिभिरुपचितो रसः । स्थायी भवन्न-नुपचितः । स चोभयोरपि । मुख्यया वृत्त्या रामादौ अनुकार्येऽनुकर्तर्यपि चानुसंधान-बलात् AbhinBhā. i. 272.12 (*on* 6.31); i. 292.12 (*on* 6.34); i. 317.18 (*on* 6.62); अनुकर्तरि यः स्थाय्यवभासः ... स एव ... रसः Loc. 69.7 (*on* 2.4); Kāvyānu.(He.) 68.18; 3 who resembles (i. e. the individual soul) अतोऽनुकर्ता प्रजापतिवाक्ये निर्दिष्टोऽनुकार्यं ब्रह्म दहराकाशः BrahmSūBh.(Rā.) 308.18 (*on* i. 3.21); अनुकर्तुर्जीवादनुकार्यः परब्रह्मभूतो दहराकाशोऽर्थान्तरभूत एव VedāntDī. 53.1 (*on* i. 3.21); अनुकृतेश्चानुकर्ता जीवो नित्यनिर्मुक्तस्वरूपो दहरो न भवितुमर्हति VedāntPāSau. 94.20 (*on* i. 3.22); दहराकाशो जीवो न भवति जीवानुकार्यत्वात् अनुकर्त्रनुकार्ययोर्भेदावश्यंभावात् ŚivārkaMaDī. i. 10.21 (*on* i. 1.1); i. 11.9 (*on* i. 1.1); अनुकार्यानुकर्त्रोर्मिथोऽन्यत्वं तु सुसिद्धं 'पवनमनुहरते हनुमान्' इत्यादिषु GoviBh. 49.8 (*on* i. 3.22)

अनुकर्तृगत (anukartṛ-gata) *adj.* present in (the actor) who acts in imitation किमिदमनुकार्य(? गतं) कवेः शिक्षार्थमुपदिश्यते, तथानुकर्तृगतं नटस्य (वा) AbhinBhā. iii. 151.23 (*on* 22.3)

अनुकर्तृगतत्व (anukartṛgata-tva) *n.* the state of being present in (the actor) who acts in imitation अनुकर्तृगतत्वं चास्य (नटस्य) निरस्यति ... राघवादेः सत्यताम् । दर्शयन्नर्तको नैव रसस्यास्वादको भवेत् SāhiDa. 90.1.

अनुकर्तृस्थत्व (anukartṛstha-tva) *n.* the state of being present in (the actor) who acts in imitation अनुकर्तृस्थत्वेन लिङ्गबलतः प्रतीयमानः स्थायी भावो मुख्यरामादिगतस्थाय्यनुकरणरूपः AbhinBhā. i. 272.22 (*on* 6.31)

अनुकर्त्रनुकार्यभाव (anukartranukārya-bhāva) *m.* relation between that which resembles (i.e. the individual soul) and that with which it has resemblance (i.e. Brahman) दहराकाशो न जीवः । अनुकर्त्रनु-कार्यभावस्य भेदगर्भत्वात् ŚivārkaMaDī. i. 441.25 (*on* i. 3.21)

अनुकर्त्रालम्बना (anukartṛ-ālambanā) *adj.* (*f.*) depending upon (the actor) who acts in imitation स्थायिनि प्रतीतिगोचरतयास्वादरूपा प्रति-पत्तिरनुकर्त्रालम्बना नाट्यैकगामिनी रसः Loc. 69.4 (*on* 2.4)

अनुकर्मचेतस् (anukarma-cetas) *adj.* having the mind fixed on rituals भवांस्तु पुंसः परमस्य मायया ... हतात्मनस्त्वनुकर्मचेतसस्त्वनुग्रहं कर्तुमिहार्हसि प्रभो BhāgP. iv. 6.49.

अनुकर्मन् (anu-karman) *m.* name of a deity विश्वे चाग्निमुखा देवाः ... तेषां नामानि वक्ष्यामि ... अति(v.l. नु)कर्मा प्रतीतश्च MahāBhā. xiii. 91.36; *n.* renovation (of building) यथानुकर्म विज्ञेयं धाम्नां वा कालपाकतः । पतितं

स्खलितं जीर्णे प्रासादाङ्गं यदा भवेत् IśānŚiPa. ii. 35.1; [imitation, a subsequent rite or ceremony, MW., Apte]

अनुकर्मविधान (anukarma-vidhāna) *n.* undertaking of renovation इत्येवमुक्तमनुकर्मविधानमादौ IśānŚiPa. ii. 35. 121.

अनुकर्मविधि (anukarma-vidhi) *m.* rule regarding renovation (मयः) अनुकर्मविधिं तथा ।··· संक्षिप्याह यथाक्रमम् MayaMa. 1.10.

अनुकर्ष (anu-karṣa) *m.* 1 the bottom or axle-tree (of a carriage) अनुकर्षान्पताकांश्च तूणीरांश्च धनूंषि च । सर्वान् रथवरे कुर्याः MahāBhā. i. App. I. 114 (333); शराणामनुकर्षाणाम् ··· । राशयस्तत्र दृश्यन्ते MahāBhā iii. App. I. 26(5); अनुकर्षैः पताकाभिरुपासङ्गैर्ध्वजैरपि ।··· विबभौ मही MahāBhā. vi. 92.64; vi. 85.34; तस्यार्जुनिः ··· अनुकर्षं च सायकैः ।··· व्यधमत् MahāBhā. vii. 37.6; vii. 43.17; ततो विबुधशार्दूलाः ··· चक्रः ··· अनुकर्षान् महान्तीषान्वरूथं चापि तारकाः MahāBhā. viii. 24.70; कूबरं रथचक्राणि ईषा ···। युगं चैवानुकर्षं च शरभूतमभूत्तदा MahāBhā. ix. 13.7; सोपसङ्गानुकर्षाणां ध्वनिनां सवरूथिनाम् ।··· सहस्राणि दशैव तु HariVam. 432*(1); MatsyaP. 44.67; सवरूथः सानुकर्षः ··· शुक्रस्यापि रथो महान् ViṣṇuP. ii. 12.17; सूर्यरथस्याथ सन्निवेशं निबोधत ·· निमेषश्चानुकर्षोऽस्य VāyuP. i. 51.62; MatsyaP. 125.45; BrahmāṇḍP. i. 22.70; LiṅgaP. i. 72.9; ŚivaP. ii(5).8.12 (229B.7); [AmaK. 1582; AbhidhāCin. 757; AnekāSa. 357; Vaija. 115; 133; AnekāSam. 4.316; NānārthāSam. iii. 8.28; ViśvaPra. 173.28; DharK. 2653; MediK. 183.48; NānārthSam. 3.25; ViśvaLoK. 383.32; ParyāŚaRa. 986; ŚabdaRa.(Su.) 3.262; KośaKaTa. 1.6182; KalpaK. 104.138; ŚabdaRaSaK. 333.11]; 2 name of one of the fourteen modes of attacking the target by dragging it along प्रकर्षणाकर्षणाभ्यामभ्याकर्ष(v. l. अनुकर्ष)विकर्षणैः । आकर्षेतां तथान्योऽन्यम् MahāBhā. ii. 21.14; पर्याकर्षानुकर्षौ ··· एतानि वल्गितान्याहुश्चतुर्दश धनुर्विदः NītiPra. 4.18; 3A dragging along (a term from the preceding rule to the following rule) or enforcement (of a term from the preceding rule to the following) (often by the device of the particle *ca*) अतयसि ठंश्चेत्यनन्तरस्यानुकर्षः Vār. 1 *on* P. v. 1. 84; MahāBh. ii. 359.21 (*on* v. 1.84); चकारेण पुंलिङ्गपदस्याप्यनुकर्षात् BhaṭṭCan. 38.11 (*on* xiv. 1.5); 3B consideration or continuation (of the earlier topic or context) असन्नेव स भवति ··· इति चानुकर्षात् BrahmSūBh.(Bhā.) 27.7 (*on* i. 1.19); स एष इति ··· °निर्दिष्टस्यान्तः प्रविश्य प्रशासितृत्वेनानुकर्षात् BrahmSūBh.(Rā.) 364.10 (*on* i. 4.15); प्रशसाया अपि सार्थकत्वं पूर्वप्रश्नस्यैवानुकर्षे घटते PrakaVi. 334.24; ईडजनोर्ध्वे च [इत्यत्र ईशोऽप्यनुकर्षः PrakriKau. ii. 210.8; चकारेण ल्टोऽनुकर्ष इत्याह Prasā. ii. 447.15; श्रुतस्यानुकर्षो न तु श्रोष्यमाणस्येति पदशक्तिविसंवादात् DaṇḍaVi. 194.14; अत्रेत्युक्ते यतोऽप्यनुकर्षः संभाव्येत SiddhāKau. 254B.21 (*on* iv. 3.7); चेन 'इचि' इत्यनुकर्षः LaŚabdeŚe. i. 236.1; ii. 81.2; [Kośas give *anukarṣa* in the sense of *anukarṣaṇa* -- AnekāSa. 357; AnekāSam. 4.316; NānārthāSam. iii. 8.28; NānārthSam. 3.25; MediK. 183.48; DharK. 2653; ViśvaLoK. 383.32; ŚabdaRaSaK. 333.11; *anukarṣa* as one of the meanings of *iti* -- ViśvaPra. 173.28; DharK. 2899; MediK. 196.22; ViśvaLoK. 409.21]; *n.* arrears or backlog of unfulfilled nature or orders (such as payment of dues to the government अनुकर्षं च निष्कर्षं व्याधिपावकमूर्च्छनम् । सर्वमेव न तत्रासीदर्मनित्ये युधिष्ठिरे MahāBhā. ii. App. I. 4(8) (BhārBhāDī. अनुकर्षं दारिद्र्याद् राजकीयद्रव्यस्यातीतवर्षस्य ऋणत्वेन धारणम्) [attraction, invoking, summoning by incantation, delayed performance of a duty, lagging behind in a ceremony, MW., Apte.]

अनुकर्षक (anukarṣa-ka) *m.* the bottom or axle-tree of a chariot अधःस्थं दारु स्यादनुकर्षकः ŚabdaRa.(Vā.) 2645; *adj.* (anu-karṣaka) which draws along; cf. अनुकर्षकचकार.

अनुकर्षकचकार (anukarṣaka-cakāra) *m.* the particle *ca* which drags along or enforces (the item from the preceding rule to the following) विशेषासंप्रत्ययादित्यनुकर्षकचकारवैयर्थ्यापत्तिः LaŚabdeŚe. i. 91.9.

अनुकर्षण (anu-karṣaṇa) *n.* AI dragging along or enforcement (of the items from the previous rule to the following rule) दधस्तयोरनुकर्षणानर्थक्यं स्थानिवत्प्रतिषेधात् Vār. 1 *on* P. viii. 2.38; MahāBh. iii. 40.20 (*on* viii. 2.38); यत्र स्वरितत्वेनानुवृत्तौ सिद्धायां चकारेणानुकर्षणं क्रियते तत्रास्या व्यापारः PariVṛ.(Si.) 92.16; 141.5; तेन कर्तरि कृदिति सूत्रस्थकर्तुरनुकर्षणात् MayūMāli. 265.10 (*on* iii. 4.8); चकारेण लोटोऽनुकर्षणं प्रासकालार्थम् SiddhāKau. 476B.12 (*on* iii. 3.163); AII consideration or continuation (of the previous context) न तावद् ··· अतिवादित्वस्यैतदनुकर्षणमिति शक्यं वक्तुम् BrahmSūBh.(Śaṅ.) 156.1 (*on* i. 3.8); न पूर्वस्यैवोत्तरत्रानुकर्षणमिति चेत् न BrahmSūBh.(Śaṅ.) 237.10 (*on* i. 4.6); तस्मात 'येयं प्रेते' इत्यस्यैव प्रश्नस्यैतदनुकर्षणम् BrahmSūBh.(Śaṅ.) 238.17 (*on* i. 4.6); 246.14 (*on* i. 4.11); अपिशब्दो नित्यत्वज्ञापनार्थः । अहरहरित्यनुकर्षणात् BālaKrī. i. 43.22 (*on* 1.25); तदपि निषिद्धं चेत्यनुकर्षणात् TātpaṬ.(Vā.) 209.24 (*on* i. 1.9); तस्य प्राणमयस्यैष एव प्रकृतश्चिद्धातुः प्राणे च प्रतिबिम्बितः ··· इति प्रकृतस्यैव विशिष्टात्मनमात्मभूतस्यानुकर्षणात् PrakaVi. 115.21; महाप्रकरणमिति शङ्कनीयम् ··· अतिवादित्वस्यानुकर्षणेन तत्रापि प्राणप्रकरणानुवृत्त्यवसायात् ŚivārkaMaDī. i. 413.6 (*on* i. 3.7); न चानुकर्षणाकर्षणाभ्यां मुक्तस्य तत्प्राप्तिः GoviBh. 322.14 (*on* iv. 4.17); B dragging or pulling along (a thing) सुप्तं नाम निद्राभिभवः, इन्द्रियविषयोपगमनमोहनक्षितितलशयनप्रसारणानुकर्षणादिभिर्विभावैः समुत्पद्यते NāṭyaŚā. 7.114(2); C dragging in (of the senses) तत्रारण्योपभोगश्च तपोभिश्चानुकर्षणम् ··· इत्येषः ··· वानप्रस्थाश्रमः MārkP. 28.25; [Kośas give *anukarṣaṇa* as meaning of *anukarṣa*- AnekāSa. 357; AnekāSam. 4.316; ViśvaPra. 173.28; ŚabdaRaSaK. 333.11; DharK. 2653; ViśvaLoK. 383.32; NānārthSam. 3.25; NānārthāSam. iii. 8.28; MediK. 183.48; *anukarṣaṇa* in the sense of *caṣaka*, Vaija. 140.53; ŚabdaRaSaK. 122.12]

अनुकर्षणसामर्थ्य (anukarṣaṇa-sāmarthya) *n.* [Abl.] on the strength of enforcement (of the item by the particle *ca*) यो हि मन्यते अनुकर्षणसामर्थ्यान्मेऽत्र भवल्लोपे तेन प्रतिषेधो वक्तव्यः स्यात् MahāBh. iii. 404.23 (*on* viii. 2.38); तत्र चकारेणानुकर्षणसामर्थ्यादिक इत्येतदर्थपदार्थतामुत्सृज्य स्वरूपपदार्थतामनुभवति Nyās. i. 48.20 (*on* i. 1.5)

अनुकर्षणानर्थक्य (anukarṣaṇānarthakya) *n.* redundance of the enforcement (of the item by the particle *ca*) दधस्तयोरनुकर्षणानर्थक्यं स्थानिवत्प्रतिषेधात् Vār. 1 *on* P. viii. 2.38.

अनुकर्षणार्थ (anukarṣaṇārtha) *adj.* meant for the sake of dragging along or enforcement (of an item from the preceding rule or context to the following one) अन्यस्याः संज्ञाया वचनाच्चकारस्य चानुकर्षणार्थस्याकरणात्प्रकृताया वृद्धिसंज्ञाया गुणसंज्ञा बाधिका भविष्यति MahāBh. i. 44.11 (*on* i 1.3); चकारः कर्तव्यो विभाषेत्यनुकर्षणार्थः MahāBh. i. 295.16 (*on* i. 3.93); किमर्थश्चकारः । अनुकर्षणार्थः MahāBh. i. 408.22 (*on* ii. 2.4); i. 409.2 (*on* ii. 2.4); i. 457.12 (*on* ii. 3.32); अन्यस्य प्रत्ययस्य वचनाच्चकारस्य चानुकर्षणार्थस्याकरणात्प्रकृतस्य खनो दयतो बाधको भविष्यतः MahāBh. ii. 372.17 (*on* v. 2.4); नैवार्थोऽनुकर्षणार्थेन चकारेण नापि तयोर्ग्रहणेन MahāBh. iii. 405.3 (*on* viii. 2.38); चशब्दोऽकुशल इत्यनुकर्षणार्थः Sphuṭā. ii. 50.8 (*on* 2.29); चकारः श्वसोऽनुकर्षणार्थः KātanVṛ. *on* ii. 6.41; तदनुकर्षणार्थं चकारकरणमनर्थकं स्यात् Nyās. i. 48.22 (*on* i. 1.5); चकारोऽत्र क्रियते क्यचः अनुकर्षणार्थः Nyās. i. 498.21 (*on* iii. 1.9); चकारोऽप्यन्तवजेमित्यस्यानुकर्षणार्थः KāvyālaṅSū. v. 1.3; चकारः, पञ्चका इत्यनुकर्षणार्थः MṛtaSaṁ. 32.14 (*on* 3.47); चशब्दः ··· पूर्वस्य प्रामाण्यसंभावनाहेतोरर्थविभागवस्वस्यानुकर्षणार्थः TātpaṬ.(Vā.) 430.23 (*on* ii. 1.68); सांसिद्धिकं च द्रवत्वमम्भस्येवेति अनुकर्षणार्थः चकारः Kiraṇā. 70.12; 251.18; देवर्ष्यादिभेदेन पञ्चेत्यस्यानुकर्षणार्थश्चकारः TattvSaṁkhyā. 43.4; तथा चशब्दौ समुच्चयार्थौ । मानमित्यस्यानुकर्षणार्थौ वा NyāySu.(Ja.) 7A.10 (*on* i. 1.1); अविरुद्धमादावित्यस्यानुकर्षणार्थम् NyāySu.(Ja.) 230B.3 (*on* ii. 1.1); ज्ञापकम् ··· उक्तोऽनुकर्षणार्थं चकारकरणम् PariVṛ.(Si.) 140.23; किमपर्यन्तस्येत्यनुकर्षणार्थेन चकारेणेति PariVṛ.(Si.) 147.20; चकारो हि विसर्जनीय इत्यस्यानुकर्षणार्थः Prasā. i. 100.11; उत्तरसूत्रे चकारेण तस्यानुकर्षणार्थम् Prasā. i. 453.19; ii. 586.15; ii. 706.17; LaŚabdeŚe. i. 504.11.

अनुकर्षणीय (anu-karṣaṇīya) *adj.* (earlier context) to be considered or continued न च पुनः ··· प्राणविषयमतिवादित्वं परत्रानुकर्षणीयम् इति वाच्यम् GoviBh. 44.1 (*on* i. 3.8)

अनुकर्षत् (anu-karṣat) *adj.* I taking along with (i.e. leading) अनीकमनुकर्षतः । महान्दुर्योधनस्यासीन्नागो मणिमयो ध्वजः MahāBhā. vi. 17.25; अनुकर्षन् सर्वसेनां हस्त्यश्वरथसंकुलाम् VāyuP. ii. 36.105; अनुकर्षन्स वै सेनाम् BrahmāṇḍP. i. 31.78; ii. 73.105; LiṅgaP. i. 40.52; II dragging along वस्त्रमुत्तमम् । सलीलमनुकर्षन्तं विमुक्तं सक्तमङ्गदे Rāmā. v. 16.20.

अनुकर्षत्वपरिग्रह (anukarṣatva-parigraha) *m.* acceptance of the position of the axle-tree (of the chariot) तस्यानुकर्षत्वपरिग्रहेण ग्रहैरुपान्तक्षितिरालम्बे ŚrīKaC. 20.6.

अनुकर्षन् (anu-karṣan) *m.* the bottom or axle-tree (of a chariot) कुबरं चाधस्तदारावनुकर्षा नरि नान्तगः ŚabdaRa.(Su.) 3.262.

अनुकर्षाप्रदर्शन (anukarṣāpradarśana) *n.* non-indication of con-

tinuation अत्रासच्छन्दोक्तस्य तत्सदासीदित्यनुकर्षप्रदर्शनं सच्छन्दस्य चिदचित्सा-धारण्यनिबन्धनम् ŚrutaPra. ii. 131.27 (*on* i.4.15)

अनुकर्षार्थ (anukarṣārtha) *adj.* meant for the sake of continuation चशब्दः पूर्वसूत्रात्रमोऽनुकर्षार्थः TattvPrakā. 209A.4 (*on* iv. 2.7)

अनुकर्षित (anu-karṣita) *n.* dragging, pulling आलेख्यमानास्तस्याङ्ग-सेवार्थमनुकर्षितम्। करिण्योत्त(?ऽत्र) पुनः क्रीडां नरेन्द्रस्येव कुर्वते Hastyāyur. 203.1 (2.13)

अनुकर्षिन् (anukarṣ-in) *adj.* [*f.* -iṇī] 1 dragging out (of the body), removing दोषानुकर्षिणी मात्रा सर्वमार्गानुसारिणी CaraS. i. 13.34; 2 which attracts यो जितः पञ्चवर्गेण सहजेनात्मकर्शिना (v.1. अनुकर्षिणा)। आपदस्तस्य वर्धन्ते MahāBhā. v. 34.53.

अनुकल (anu-kal-) x. v. A to think about भगवन्तम्।··· अनुकलयति सा तु भवन्तम् BṛDharmaP. i. 44.89; तते ··· वपुरनुकलये मारुतागारनाथ Nārāy. i. 1.6; B to put together तैरेकैकस्य भागैः परमनुकलयत्यर्धमर्धं चतुर्भिः TattvMu. 1.17.

अनुकलक्षाम (anukala-kṣāma) *adj.* emaciated in all parts बाला केवलमङ्गकैरनुकलक्षामैर्विविक्तस्थले ध्यायन्ती किल किंचिदन्तरवुना निस्पन्दमास्ते सदा VasaTi. 27.18.

अनुकलघट्टित (anukala-ghaṭṭita) *adj.* reaching (the top of the house) every moment हर्म्याग्रेष्वनुकलघट्टितो गृहाणामास्कन्दन्निव हरितां च संधिबन्धान्।··· प्रसरति पौरघोष एषः VasaTi. 19.3.

अनुकलप्रणादिन् (anukala-praṇādin) *adj.* always producing (sweet) sounds दर्शयामास ··· देवोद्यानम् ··· विहङ्गैश्चानुकलप्रणादिभिः। विनादितम् LiṅgaP. i. 92.14.

अनुकलम् (anukalám) *adv.* A in accordance with the parts (i.e. part by part) षोडशभिर्ऋग्भिर्जुहोति षोडशकला वै पशवोऽनुकलमेवास्मिन्वीर्यं दधति ŚatBr. XII. viii. 3.13; अयमनेककालार्जितमूर्जितं यशो भोजभूमीभुजामनुकलं कलङ्कयति KamVa. 6.4(1); B at every moment, always आशाकालाननुकलमसू(?सून्) निर्द(यं ?हन्) निर्दयो मे। कालक्षेपं न खलु घट(?सह)ते कामबाणः कठोरः HaṁsSaṁ. 30; न च सैव साक्षाद्ब्रह्मप्राप्तिः, अस्यानुकलं विच्छेदात् ŚatDū. 137. 17; स्फुटनखरदनाङ्कमङ्गनानाम् ···। वपुरनुकलमैक्षत क्षितीशः MadhuVi. 6.67; आलीलोकैरनुकलमशून्यान्तिकाया नताङ्ग्याश्चेष्टाः काश्चिच्छृणु नववियोगेऽत्र संभाव्यमानाः MayūSaṁ. 2.53; शोषयत्यनुकलं विवर्तनैः सा सखीजनमखेदयन्मुहुः Nalābhyu. 3.7; 6.14; मातङ्गानां कुलमनुकलं यत्र वासं विधत्ते HaṁsDū.(Vā.) 40; वितरणपरिपाटीं यस्य विधाधु(ध)रीणां नखरमुखरवीणानादगीतां निशम्य। अनुकलमयमावालांव(बु)िं [वं]वापदेशादमरनगरशाखी लज्जया मज्जतीव EI. xi. 331.44; xii. 173.45; निजजनविरहव्यथा यथास्माननुकलमुत्तपति प्रतिप्रतीकम् KamVa. 4.33; वालिसुतः ··· अनुकलमीक्षितः प्लवंगैः AdbhuDa. 3.8; 8.34; संपीडयन्त्यनुकलं नमयन्ती मस्तकं कृताश्लेषाः KandaCū. ii. 8.7; Ḍamaru. 7(1); भृत्यापोषणलालनान्यनुकलम् ··· वृद्धिमुपेयुषोस्तनययोः कुर्वन् ··· असौ ĀnandRa. 3.22; 5.54; 7.35(9)

अनुकलय्य (anukalay-ya) *ger.* having thought प्रियेऽस्तिन्द्रिऽनुकलय्य कोऽपि। आलिङ्ग्य चैकामपरां निगूह्य मनोजसंजीवनमाततान PadyaVe. 329.

अनुकलास्त्र (anukalāstra) *n.* repeated utterance of a *mantra* of weapons दहेदनुकलास्त्रेण केवलास्त्रेण भस्मसात् AgniP. 84.52.

अनुकलिङ्गम् (anukaliṅgam) *adv.* near (the country) Kaliṅga अहम् ··· निवर्तमानो व(र्ति?तै)न्यामनुकलिङ्गम् तुङ्गदारुणि महत्यरण्ये रमणीयं किमपि शङ्करायतनं निवार्य AvantiKa. 186.8.

अनुकलितचिन्मात्रगहना (anukalitacinmātra-gahanā) *adj.* (*f.*) concrete because of the experienced consciousness only अनुकलितचिन्मात्रगहनां स्वसंविर्त्ति योगी रसयति शिवाख्यां परतनुम् DevīPañ. 5.18.

अनुकल्प (anu-kalpa) *n.* [listed in the *ukthādi gaṇa*, GaṇPā. 22.11] a substitute, secondary alternative procedure or rule or method or path अथ चतुर्विधं भस्मकल्पम्।··· अग्निहोत्रसमुद्भूतं विरजानलजमनुकल्पम् BṛJābāU. 3(34); भक्त्या संप्रतिपन्नानां विना शाठ्येन मायया। व्रतिनां मुख्यतः सम्यगनुकल्पं समं स्मृतम् PauṣkS. 31.301; बिम्बस्य ···। जातेऽवयववैकल्ये ह्यनुकल्पमिदं शृणु PauṣkS. 38.98; स्वजातीयगुरोर्विप्र अभावादिदमाचरेत्। अनुकल्पं द्विजाद्यैश्च आत्मसंस्कारसिद्धये JayāS. 18.16; पूर्वमुक्ते तु वासरे। न कल्पिते ध्वजारोहे तूत्सवारम्भवासरे। ध्वजस्यारोहणं कृत्वा तत्पश्चात् क्रियते तु यः। अनुकल्पमिदं विद्धि PāraS. 16.28; कुशिकसुतकुशाग्रतोयबिन्दोरिदमनुकल्पमवेत कार्मुकं मे AnargbaRā. 2.63 (comm. गौणम्); पुष्पं गृहीत्वा तु आसनं चोपकल्पयेत्।··· इदं परायणं परस्परप्रीतिकरं प्राणरक्षणं प्राणिनां स्विष्टं तदनुकल्पम् ··· तदेव गृहाण VarāP. 118.44; सर्वत्रैकरूपशब्दार्थव्यवहारदर्शनात् संगानमनुकल्पम् NyāyRa. 678.11 (*on* 5(15).133); *m.* 1 alternative or subordinate procedure or method स्वधर्मानन्तरा वृत्तिर्यान्यानुपजीवतः। वहतः प्रथमं कल्पमनुकल्पेन जीवनम् MahāBhā. xii. 128.24; प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते। न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् MahāBhā. xii. 159.16; ManuSm. 11.30; TantrVā. 110.19 (*on* i. 3.4); ViṣṇuDhaP. i. 161.17; भार्याः कार्याः स्वजातीयाः ··· इति पूर्वकल्पः। ततोऽनुकल्पः चतस्रो ब्राह्मणस्यानुपूर्व्येण ŚaṅkhaLiDS. 64; एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ManuSm. 3.147; KūrmaP. 601.6 (2.21); कुण्डाः ···। अनुकल्पे तु विहिता जङ्गमा मन्त्रतर्पणे PauṣkS. 29.13; एतान् नियोजयेच्छ्राद्धे पूर्वोक्तान् प्रथमे नृप। ब्राह्मणान् पितृतुष्टयर्थमनुकल्पेष्वनन्तरान् ViṣṇuP. iii. 15.4; अमांव हि श्रुतस्यानुकल्पः प्रतिनिधिः ŚābaBh. 1426.19 (*on* vi. 3.35); मुख्यः स्याद् प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः AmaK. 1432; AgniP. 364.8; SmṛtiCan. v. 160.8; शुद्धिरेषा च मौलिकी।··· अनुकल्पे तु तां वक्ष्ये PāraS. 3.222; 6.110; नित्ये नैमित्तिके काम्ये प्रायश्चित्ते तथैव च। मानं नवविधं विप्र शृणु मुख्यानुकल्पयोः PāraS. 18.2; अपक्षीयमाणपक्षदीक्षितोऽनुकल्पेन परिचरेदा दशम्याः PārāSū. 15.10; 18.22; यद् द्विराचामति तेनात्मानं स्नातं कुरुते स्नानस्यैषोऽनुकल्पः PārāSū. 45.6; 54.1; आचार्योपनयनं तु ब्राह्मणस्यानुकल्पः BālaKrī. i. 35.8 (*on* 1.15); 1.46.21 (*on* 1.29); मुख्याभावे योऽनुष्ठीयते प्रतिनिधिन्यायेन सोऽनुकल्प उच्यते ManuBh. 1. 271.8 (*on* 3.137); इदानीं काम्ये नित्यसंयोगे चानुकल्पो वक्तव्यः Mitā. 18.20 (*on* 1.56); 126.28 (*on* 2.3); 143.11 (*on* 2.19); प्रथमकल्पादन्योऽनुकल्पः GaṇRa. 4.307(347); तत्कर्णौ भारती दूनौ विमृश्याऽभीमजागिराम्। अध्वनि ध्वनिर्विर्णैरनुकल्पैर्व्यनोदयत् NaiṣC. 17.12; नेन मुख्यकल्पानुकल्पयोरसंभवे प्राप्तकल्पोऽयमिति संभवति HārLa. 120.10; अत्रानुकल्पमाह वसिष्ठः SmṛtiCan. ii. 301.16; कुम्भो द्रोणद्वयमिति गृह्यमाणे विंशतिद्रोणादिकं प्रथमकल्पादनुकल्पमनुकल्प्य न समञ्जसं स्यात् CaturCin. i. 393.6; iii(2). 6.6; iii(1). 299.1; iii(1). 758.5; iii(1). 1042.18; दर्व्यादिहोमेऽनुकल्पेन वाक्येन विधेयार्थक्रियमाणे तस्य कारणत्वाभावान्न युज्यते NyāySu.(So) 89.18 (*on* 1.2.27); सावित्रीमधीत्यान्याध्ययनाशक्तावुपाकरणाद्वा पूर्वमगृहीतवेदस्य ब्रह्मचारिणोऽनुकल्पः ManvaVi. 178.26 (*on* 2.104); 293.13 (*on* 3.24); 295.5 (*on* 3.26); 1355.19 (*on* 11.27); यत्कौपीनादिपरिग्रहणमस्ति तदप्यस्य योगिनः परमहंसस्य मुख्यः कल्पो न भवति, किं त्वनुकल्प एव JīvanVi. 147.18; तत्कथमनुकल्पः स्यात् NyāySu.(Ja.) 52B.7 (*on* i. 1.1); योगीश्वरोक्तमनुकल्पमेव मुख्यं मन्यते नारदः Subodhi. 2.25 (*on* 2.3); त्रिणाचिकेतव्यतिरिक्तानां स्वस्त्रीयादीनामनुकल्पमाह मनुः 'अनुकल्पस्त्वयम्' DīpKa. 26.26 (*on* 1.220); पूर्णानुष्ठानशक्तस्य ··· मुख्यकल्पसमर्थस्यानुकल्पेन वृत्तौ च दोषमाह PāñeRāRa. 176.2; अनुकल्पेनापि यथासंभवमेते (पञ्चयज्ञाः) कर्तव्याः ManvaMu. 100.32 (*on* 3.71); जीवात्मसंयमस्तु तत्रानुकल्प इति YogSā. 19.2(1); उपास्त्या तु विलम्बेनेति योगमार्गोऽनुकल्पः SiddhāLeSaṁ. 393.3; वामहस्तेन पूजा च दक्षेण तर्पणं मतम्। दक्षेण पानं देवेशि ह्यनुकल्पाः प्रकीर्तिताः ŚaktiSaṁT. i. 7.24; i. 7.55; ii. 21.52; राज्ञोऽनुकल्पमाह व्यासः राज्ञा तु स्वयमादिष्टः संधिविग्रहलेखकः।··· प्रलिखेद्राजशासनम् VyavaMa. 24.8; पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम्। त्रिभिर्मुहूर्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः ···। द्विमुहूर्तत्वं चानुकल्पः NirṇaSi. 13.19; 43.5; अत्र साग्निरनग्नेर्वोक्तकालाभावे त्रिरक्षाद्विसंवत्सरान्ताः अनुकल्पा ज्ञेयाः NirṇaSi. 426.17; संध्याकर्मावसाने तु स्वयं होमो विधीयते। ऋत्विगादिद्वारा तु तदाचरणमनुकल्पः VīraMi. 181.28 (*on* 1.99); निमित्तमथ तत्रोक्तं तद् द्विराचमने ततः। अनुकल्पास्ततस्तस्य कथितास्तदनन्तरम् VīraMi.(Āhnika.) 7.7; स्मार्तोऽनुकल्पः अत्कृष्टत्वात् VīraMi.(Paribhāṣā.) 29.9; 81.3; विहितालाभत इति अप्रतिषिद्धविहितालाभे विहितप्रतिषिद्धैरर्थैर्वेदिनोऽनुकल्पः VīraMi.(Pūjā.) 69.19; तत्र राक्षसो मुख्यः प्राजापत्यासुरगान्धर्वा अनुकल्पाः VīraMi.(Saṁskāra.) 859.8; ब्रह्मत्वस्य वासिष्ठकर्तृकत्वं मुख्यः कल्पः। अवासिष्ठकर्तृकत्वमनुकल्पः MayūMāli. 508.10 (*on* vi. 6.4); (जपेद् सहस्रं वा त्रिशतं शतमेव वा) नायं तुल्यबलो विकल्पः किं तु पूर्वासंभवे परोऽनुकल्पः LalitāSaBh. 202.23 (*on* 240); प्रतिनिध्यनुकल्पयोश्च मुख्याभावोपाधिकत्वाविशेषात् BālamBha. iii. 31.11 (*on* 3.16); 2 due procedure एतेषामेव लोकानामृतुच्छन्दःस्तोमपृष्ठानामानुपूर्व्येण भक्तिशेषोऽनुकल्पः AVPari. 48.147; 3 secondary preparation एतद् बलासग्रथितेष्वनं स्यादेषोऽनुकल्पस्तु फणिज्झकादौ SuśruS. vi. 11.12; 4 not the principal (i.e. not the real) end of the world अनुकल्पाश्रितचण्डपावकम् ···। अवमत्य तुरङ्गदानवम् ··· प्रजहास हरिः Yādavā. 9.17.

अनुकल्पक (anukalpa-ka) *m.* (Tantr.) secondary procedure गणेशमभिषिच्य च। पूजयेदर्घ्यगन्धाद्यैरथवा ह्यनुकल्पके PāraS. 14.536; कलशे मण्डले बिम्बे वह्नौ च यजनं विभोः। नित्यशः क्रियते यत्र मुख्यकल्पः स कीर्तितः। बिम्बे वह्नौ च यजनं यत्र स्यात् सोऽनुकल्पकः PāraS. 16.22; स्थ्या(?श्या)न्तर कर्णो विधिः कल्प उपकल्पोऽनुकल्पकः Vaija. 92.113; *n.* secondary alternative procedure (of preparing sacred ashes) आरण्यगोमयं दूरे ग्रामादेः पूतमाहरेत्। प्राग्वच्छिवाग्निना दग्धं यत्तत् स्यादनुकल्पकम् KāmŚiPa. i. 9.66; ii.3.193;

cf. अनुकल्प *n.*

अनुकल्पकाल (anukalpa-kāla) *m.* time for (the performance of) an alternative procedure एकोद्दिष्टमासिके (श्राद्धे) पूर्वमेवानुकल्पकालस्योक्तत्वात् SmṛtiCan. v. 140.7.

अनुकल्पकृत् (anukalpa-kṛt) *adj.* one who follows the due procedure संप्रार्थ्य देवेशं वीप्सया तोषयेत्ततः। व्यजनैश्चामरैश्चैव वीजयेदनुकल्पकृत् SkandP. ii(2).39.24.

अनुकल्पता (anukalpa-tā) *f.* A the state of being a secondary alternative or substitute procedure क्षत्त्रियकर्मणि ··· कुसीदादीनामनुकल्पतया साधारणत्वम्। वैश्यस्य तु स्वयंकर्तृकाण्यप्येतानि स्वकल्प एव, स्मृत्यन्तरात् BālaKrī. i. 102.3 (*on* 1.118); यं मन्यते नैव शत्रुं न मित्रं तं मध्यस्थं भोजयेत् श्राद्धकल्पे उत्कृष्टगुणोदासीनाभावे कदाचिदुत्कृष्टगुणं मित्रं ग्राह्यम्। शत्रुस्त्वनुकल्पतयापि न ग्राह्य इत्याह मनुः CaturCin. iii(1).464.11; अत एवानुकल्पतया दुःस्थितस्य स्वप्रतिनिधिप्राड्विवाकनियोगः प्रागुक्तः VīraMi.(Vyavahāra.) 92.30; अनुकल्पता च मुख्यानुष्ठानासंभवे परानुष्ठानम्। तत्रानुकल्पता द्विविधा, नैयायिकी वाचनिकी चेति VīraMi.(Saṁskāra.) 707.17; अस्तु वा मासादेर्जरामरणादिरूपनित्यप्रयोगविधिवदनुकल्पतया विधिः MīmāKau. ii. 77.6 (*on* ii. 3.24); B subordinate position, subservience नन्दः ···। अधिचकार वदान्यमणेः श्रियं व्यधित कल्पतरोरनुकल्पताम्।··· सुतप्रसवोत्सवे Yādavā. 3.65.

अनुकल्पतातारतम्य (anukalpatā-tāratamya) *n.* gradation in being the secondary procedures अन्ये (पक्षाः) तु पूर्वपूर्वासंभवेऽनुकल्पतातारतम्येन व्यवस्थाप्याः VīraMi.(Saṁskāra) 707.17.

अनुकल्पत्व (anukalpa-tva) *n.* the state of being a secondary alternative or substitute procedure अनुकल्पत्वं चाधिकारविप्रकर्षात् BālaKrī. i. 64.15 (*on* 1.55); श्राद्धीयद्विजसंनिधावतिथिर्भोजनीय इत्युक्तम्। यदि तु श्राद्धे भोक्तारः प्रकृष्टगुणा न स्युः, श्राद्धे एवासौ भोजनीय इत्यनुकल्पत्वम् CaturCin. iii(1).447.20; iii(1).565.19; iii(1).758.12; iii(1).1338.6; काञ्चनाभावे दीयते स्वर्णमाक्षिकम्। किं तु तस्यानुकल्पत्वात् किंचिदूनगुणास्ततः। न केवलं स्वर्णगुणा वर्तन्ते स्वर्णमाक्षिके BhāvPra.(Bhā.) 6(8).58; एषां सोमादीनामभावे करणाशक्तौ वैश्वानरीमिष्टिमनुकल्पत्वेन कुर्यात् VīraMi. 212.20 (*on* 1.126); 830.6 (*on* 3.52); (दत्तादीनाम्) तेषां वाचनिकमेव अनुकल्पत्वम् VīraMi.(Saṁskāra.) 207.21; 388.1; तत् ··· अनुकल्पत्वेन स्वगृह्योक्तमात्रानुष्ठानबोधकमिति पूर्वाधिकरण एवोक्तत्वाद् अकिंचित्करम् MīmāKau. i. 99.10 (*on* i. 3.15); iii(1).53.11 (*on* i. 2.27); पराशरोक्तेश्चानुकल्पत्वेनापदि पञ्चम्यादिपरिणयनं कार्यमिति प्रतीयते NirṇaSi. 205.26; यत्तु पूर्वतन्त्रे सिन्दूरादेर्निरपेक्षकारणत्वमुक्तम् तदीदृशद्रव्यालाभेऽनुकल्पत्वेन ज्ञेयम् SetuBa. 308.11; अत्रानुकल्पत्वं तु दौहित्रातिरिक्तविषयम् BālamBha. i. 493.1 (*on* 1.220); iii. 31.14 (*on* 3.16)

अनुकल्पत्वज्ञापन (anukalpatva-jñāpana) *n.* indication of (something) being a secondary alternative सवर्णग्रहणम् ··· उत्कृष्टवेदनस्यानुकल्पत्वज्ञापनार्थम् BālaKrī. i. 64.14 (*on* 1.55)

अनुकल्पत्वद्योतन (anukalpatva-dyotana) *n.* indication of being a secondary alternative किं जर्तिलगवीधुकानामनुकल्पत्वद्योतनार्थोऽयं निषेधो विकल्पार्थो वा NyāySu.(So.) 70.24 (*on* i. 2.19)

अनुकल्पत्वपक्ष (anukalpatva-pakṣa) *m* view of being a secondary alternative अनुकल्पत्वपक्षे बाधानापादकत्वाद् विकल्पपक्षः NyāySu.(So.) 70.25 (*on* i. 2.19)

अनुकल्पत्वसूचन (anukalpatva-sūcana) *n.* suggestion of being a secondary alternative अनुकल्पत्वसूचनायाह। अन्नाभावे इति BālamBha. i. 353.8 (*on* 1.104)

अनुकल्पत्वाभिप्रायक (anukalpatvābhiprāya-ka) *adj.* having the intention of being a secondary alternative ब्राह्मणो वेत्यनुकल्पत्वाभिप्रायको वाशब्दो न तुल्यकक्षाधिकारपरः VīraMi.(Vyavahāra.) 26.6.

अनुकल्पन (anu-kalpana) *n.* secondary alternative जनित्रे भवत इति सति किमन्यदनुकल्पनात् NidāSū. 146.12 (8.10); यद्वा गर्भगृहे विष्णोर्मूलमूर्तेस्तु दक्षिणे। शयनं कल्पयेद्विप्र स्वगृहे वानुकल्पने PāraS. 13.37.

अनुकल्पपक्ष (anukalpa-pakṣa) *m.* view of secondary alternative संबन्धाशङ्कयैव मातामहादयोऽनुकल्पपक्षोक्ताः ManuBh. i. 267.23 (*on* 3.128); अनुकल्पपक्षे दौहित्रस्य यत्नेन भोज्यतोच्यते ManuBh. i. 306.29 (*on* 3.224)

अनुकल्पपर (anukalpa-para) *adj.* having reference to a secondary alternative प्रतिनिधिपदं चैतदंशेऽनुकल्पपरम् VīraMi. (Saṁskāra.) 207.21.

अनुकल्पभाव (anukalpa-bhāva) *m.* status of secondary position तस्मिन्नरण्ये तरुभिः प्रपेदे कल्पद्रुमाणामनुकल्पभावः Yādavā. 4.42.

अनुकल्पभूत (anukalpa-bhūta) *adj.* which is a secondary alternative तेन ध्वजं क्रियत इत्यर्थवादनिराकाङ्क्षत्वे सत्यपि शूर्पासंभवेऽनुकल्पभूतदर्व्यादिप्राप्त्यर्थं तेन ध्वजं क्रियत इत्यस्यापि परावृत्त्य हेतुपरतेष्यते NyāySu.(So.) 86.29 (*on* i. 2.26); अनुकल्पभूतसांकल्पश्राद्धेऽपि पुनस्तत्कर्तव्यम् BālamBha. i. 546.8 (*on* 1.249)

अनुकल्पम् (anukalpam) *adv.* 1 in the course of (the exposition of) the ritual यानि (तैलादीनि) चानुकल्पमुदाहरिष्यामः GobhiGS. i. 5.20; 2 resemblaance with (savanas) स्तेयं कृत्वा सुरां पीत्वा ··· चतुर्थकाला मितभोजनाः स्युरपोऽभ्यवेयुः सवनानुकल्पम् ĀpaDS. i(9).25.10; BaudhDS. ii. 1.41; 3 in each and every *kalpa* or age तमीशमीड्यमनुकल्पमाद्यं पश्यन्ति मूढा न विराजमानम् MahāBhā. v. 300*(3) (*but* Śāṅ. सर्वमनुप्रविश्य आत्मना कल्पयतीत्यनुकल्पम्); संहरणेऽत्तमेतज्जगत्समस्तम् ···। तवैव सर्गाय समुद्यतस्य जगत्त्वमभ्येत्यनुकल्पमीश ViṣṇuP. v. 9.31; मयूखः पूष्णीव ···। उदेत्योदेत्याम्ब त्वयि ··· भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः DevīPañ. 5.32; अनुकल्पं पुत्राणां सुप्रसन्नो रवे मम। कुरु ··· कार्यम् BrahmP. 32.28; एष वरदः कमलालयायाः। आकल्पयन्वसुमतीमनुकल्पमेनां कल्पद्रुमो भवतु कश्चन मानवानाम् VasaTi. 47.14.

अनुकल्पमध्य (anukalpa-madhya) *n.* [Loc.] amongst (various) alternatives (व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत्) एतेनानुकल्पमध्ये दौहित्रस्य श्रेष्ठतोक्ता ManvaVi. 419.14 (*on* 3.234)

अनुकल्परूप (anukalpa-rūpa) *adj.* having the form of a secondary alternative performance शूद्रः ··· मन्त्ररूपाङ्गहीनं पकाङ्गहीनं चानुकल्परूपं श्राद्धं करोति CaturCin. iii(1).1522.15; VīraMi. 816.8 (*on* 3.35-41); *n.* [Inst.] in the form of a secondary alternative मुख्यकल्पानुकल्परूपेणात्र व्यवस्था YogSā. 43.6(2)

अनुकल्परूपत्व (anukalparūpa-tva) *n.* the state of having the form of a secondary alternative त्रिब्राह्मणैकब्राह्मणपक्षयोः कल्पानुकल्परूपत्वप्रतिपादिका मन्वादिस्मृतिर्बाध्येत CaturCin. iii(1).89.22.

अनुकल्पविधा (anukalpa-vidhā) *f.* [Inst.] by way of a secondary alternative तत्स्वपरगृह्योक्तयोः प्रत्यक्षनयनसमारोपयोर्मुख्यकल्पानुकल्पविधयैवेति मन्तव्यम् BālamBha. i. 318.2 (*on* 1.97)

अनुकल्पविधान (anukalpa-vidhāna) *n.* injunction of the secondary alternative विशेत्। यागार्थमण्डपं तत्र ··· यजेद् बिम्बम् ··· अनुकल्पविधाने तु प्रासादं संप्रविश्य च। मूलबिम्बम् PāraS. 14.353; अनुकल्पविधानाभावेऽपि नित्याकरणे प्रत्यवायस्यावश्यंभावित्वात् CaturCin. iii(2).141.4; 'बह्वल्पं वा स्वगृह्योक्तम्' इत्यादिवचनम् ··· अनुकल्पविधानार्थम् MīmāKau. ii. 125.13 (*on* ii. 4.21); BhāṭṭDī. i. 180.18 (*on* ii. 4.2)

अनुकल्पविधि (anukalpa-vidhi) *m.* injunction of the secondary alternative यदा सर्वोत्तमगुण उदासीनो न लभ्यते तदानुकल्पविधिः CaturCin. iii(1).454.18; iii(1).758.13; श्रौतेऽपि स्वशाखोक्तमात्रं स्वकल्पसूत्रमात्रोक्तं वानुष्ठेयमित्यनुकल्पविधिर्भवत्येव MīmāKau. i. 99.13 (*on* i. 3.15)

अनुकल्पविषयत्व (anukalpaviṣaya-tva) *n.* the state of having reference to the secondary alternative विधेरनुकल्पविषयत्वेन निषेधस्य च मुख्यकल्पविषयत्वे नैकविषयत्वाभावात् VīraMi.(Saṁskāra.) 709.16.

अनुकल्पशस् (anukalpa-śas) *adv.* in each secondary alternative चरितार्था श्रुतिः कार्या यस्मादप्यनुकल्पशः Karmapradīpa (*cf.* Dharmaśāstrasaṁgraha, vol. II, Navrang, 431.23)

अनुकल्पस्मरण (anukalpa-smaraṇa) *n.* *smṛti-* text regarding secondary alternative अक्षता नरमेधश्च गोयज्ञश्च कमण्डलुः। देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्। अत एव मधुपर्केऽनुकल्पस्मरणम् Aparā. 233.9 (*on* 1.156)

अनुकल्पागत (anukalpāgata) *adj.* resulting from the secondary alternative अनुकल्पागतं च यत्राभिपत्वं तत्र निषेधः प्राप्नोति BālamBha. i. 196.23 (*on* 1.53)

अनुकल्पानुकल्प (anukalpānukalpa) *m.* [P. viii. 1.11] every secondary alternative कुण्डाः।··· अनुकल्पे तु विहिता जङ्गमा मन्त्रतर्पणे।··· अनुकल्पानुकल्पे तु नित्यमेव PauṣkS. 29.15; PāraS. 7.12.

अनुकल्पानुवाद (anukalpānuvāda) *m.* restatement of the secondary alternative पृथगिति त्वनुकल्पानुवादमात्रमसंकीर्णात्संकीर्णस्य निन्दितत्वप्रदर्शनार्थम् ManvaVi. 295.6 (*on* 3.26)

अनुकल्पानुष्ठातृ (anukalpānuṣṭhātṛ) *adj.* who performs (i. e. follows) the secondary alternative प्रथमकल्पशक्तस्य तु अनुकल्पानुष्ठातुर्दोषमाह मनुः CaturCin. iii(1).452.20.

अनुकल्पानुष्ठान (anukalpānuṣṭhāna) *n.* performance according to a secondary alternative प्रथमकल्पलाभेऽनुकल्पानुष्ठाने तु दोषमाह (मनुः) SmṛtiCan. v. 160.13; मुख्यासंभवे चानुकल्पानुष्ठानात्फलं भवति VīraMi.

(Paribhāṣā.) 29.10.

अनुकल्पान्तर (anukalpāntara) *n.* another secondary alternative मनुस्त्वनुकल्पान्तरमाह SmṛtiCan. v. 162.5.

अनुकल्पापेक्षा (anukalpāpekṣā) *f.* [Inst.] in accordance with the secondary alternative वचनार्थस्तु प्रथमः कल्प इत्यनुकल्पापेक्षया VīraMi. (Āhnika.) 65.7.

अनुकल्पावस्था (anukalpāvasthā) *f.* (Loc.) in the case of the secondary alternative मुख्यवदनुकल्पावस्थायामपि यथावगतान्येवानुष्ठातव्यानि (कर्माणि) CaturCin. iii(1). 104.3.

अनुकल्पित (anu-kalpita) *adj.* [*f.* -ā] A prescribed हिंसायां हि प्रवृत्तायामाशीरेवानुकल्पिता MahāBhā. xii. 257.3; B endowed with हुत्वा चाहवनीयस्थम् …। अग्रभोज्याः प्रसूतीनां श्रिया ब्रह्म्यानुकल्पिताः MahāBhā. xiii. 35.9; C built, fashioned स्फटिकगोपुरं पुरम्। हरो गिरौ चिरमनुकल्पितं तदा विसर्जितामरनिवहोऽविशत्स्वकम् MatsyaP. 154.498; D practised देवदेवस्य भक्तियैरनुकल्पिता … तैर्लब्धं रुद्रसालोक्यं शाश्वतं पदमव्ययम् VāyuP. ii. 30.311; BrahmāṇḍP. iii. 2.248.

अनुकल्पितभूषण (anukalpita-bhūṣaṇa) *adj.* who has reduced the ornaments to a secondary status अङ्गैरमितसौन्दर्यैरनुकल्पितभूषणम् … अवेक्ष्य विबुधा देवमलभन्त दृशोः फलम् Yādavā. 1.69 (comm. अनुख्यकल्पीकृताभरणम्)

अनुकल्पोक्त (anukalpokta) *adj.* mentioned in the secondary alternative तत्रानुकल्पोक्तमुत्सवं न समाचरेद् PāraS. 17.513.

अनुकल्पोद्वाह (anukalpodvāha) *m.* marriage according to the secondary alternative नन्वनुकल्पोद्वाहे दोषाभावान्नरको न स्याद् VīraMi. (Saṁskāra.) 709.19.

अनुक्तनिमित्त (anukta-nimitta) *n.* cause which is not mentioned अनुक्तनिमित्तं तु स्वयमनुसरणीयम् AlaṅkāRa. 70(20); *adj.* [*f.* ā] in which the reason or cause is not expressed अनुक्तनिमित्तायामपि विशेषोक्तौ Dhvanyā. 117.1 (on 1.13); (विशेषोक्तिः) अनुक्तनिमित्ता उक्तनिमित्ता अचिन्त्यनिमित्ता च KāvyPra. 658.2; तत्रोक्तनिमित्ता (विभावना) उदाहृता । अनुक्तनिमित्ता यथा AlaṅkāSa. 125.11; AlaṅkāRa. 53(7); अचिन्त्यनिमित्तत्वं चानुक्तनिमित्तस्यैव भेद इति पृथङ् नोक्तम् SāhiDa. 500.5; RasGaṅ. 583.12.

अनुक्तनिमित्तत्व (anuktanimitta-tva) *n.* the state of being that wherein cause or reason is not expressed उक्तानुक्तनिमित्तत्वाद्द्विधा सा परिकीर्तिता (विभावना) SāhiDa. 589.2; 590.1.

अनुक्तनिमित्तविशेषोक्ति (anuktanimitta-viśeṣokti) *f.* (figure of speech) *viśeṣokti* wherein the cause or reason is not expressed यत्र तु प्रतीतिरस्ति यथा समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्तिपर्यायोक्त' ... 'संकरालंकारादौ तत्र ध्वनेरन्तर्भावो भविष्यतीत्यादि निराकर्तुमभिहितम् Loc. 35.1 (on 1.13)

अनुक्तनिष्कृति (anukta-niṣkṛti) *adj.* **i** for whom or which expiation is not mentioned or prescribed अनुक्तनिष्कृतीनां तु पापानामपनुत्तये । शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् ManuSm. 11.209; ViṣṇuSm. 54.34; एवं तावदुक्तनिष्कृतीनामनुक्तनिष्कृतीनां च (पापानाम्) प्रायश्चित्तावगमप्रकार उक्तः BālaKrī. ii. 169.9 (on 3.290(? 297)); अनुक्तनिष्कृतीनां प्रायश्चित्तं कल्पयेत् ManuBh. ii. 395.23 (on 11.84); अपाङ्क्याः ये तेन पतितक्लीबा इत्यादिनोक्ताः। तेषां मध्ये अनुक्तनिष्कृतीनां मिलितमेतत्त्रयं शोधनम् [ManvaVi. 1444.28 (on 11.200); **ii** for (the killing of) which expiation is not prescribed अनुक्तनिष्कृतयश्च नास्निमन्तो (? श्वानस्निमन्तो) ज्ञेयाः ManuBh. ii. 413.4 (on 11.140); अस्थिमतां प्राणिनां कृकलासप्रभृतीनामनुक्तनिष्कृतीनां सहस्रं हत्वा ... प्राकृतं ब्रह्मचर्यं चरेद्दश धेनूर्वा दद्यात् Mitā. 468.26 (on 3.269); VīraMi. 1015.9 (on 3.269)

अनुक्तनिष्कृतिक (anuktaniṣkṛti-ka) *adj.* **i** for which expiation has not been prescribed ननु किंचिदपि निमित्तजातमनुक्तनिष्कृतिकमुपलभ्यते Mitā. 501.26 (on 3.293); 524.17 (on 3.326); विरुद्धप्रायश्चित्तसंनिपातप्रसङ्गे तद्विरोधपरिहारार्थं यत्कल्प्यं यच्चानुक्तनिष्कृतिकेषु पापेषु कल्पनीयं, तदुभयमाह Aparā. 1203.9 (on 3.293); **ii** for (the killing of) which expiation is not prescribed अनुक्तनिष्कृतिकस्य सास्थिकस्य वधे किंचित्कार्षापणादि देयम् Aparā. 1134.15 (on 3.276)

अनुक्तनिष्कृतित्व (anuktaniṣkṛti-tva) *n.* the state of being that for which expiation is not prescribed ननु कथं पापस्य लघुत्वम् ... न च प्रायश्चित्ताल्पत्वादिति वाच्यम् । अनुक्तनिष्कृतित्वादेव Mitā. 502.2 (on 3.293)

अनुक्तनिष्कृतिप्राणिवध (anuktaniṣkṛti-prāṇivadha) *m.* killing of animals for which expiation is not prescribed एतच्चानुक्तनिष्कृतिप्राणिवधविषयम् Mitā. 471.8 (on 3.275)

अनुक्तनिष्कृतिविशेष (anukta-niṣkṛtiviśeṣa) *adj.* for which a specific expiation is not prescribed अनुक्तनिष्कृतिविशेषे (पापे) न्यूनाधिकसमप्रायश्चित्तानि कल्प्यानि VīraMi. 1062.20 (on 3.293)

अनुक्तनिष्कृतिविषय (anuktaniṣkṛti-viṣaya) *adj.* referring to that for which expiation is not prescribed किं च नेदमनुक्तनिष्कृतिविषयमेव प्रकल्पयेत्, उक्तेऽपि (प्रायश्चित्तस्य) कल्पना कार्या ManuBh. ii. 436.22 (on 11.208)

अनुक्तनिष्कृत्यर्थम् (anuktaniṣkṛtyartham) *adv.* for the sake of that for which expiation is not prescribed सर्वत्रैव त्वनुक्तनिष्कृत्यर्थम् — 'किंचित् सास्थिवधे देयं प्राणायामस्त्वनस्थिके । वृक्षगुल्मलतावीरुच्छेदने जप्यमृक्शतम्' BālaKrī. ii. 163.22 (on 3.271(? 278))

अनुक्तपत्न्यादिदाय (anukta-patnyādidāya) *m.* inheritance by the wife etc. which is not stated अस्य सामान्यवचनस्योक्तौ सादिपिण्डमात्रविषयत्वे वैयर्थ्यात्तत्श्चानुक्तपत्न्यादिदायप्राप्त्यर्थमिदम् ManvaMu. 398.29 (on 9.187); अनुक्तपत्न्यादिदायपरत्वमित्यैतत्परत्वमपि BālamBha. ii. 268.29 (on 2.145)

अनुक्तपराक्रम (anukta-parākrama) *adj.* possessing indescribable valour पदातिर्युयुधे वीरो रामोऽनुक्तपराक्रमः NaraP. 52.101.

अनुक्तपरिग्रहार्थ (anuktaparigrahārtha) *adj.* meant for the inclusion of those (faults) which are not directly stated यद्यपि केवलेन स्वशब्देनैवोक्ता दोषाः तथाप्यनुक्तपरिग्रहार्थमिदमपुनरुक्तम् ManuBh. ii. 109.16 (on 8.77)

अनुक्तपरिहार (anukta-parihāra) *adj.* for the removal of which expiation is not prescribed यानि वा संवेत्ति न कृतान्यनुक्तपरिहाराण्यवश्यं भावितया च ज्ञायते कृतानीति, तेषामपि नित्यानि संध्योपासनादीन्यपनोदकानि

ManuBh. i. 118.21 (*on* 2.79)

अनुक्तपादा (anukta-pādā) *adj.* (*f.*) (a metre) quarters of which are not specifically stated इहानुक्तपादा द्विपदा इति BṛSarvaAnu. 6.11 (8.15): 6.21 (9.12)

अनुक्तपाप (anukta-pāpa) *n.* sin not enlisted पापकृताम्—अत्र विशिष्यानुक्तपापस्य कर्तृणां लोका रौरवादीनि स्थानानि VīraMi. 504.16 (*on* 2.73)

अनुक्तपापान्तर (anukta-pāpāntara) *n.* another sin which is not enlisted न चानुक्तपापान्तरविषयः पातम(?प्म)शब्दः, दुष्कृतशब्दस्य संप्रतिपन्नसमस्तपापसाधारणतया अनुक्तपापान्तरासंभवेन तद्विषयत्वायोगात् ŚrutaPra. iA. 68.4 (*on* i. 1.1)

अनुक्तपुंस्क (anuktapuṁs-ka) *adj.* (word) which has not a corresponding masculine form (in the same sense) (*lit.* by which the masculine gender is not denoted) अनुक्तपुंस्काच्च JaineVyā. v. 2.53; CāndraVyā. vi. 1.73; वाच् चापोऽनुक्तपुंस्कस्य MugdhaBo. 4.8 (41.4)

अनुक्तपुटमान (anukta-puṭamāna) *n.* measure or size of *puṭa* (i. e. closed vessel) which is not mentioned or specified अनुक्तपुटमाने तु साध्यद्रव्यबलाबलात्। पुटं विज्ञाय दातव्यमूहापोहविचक्षणैः RasRaSa. 10.68.

अनुक्तपूरण (anukta-pūraṇa) *n.* addition of what is not stated (earlier) शास्त्रतुल्यार्थविस्तारस्तन्त्रात्खेऽनुक्तपूरणैः। षष्ठाध्याये कृतः पश्चाद् वाक्यार्थश्चोपसंहृतः SāṁkhyaPraBh. 164.4 (*on* 6.70)

अनुक्तपूर्व (anukta-pūrva) *adj.* which was not uttered previously, not spoken before एवमुक्तस्तु जनार्दनेन पार्थः प्रशस्याथ सुहृद्वचं तम्। ततोऽब्रवीदर्जुनो धर्मराजमनुक्तपूर्वं परुषं प्रसह्य MahāBhā. viii. 49.72; हिमवानब्रवीद्वाक्यं श्रुत्वा वाक्यविशारदः। अनुक्तपूर्वं धर्मात्मा क्रोधात्तमनुत्तमम् Rāmā. iv. 11.20; तदा जातु रहः कुप्यंस्तन्वङ्गं चक्रने स्थिते। उवाचानुक्तपूर्वं तामेवं स परुषं वचः RājTa.(Ka.) 7.422.

अनुक्तपूर्ववचन (anuktapūrva-vacana) *n.* words not uttered before अनुक्तपूर्ववचनमुक्तवन्तमथाब्रुवन्। किमहं भवता क्रीता पृष्ठसंवाहिकेति तम् BṛKathāŚloSaṁ. 4.123.

अनुक्तप्रकार (anukta-prakāra) *m.* mode which is not specified उक्तविधानेनोत्तमः तिलकदानमात्रेण मध्यमः। अन्येनाप्यनुक्तप्रकारेणाधमकल्प इति। न चाधमकल्पानादर एव युक्त इति RājNiRa. 75.19.

अनुक्तप्रतिवचनप्रश्न (anuktaprativacana-praśna) *m.* query for which the answer has not been stated यत एवं पण्डितानामप्येतन्महामोहस्थानम् अनुक्तप्रतिवचनप्रश्नविषयम्, अतो यथाशक्ति ब्रह्मविद्याप्रतिपादकवाक्येषु ब्रह्मविजिज्ञासूनां बुद्धिव्युत्पादनाय विचारयिष्यामः BṛĀraUBh. 250.14 (*on* ii. 1.20)

अनुक्तप्रतिषेध (anukta-pratiṣedha) *m.* prohibition which is not stated चकारोऽत्र क्रियते। सोऽनुक्तप्रतिषेधसमुच्चयार्थो भविष्यति। तेन येषामादेशादीनां ग्राहकत्वं नेष्यते ते सवर्णानां ग्राहका न भविष्यन्ति Nyās. i. 131.17 (*on* i. 1.69)

अनुक्तप्रदर्शनार्था (anuktapradarśanārthā) *adj.* (*f.*) meant for the indication of that which is not stated यदा कतिपयोक्तिरनुक्तप्रदर्शनार्थापि भवेत् ŚrutaPra. ii. 563.22 (*on* iii. 4.46)

अनुक्तप्रयोजन (anukta-prayojana) *adj.* [*f.*-ā] purpose of which has not been stated यदन्यदल्पायाससाध्यमपि किंचित् शास्त्रं लौकिकं वौदनपाकादि कर्म, तदप्यनुक्तप्रयोजनं नाद्रियन्ते Kāśi. i. 5.14 (*on* 1.12); तदियमुपायतः स्वरूपतश्च प्रचिता श्रोतृणां श्रवणेच्छामपि कारयितुमनुक्तप्रयोजना सती न शक्येति युक्तं प्रयोजनाभिधानम् Kāśi. i. 6.10 (*on* 1.13)

अनुक्तप्राय (anukta-prāya) *adj.* almost not stated तथावदुदाहरणत्वेन वाक्यविशेषानुपादाय विमर्शपूर्वकं पूर्वोत्तरपक्षोपालम्भसाधनाभ्यां न प्रपञ्च्यते तावदनुक्तप्रायं अकार्यकारित्वात् NyāySu.(Ja.) 124A.6 (*on* i. 1.6)

अनुक्तप्रायश्चित्त (anukta-prāyaścitta) *adj.* I for which expiation has not been stated ततः संध्यामुपासीत शुद्ध्येत्तु तदनन्तरम्। इति, तदनुक्तप्रायश्चित्तश्राद्धविषयम् Mitā. 495.6 (*on* 3.289); विशेषतोऽनुक्तप्रायश्चित्तेषु पापेषु चान्द्रायणेन शुद्धिः DīpKa. 109.23 (*on* 3.327); II for (the killing of) which no expiation has been stated यानि चान्यानि भूतानि एषामनुक्तप्रायश्चित्तेषु वधं कृत्वा प्राजापत्यं समाचरेत् LaŚātāSm. 16.

अनुक्तप्रायश्चित्तत्व (anuktaprāyaścitta-tva) *n.* the state of being one in whose case no expiation has been stated मध्यत्वयोः क्षत्रियवैश्यचोरनुक्तप्रायश्चित्तत्वेऽपि अर्थात् पादोनार्धकृच्छ्रौ वेदितव्यौ VīraMi.(Saṁskāra.) 152.3.

अनुक्तप्रायश्चित्तविशेष (anukta-prāyaścittaviśeṣa) *adj.* for which specific expiation is not stated स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्। अभोजनमुपवासः। अनुक्तप्रायश्चित्तविशेषातिक्रम एतत् Aparā. 1188.3 (*on* 3.292); द्रव्याणाम् ··· अनुक्तप्रायश्चित्तविशेषाणां मधुसिक्थकादीनां परगृहाच्चौर्यं कृत्वा तदपहृतं द्रव्यं स्वामिने दत्वा सांतपनकृच्छ्रं प्रायश्चित्तं वक्ष्यमाणं चात्मशुद्धये कुर्यात् ManvaMu. 483.22 (*on* 11.164)

अनुक्तप्रायश्चित्तविषया (anuktaprāyaścitta-viṣayā) *adj.* (*f.*) referring to that (sin) for which no expiation has been stated ननु च गुरुलघुभावः पापस्य कथं ज्ञायते। प्रायश्चित्तमहत्त्वादिति चेत्, अनुक्तप्रायश्चित्तविषयेयं कल्पना ManuBh. ii. 436.20 (*on* 11.208)

अनुक्तफल (anukta-phala) *adj.* in respect of whom the fruit or reward (of feeding) is not mentioned इतरेभ्यो विशेषेणानुक्तफलेभ्यः पङ्क्तिभोजनानर्हेभ्यः स्तेनादिभ्यो यथाकीर्तितेभ्यो यद्दत्तमन्नं तद्दातुर्भोजनार्थं मेदोरुधिरमांसमज्जास्थि भवतीति पण्डिता वदन्ति ManvaMu. 123.16 (*on* 3.182)

अनुक्तफलपाकसमय (anukta-phalapākasamaya) *adj.* in case of which the time for the fulfilment of the fruit is not mentioned विहितविशेषशान्तय आदित्योत्पाताः। अत्रानुक्तफलपाकसमयानां सूर्यादिभुतानां पक्षेण फलपाको बोद्धव्यः AdbhuSāg. 19.15.

अनुक्तभ (anukta-bha) *n.* zodiacal sign which has not been stated अनुक्तभानां यदि याम्यवृत्तिं करोति वृष्टिं कलहं नृपाणाम्।··· सद्यामयाप्रीतिरतीवदुःखं करोति याम्योपगतश्च मानाम् VasiS. 3.14; 8.3; 22.6.

अनुक्तभप (anuktabhap-a) *m.* lord of the zodiacal sign which has not been stated द्र्येकानुक्तभपान् सुहृत्समरिपून् संचिन्त्य नैसर्गिकांस्तत्काले च पुनस्तु तानतिसुहृन्मित्रादिभिः कल्पयेत् Bṛhajjā. 2.18.

अनुक्तभाषण (anukta-bhāṣaṇa) *n.* speaking of what is unspeakable रेतोमूत्रपुरीषाणामुत्सर्गेऽनुक्तभाषणे ··· आचान्तोऽप्याचमेत् पुनः PadmP. i. 52.2.

अनुक्तभोजिन् (anuktabhoj-in) *adj.* who eats what is not prescribed (द्विजाः) अनुक्तकारिणोऽनुक्तभोजिनोऽनुक्तसेवकाः। दैवे पित्र्ये न वै पूज्याः BṛBrahmaS. iv. 4.61.

अनुक्तमन्त्र (anukta-mantra) *adj.* [*f.*-ā] for which the *mantra* is not prescribed क्रियास्वनुक्तमन्त्रासु योजयेदपरां बुधः। विषादिसकलान्ते च तद्वदेव परापरम् MālinīT. 9.72; अन्येषां परिवार(?रा)णां नाममन्त्राः प्रकीर्तिताः। अनुक्तमन्त्रे सर्वत्र विधिरेष शिवोदितः MahNirvāT. 13.114; *m.* I *mantra* (in which the name of the deity is) not mentioned अनुक्तमन्त्रे सर्वत्र विधिरेष प्रकीर्तितः MahNirvāT. 9.208; II *mantra* not (specifically) mentioned अर्पणं कारणादीनां सर्वमेव प्रदर्शितम्। अनुक्तमन्त्रा ये तत्र तानेवात्र शृणु प्रिये MahNirvāT. 13.211.

अनुक्तमन्त्रक (anuktamantra-ka) *adj.* in respect of which the *mantras* are not (specifically) mentioned एते सूर्यादयो ग्रहयज्ञोक्तविधिना पूजनीयाः, अनुक्तमन्त्रकाणां तु प्रणवादिभिश्चतुर्थ्यन्तैर्नामभिर्नमोऽन्तैः स्थापनादि विधेयम् CaturCin. i. 172.8.

अनुक्तमात्र (anukta-mātra) *adj.* merely not mentioned or introduced अविशिष्टपरित्यागादेतदपि हानिरेवेति चेन्न, विशिष्टत्वस्यानुक्तमात्रस्य चापरित्यागात् NyāyPari. 178.4.

अनुक्तमात्राक्षेप (anuktamātrākṣepa) *m.* implication of what is not stated at all यथायथमसिद्ध्यन्यतमस्यारोप्यं व्याप्तिमनपेक्ष्यानुक्तमात्राक्षेपे त्वत्पक्षहानिरपि स्यात् TārkiRa. 266.10.

अनुक्तमान (anukta-māna) *adj.* I for which the (linear) measure is not (specifically) mentioned हर्म्यमूले तले चोर्ध्वे सर्वत्र परिकल्पयेत्। अन्यान्यनुक्तमानानां चाहं युक्त्या प्रयोजयेत् MānaSā. 30.42; II for which the qualitative measure is not prescribed or mentioned अनुक्तमानारिष्टेषु द्रवद्रोणे तुलां गुडम्। क्षौद्रं क्षिपेद् गुडादर्धं प्रक्षेपं दशमांशिकम् ŚārṅgaS. ii. 10.3; BhāvPra.(Bhā.) 7(2).69; *n.* measurement other than the one (specifically) mentioned कुर्यात्तु तुल(पा)मूले(लं) तु यद्यद् बलार्थ(र्थं) शोभितम्। उक्तादनुक्तमानं चेद् विस्ती(स्त)रं स्थिरमावहेत् MānaSā. 18.135.

अनुक्तमृगवध (anuktamṛga-vadha) *m.* killing of an animal that is not mentioned (वधात्) अक्रव्यादमृगवधे वत्सतरीम्। अनुक्तमृगवधे त्रिरात्रं पयसा वर्तेत ViṣṇuSm. 50.42.

अनुक्तयुक्त्याद्युपन्यास (anuktayuktyādy-upanyāsa) *m.* putting forth of arguments etc. not stated (earlier) अतः स्थूणानिखननन्यायादनुक्तयुक्त्याद्युपन्यासाच्च नात्र पौनरुक्त्यं दोषाय SāṁkhyaPraBh. 147.5 (*on* 6.0)

अनुक्तरक्तकुसुम (anukta-raktakusuma) *n.* red flower which is not prescribed अनुक्तरक्तकुसुमदानादौरभियमाप्नुयात् ViṣṇuDhaP. ii. 91.15.

अनुक्तरूपशेषत्व (anuktarūpa-śeṣatva) *n.* *śeṣa*-status characterised as the meaning not covered so far यत एव 'तस्यापत्यम् अण्' इति न्यासेऽन्यशब्दसंबद्धापत्यार्थस्यानुक्तरूपशेषत्वमनुक्ताकारे LaŚabdaŚe. i. 20.2

अनुक्तर्षिसूक्त (anuktarṣi-sūkta) *n.* hymn for which the seer is not mentioned सर्वत्रानुक्तर्षिसूक्तेषु प्रागुक्तर्षिरिति विजानीयात् BṛSarvaAnu. 1.12 (1.32)

अनुक्तलक्षण (anukta-lakṣaṇa) *adj.* characteristic features of which are not specified कामरूपारूप्यधातवोऽनुक्तलक्षणा इत्यतः पृच्छति। तत्र कतमे ते कामरूपारूप्यधातव इति Sphuṭā. iii. 1.4 (*on* 3.0)

अनुक्तवचन (anukta-vacana) *n.* statement of what is omitted वार्त्तिकग्रहणेन च दुरुक्तभङ्गमनुक्तवचनं च समाधत्ते Kāśi. i. 2.13 (*on* 0.2)

अनुक्तवत् (an-uktava(n)t) *adj.* who has not uttered (a word) तथैकोनं शतं नृणां शुश्रूषूणामकल्मषम्। अनुक्तवच्च त्वहं तत् कर्मणः करणे क्षमम् AVPari. 70(2). 2; त्वां विना का(? धा)रयेत्को नु ··· धराम्। अनुक्तवति तस्मिंस्तु स्वयमेवाब्रवीन्मुनिः GaṇeP. i. 90.3; वाच्यवैचित्र्यरचनाचारु वाचस्पतेरपि। दुर्वचं वचनं तेन वक्तु तत्राप्यनुक्तवान् VyaktiVi. 47.21; Kāvyānu.(He.) 205.4.

अनुक्तवत्त्वविधि (anuktavattva-vidhi) *m.* assertion of being other than referred to what is word *ukta-vat* उक्तवत्त्वप्रतिषेधो ह्यत्राभिमतः नानुक्तवत्त्वविधिः Kāvyānu.(He.) 205.20.

अनुक्तवत्त्वानुवाद (anuktavattvānuvāda) *m.* restatement of being other than what is referred to by the word *ukta-vat* अत्र नोक्तवानिति निषेधो विधेयः।··· न चानुक्तवत्त्वानुवादेनान्यदत्र किंचिद्विहितम् Kāvyānu.(He.) 205.7.

अनुक्तवर्ष (anukta-varṣa) *n.* year not prescribed उक्तेऽपि वर्षे न गुरुर्वली चेच्छ(? च्छा)न्त्या प्रशस्तं व्रतबन्धकर्म। अनुक्तवर्षेऽपि बलप्रदोऽपि न वै तयोरव्दबलो बलीयान् VasiS. 29.7.

अनुक्तवस्त्वन्तर (anukta-vastvantara) *n.* something else which is not mentioned उपबृंहणं नाम किं यथोक्तानुवादमात्रम्, उत तद् व्यक्तीकरणम्। अथानुक्तवस्त्वन्तरवर्णनम् ŚatDū. 191.25.

अनुक्तवाक्य (anukta-vākya) *adj.* in which no words are uttered नियन्त्रितश्वासमनुक्तवाक्यं निरस्तपल्यङ्कमशब्दभूषम्। निगूढदीपं विजनेऽपि चौर्यरतं स्मरस्मेरदृशः स्मरामि PadyaVe. 411.

अनुक्तवाग्देवतान्यास (anukta-vāgdevatānyāsa) *m.* placing of the deity of speech (on bodily parts) which is not mentioned (before) अयं विधिर्ध्वर्थः। अतस्तस्य द्वयं प्रयोजनम् — अनुक्तवाग्देवतान्यासप्राप्तिर्विभावनपरिसंख्या चेति SetuBa. 297.17.

अनुक्तवारतिथि (anukta-vāratithi) *m., f.* day of the week and the lunar day which are prohibited अनुक्तवारतिथिषु त्वमायां विष्टिपातयोः। औपधेन युतं तैलं न दूष्यं ग्रहणं विना VasiS. 15.10.

अनुक्तविधिक (anuktavidhi-ka) *adj.* not having a prescribed rule सर्वेषु दानेषु अनुक्तविधिकेषु च। अग्निं ब्रूम इति सूक्तम् आज्यतन्त्रेण होमयेत् AVPari. 14(1).9.

अनुक्तविभावाद्यूहन (anuktavibhāvādy-ūhana) *n.* guessing of the determinants or stimulants etc. which are not mentioned तथाशब्दा अनुक्तविभावाद्यूहनार्था इति यथायोगं योज्यम् AbhinBhā. i. 332.14 (*on* 6.82)

अनुक्तविशेष (anukta-viśeṣa) *adj.* particular features of which are not mentioned अनुक्तविशेषेषु च शाणक्षौमादिषु द्रव्याणां मूल्यह्रासवृद्धिज्ञः ··· यद् ब्रूयुस्तदसंशयं दाप्यमिति VīraMi. 658.24 (*on* 2.181)

अनुक्तविशेषदण्ड (anukta-viśeṣadaṇḍa) *adj.* for which a particular fine is not stated द्रव्याण्यनुक्तविशेषदण्डानि कटकानि ताम्रघटादीनि यो यस्य ज्ञानादज्ञानाद्वा नाशयेत्स तस्य द्रव्यान्तरादिना तुष्टिमुत्पादयेत् ManvaMu. 341.7 (*on* 8.288)

अनुक्तविशेषपर (anuktaviśeṣa-para) *adj.* concerning that where particular (fine) is not mentioned अथ वृक्षादिच्छेदे तद्दण्डस्तत्र कात्यायनः — वनस्पतीनां सर्वेषामुपभोगो यथा यथा। तथा तथा दमः कार्यो हिंसायामिति धारणा। एतदनुक्तविशेषपरम् DaṇḍaVi. 323.19.

अनुक्तविशेषशान्ति (anukta-viśeṣaśānti) *adj.* for which a propitiatory rite is not specifically prescribed अनुक्तविशेषशान्तिष्वगस्त्याद्युक्तेषु अगस्त्यादिपूजापूर्विका ··· सामान्यशान्तिः AdbhuSāg. 207.4.

अनुक्तविषया (anukta-viṣayā) *adj.* (*f.*) **A1** in which the object is not mentioned अनुक्तविषयाशङ्का सर्वस्याप्रतिषेधतः। यदि वाभावविषया न ह्यभावो निषिध्यते BṛĀraUBhVā. ii. 3.204; **A11** where the (relevant) object is not mentioned स्वरूपोत्प्रेक्षा उक्तविषयानुक्तविषया चेति द्विविधा Kuval. 35(5); AlaṅkāMañ. 39.11; **B** (an-uktaviṣayā) not being in the range of statement (i.e. not possible to be talked of) दुरितस्य चित्ताशुद्धिहेतुत्वेन तन्नाशे ज्ञानोदयो यतोऽतो मर्यादामार्गे मुक्तिरनुक्तविषयेति प्राप्त उच्यते AnuBh. 310.19 (*on* iv. 1.13) (better read अनुक्तिविषया cf. BI. Ed. 1897)

अनुक्तवृत्ति (anukta-vṛtti) *adj.* whose means of livelihood is not specified अनुक्तवृत्तिस्त्वज्ञातः परपूर्वापतिस्तथा। अजापालो माहिषिकः कर्मदुष्टाश्च निन्दिताः।··· पितृश्राद्धेषु वर्जिताः BṛParāSm. 7.9.

अनुक्तवेलाविशेष (anukta-velāviśeṣa) *adj.* for which specific time has not been prescribed अनुक्तकाल(v. l. वेला)विशेषाणां द्विव्यानां पूर्वाह्ण एव कालः VyavaNi. 142.10.

अनुक्तवैधर्म्य (anukta-vaidharmya) *adj.* in which dissimilarity is not mentioned (प्रतीपभेदः) पञ्चमस्त्वनुक्तवैधर्म्ये व्यतिरेके (अन्तर्भवति) RasGaṅ. 669.23.

अनुक्तशाखिन् (anuktaśākh-in) *adj.* who belongs to the Vedic branch in which (purifying ablution) is not prescribed मलस्नानेऽपि नित्यग्रहणमनुक्तशाखिनामपि तस्य नित्यत्वं यथा स्यात् SmṛtiCan. ii. 486.1.

अनुक्तशुद्धि (anukta-śuddhi) *f.* purificatory rite which is not mentioned पापानुबन्धं पुरुषस्य शक्तिं देशं च कालं च तथा विदित्वा। अनुक्तशुद्धिः प्रविचार्य देया ViṣṇuDhaP. iii. 234.159.

अनुक्तशेषत्व (anukta-śeṣatva) *adj.* whose accessory nature is not declared एवत्रासति सामर्थ्ये मन्त्रः शेषोऽभिधीयते। अन्यत्रानुक्तशेषत्वं सामर्थ्ये संप्रतीयते TantrVā. 841.3 (*on* iii. 3.14)

अनुक्तषडङ्ग (anukta-ṣaḍaṅga) *adj.* (a *mantra*) whose six parts are not known अनुक्तषडङ्गस्य षड्जातियुक्तमायया षडङ्गम् ParāśuKS. 10.3 (255.22); मन्त्रेऽनुक्तषडङ्गे तु मायापड्दीर्घजातियुक् NityoNi. 153.8.

अनुक्तसंस्थान (anukta-saṁsthāna) *adj.* situated in a position not (specifically) stated उक्तादन्यस्थान एको दुर्भिक्षकरः। उक्तसंस्थानोऽनुक्तसंस्थानो वा द्व्यादिर्नृपविनाशाय AdbhuSāg. 21.4.

अनुक्तसंख्य (anukta-saṅkhya) *adj.* in whose case (specific) number is not mentioned अनुक्तसंख्येषु च सूक्तादिषु प्रत्यहं शतमष्टोत्तरं जप्यम् ManvaVi. 1467.17 (*on* 11.248)

अनुक्तसंख्या (anukta-saṅkhyā) *f.* number (the referent of) which is not mentioned तत्साद्गुहबिवृमते ऽधिरथशतं देयमिति ·· गवामिति शेषः। अनुक्तसंख्या गोगामिनीति न्यायात् VīraMi.(Saṁskāra.) 853.24.

अनुक्तसंग्रहार्थ (anuktasaṅgrahārtha) *adj.* meant for the inclusion of what is not mentioned पूर्वाधिगतमपिशब्दमनुक्तसंग्रहार्थं स्वीकृत्य BālamBha. i. 71.25 (*on* 1.14)

अनुक्तसम (anukta-sama) *adj.* [*f.* -ā] as good as not said न च वेदवचः किंचिद् द्विजातित्वादिम(?)साधकम्। व्यक्तेः सामान्यवचनमनुक्तसममेव तत् PramāVāBh. 12.3; सा वागुक्ताप्यनुक्तसमा यत्र नास्ति सद्युक्तिः NītiVā. 15.16.

अनुक्तसमत्व (anuktasama-tva) *n.* the state of being as good as not said एतदविदितत्व(दविदित्वा य)दृष्टत्वाशब्दोऽत्र छन्दोनिबद्धनिमित्ता(त्त?) निर्गीतत्वे वर्तत इत्याहुः तदसत्। अनुक्तसमत्वादस्य AbhinBhā. i. 226.21 (*on* 5.57)

अनुक्तसमस्तसंग्रह (anuktasamasta-saṅgraha) *m.* inclusion of all that is not mentioned चशब्दाद्वा अनुक्तसमस्तसंग्रहः NyāyPari. 271.2.

अनुक्तसमाख्यान्तर (anukta-samākhyāntara) *n.* another name which is not mentioned अपकर्षसमसमाख्यानिरुक्तिमात्रेण संग्रहे संभवत्यनुक्तसमाख्यान्तरोन्नीतिश्चायुक्ता NyāyPari. 249.17.

अनुक्तसमान (anukta-samāna) *adj.* as good as not said इदं त्वनुक्तसमास(?नं) निर्वचनशब्देनोक्तत्वादर्थस्य AbhinBhā. iii. 171.12 (*on* 20.46)

अनुक्तसमासान्त (anukta-samāsānta) *adj.* in which the *samāsānta*-suffix (causing a change at the end of a Cpd.) is not prescribed earlier अनुक्तसमासान्ताच्छेषाधिकारस्याद् बहुव्रीहेः कप् वा स्यात् SiddhāKau. 200B.18 (*on* v. 4.154)

अनुक्तसमासान्तत्व (anuktasamāsānta-tva) *n.* the state of having *samāsānta*- suffix (which causes change at the end of a Cpd.) which is not prescribed earlier अद्रल इति। अस्य वैकल्पिकत्वेऽप्यनुक्तसमासान्तत्वाभावादन न कप् LaŚabdeŚe. ii. 116.12.

अनुक्तसमुच्चय (anukta-samuccaya) *m.* inclusion of what is not (directly) mentioned अत्र 'विद्यां चाविद्यां च' इति चशब्दावनुक्तसमुच्चयपरौ ŚrutaPra. iA. 67.8 (*on* i. 1.1); चकारेणानुक्तसमुच्चयाच्च कृत्स्नस्यापि तन्त्रान्तरसिद्धान्तस्य विशेषतः श्रीकरस्य मोक्षमदस्यं च सिद्धम् PāñcRāRa. 31.5; वसिष्ठश्चेति चोऽनुक्तसमुच्चये, तेनान्येषामपि ग्रहणम् VīraMi. 16.16 (*on* 1.5); केचित्तु वायसेभ्यश्चेति पठन्तश्चकारेणानुक्तसमुच्चयमाहुः VīraMi. 197.27 (*on* 1.103); वाशब्दोऽनुक्तसमुच्चये तेन फाल्गुनोऽपि ग्राह्यः VīraMi.(Rājanīti.) 330.19.

अनुक्तसमुच्चयार्थ (anuktasamuccayārtha) *adj.* meant for inclusion

of what is not (directly) mentioned अनुक्तसमुच्चयार्थश्चकारः KāśiVṛ. *on* ii. 4. 18 = *on* iii. 1. 126 = *on* iii. 2.26 = *on* iii. 2. 30 = *on* v. 4.25; Prasā. i. 459. 19; चकाराधिकारोऽनुक्तसमुच्चयार्थः KātanVṛ. *on* i. 2.2; चकारोऽनुक्तसमुच्चयार्थः KātanVṛ. *on* iii. 6. 86 = *on* iv. 6. 91 = *on* iv. 6. 104 = Nyās. i. 139.8 (*on* i. 1.74) = Bhām. 131.10 (*on* i. 1. 8) = SāṁkhyaTaKau. 215.1 (*on* 7) = Prasā. i. 826. 9 = ii. 556. 22 = SiddhāKau. 508B.15 (*on* iii. 2.188); स चानुक्तसमुच्चयार्थः Nyās. i. 72.12 (*on* i. 1.23) = i. 223.8 (*on* i. 3. 16); i. 146.9 (*on* i. 2. 6); i. 404.15 (*on* ii. 3. 9); चशब्दोऽनुक्तसमुच्चयार्थः BālaKrī. i. 46.8 (*on* 1. 29) = SmṛtiCan. iv. 573.4 = NyāySu.(Ja.) 136B. 9 (*on* i. 1.6); SiddhāKau. 427A. 4 (*on* vii. 4. 97) = GoviBh. 80. 7 (*on* i. 4. 24); वाशब्दश्चार्थेऽनुक्तसमुच्चयार्थः Bhām. 396.1 (*on* ii. 2.11) = PrakaVi. 490. 17; VedāntKau. 185. 23 (*on* ii. 2. 11); चकारादिति। अनुक्तसमुच्चयार्थादित्यभिप्रायः Prasā. i. 70. 17; तुशब्दोऽनुक्तसमुच्चयार्थः JñānBiPra. 9.14; एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित् SiddhāKau. 127A. 2 (*on* iv. 1.5); 'चः' एवार्थोऽनुक्तसम(?मु)च्चयार्थो वा Bhāsk. i. 93. 15 (*on* i. 2. 3)

अनुक्तसमुच्चयार्थक (anuktasamuccayārtha-ka) *adj.* meant to include what is not mentioned कृत्तद्धितसमासाश्चेत्यनुक्तसमुच्चयार्थकचकारेणैषां संग्रह इति मूलग्रन्थकृतः VaiyāBhū. 211. 22 (*on* 45)

अनुक्तसमुच्चयार्थकत्व (anuktasamuccayārthaka-tva) *n.* the state of being meant for inclusion of what is not mentioned इष्णुचो विधानं तु 'भुवश्चे'ति सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वेन वृत्तिकृता व्याख्यानान्(?त्) LalitāSaBh. 36. 26 (*on* 69)

अनुक्तसमुच्चयार्थत्व (anuktasamuccayārtha-tva) *n.* the state of being meant for inclusion of what is not mentioned एवं तर्ह्युत्तरसूत्रेऽनुक्तसमुच्चयार्थत्वाच्चकारस्य भविष्यतीत्यदोषः Nyās. i. 184. 9 (*on* i. 2. 43); i. 215. 3 (*on* i. 3.6); व्यवसितः प्रतिपन्न इत्यादिषु भावकर्मविहितोऽपि क्तः कर्तरि। गत्यादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् KāvyālaṅSū. v. 2.43; v. 2. 68; अकथितं चेत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वादत्र कर्मत्वमित्यन्ये DurghVṛ. *on* i. 4.52; *on* iii. 3.102; कुत्स्यत इति — कुत्सितं 'मति-' आदिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् वर्तमाने क्तः Pradī. iv. 398B.13 (*on* v. 3. 74); गुरोश्च हल इति चकारस्यानुक्तसमुच्चयार्थत्वात्। शोभा DhātuPra. 1. 753 (53. 2); चशब्दस्यानुक्तसमुच्चयार्थत्वादुपसर्जनत्वं स्यात् Prasā. i. 471. 20; i. 524.18.

अनुक्तसमुच्चायक (anukta-samuccāyaka) *adj.* which includes what is not mentioned चकारोऽनुक्तसमुच्चायकः SetuBa. 132. 27.

अनुक्तसमुदाय (anukta-samudāya) *m.* group of those who are not mentioned तत्रार्हतसौगतादिसमूहः संघः, चाण्डालादिसमूहो गुल्मः, अनुक्तसमुदायो वर्गः DaṇḍaVi. 267. 4.

अनुक्तसायंसंध्योल्लेख (anuktasāyaṁsandhyollekha) *m.* reference to the evening *sandhyā*-prayer which is not mentioned earlier न चैवं भाष्यादौ तत्र तत्रानुक्तसायंसंध्योल्लेखोऽपि किमर्थमिति वाच्यम् BālamBha. i. 103.12 (*on* 1.24½)

अनुक्तसिद्ध (anukta-siddha) *adj.* [*f.* -ā] established or known even though not mentioned इतरे तु गती बुद्धस्यानुक्तसिद्धे AbhidhKoBh. 425.12 (*on* 7. 47); वाङ्मनोनमस्कारोऽप्यत्रानुक्तसिद्धः Sphuṭā. i. 6. 26 (*on* 1. 1); अनन्तत्वमपि तल्लिङ्गमित्यनुक्तसिद्धम् ŚivārkaMaDī. i. 267. 14 (*on* i. 1. 23); ब्रह्मत्वे प्राणादित्युक्त्या ब्रह्म तदितरव्यवच्छेदे चानुक्तसिद्धे सति ब्रह्मैव सन्निति वा न वदेत् AṇuBh. 317.15 (*on* iv. 2. 1)

अनुक्तसिद्धत्व (anuktasiddha-tva) *n.* the state of being established or known even though not mentioned यत्किंचिदानन्तर्यं हि न वक्तव्यमनुक्तसिद्धत्वात् SiddhāSi. i. 14. 17.

अनुक्तसिद्धि (anukta-siddhi) *f.* comprehension or assumption (of something) even though (it is) not stated (listed as one of the characteristics of a good dramatic composition) प्रस्तावेनैव शेषोऽर्थः कृत्स्नो यत्र प्रतीयते। वचनेन विनानुक्तसिद्धिः सा परिकीर्तिता NāṭyaŚā. 16. + 40; NāṭaLaRaK. 1713; अनुक्तसिद्धिः कार्यं च परिहारस्तथाश्रयः BhāvPra.(Śā.) 223. 21(8); अनुक्तसिद्धिरुक्तार्थस्यान्यथासिद्धिरुच्यते BhāvPra.(Śā.) 225. 21 (8); आगमार्थो न कथितोऽपि सिध्यतीत्यनुक्तसिद्धिः NāṭaLaRaK. 1718; अनुक्तसिद्धिः सारूप्यम् ···षट्त्रिंशद् भूषणानि हि RasāSu. 248.7 (3. 100); अनुक्तस्यापि मेनकाविश्वामित्रसंगमस्य प्रतीतेरियमनुक्तसिद्धिः RasāSu. 260. 16 (3. 120); (नाटके) अनुक्तसिद्धिः प्रियवचस्तथा SāhiDa. 335. 4; विशेषार्थोहविस्तारोऽनुक्तसिद्धिरुदीर्यते SāhiDa. 343.19.

अनुक्तसुज्ञान (anuktá-sujñāna) *adj.* which can be easily known (though) not stated अनुक्तसुज्ञानस्यार्थस्य पुनर्वचनं प्रयोजनापेक्षमिव दृश्यत इति मन्वानं प्रति प्रयोजनमाह Kāśi. i. 13.12 (*on* 1.32)

अनुक्तस्थल (anukta-sthala) *n.* place not (specifically) mentioned अनुक्तस्थलेषु यात्रायोजनसंख्यया कृच्छ्रसंख्यया विज्ञेया BālamBha. iii. 199.7 (*on* 3. 327)

अनुक्तस्थान (anukta-sthāna) *n.* [Loc.] in place of the word *anukta* (not mentioned) अनुक्तस्थाने चाप्रतिपादितकरणेऽपि दोषः KhaṇḍanKhā. 972. 12.

अनुक्तस्थानग (anuktasthānag-a) *adj.* existing at a place which is not prescribed द्वारप्राकारपीठाद्यमनुक्तस्थानगं यदि। परिवारं च तत्रोक्तस्थाने कुर्यात् सलक्षणम् ĪśānŚiPa. ii. 35.5 = ŚilpaRa. ii. 29.14.

अनुक्तस्वरूप (anukta-svarūpa) *adj.* whose real nature is not stated अनुक्तस्वरूपस्य (प्रलयस्य) अनिमित्तत्वमेव प्रतिपादयितुं न शक्यते TātpaṬ. (U.) 121.16 (*on* 4. 2) = YuktiSneha. 36. 25 (*on* 1.1.4)

अनुक्तहितकारिता (anuktahitakāri-tā) *f.* the state of doing beneficial (things) even though unasked अनुक्तहितकारिता हि प्रकाशयति मनोगतां स्वामिभक्तिम् VeṇīSaṁ. 6. 165.

अनुक्तांश (anuktāṁśa) *m.* portion not stated or mentioned शास्त्रान्ते च सूत्राभ्यासफलमनुक्तांशज्ञापनम् ŚrutaPra. iA. 22. 17 (*on* i.1.1); ii. 336.16 (*on* ii. 2 42); अनुक्तांशदर्शनादिलोपप्रसक्त्यास्य NyāyPari. 480. 12; अनुक्तांशेऽनुक्तेरेवोपसंहारन्तत्काल्पनाभावात् ŚatDū. 192.9; क्वचिदनुक्तांशस्योक्तिः NyāySu. (Ja.) 8B. 2 (*on* i.1.1); प्रकृतिमहदादेरनुक्तांशस्यावश्यकत्वाद्योगोऽस्ति VedāntKau. 221. 6 (*on* ii. 3.15)

अनुक्ताकाङ्क्षित (anuktākāṅkṣita) *adj.* required even though not mentioned स ह्यनुक्ताकाङ्क्षितस्वीकारफलः ŚrutaPra. iA. 53.17 (*on* i. 1.1)

अनुक्ताङ्ग (anuktāṅga) *n.* part that is not mentioned अथानभिहितस्थानमनुक्ताङ्गविरूपता। अचोदितालंकरणमन्यत्रानिष्टदुःखदम् ĪśānŚiPa. ii. 35. 32; अत्र सुवर्णपरिमाणचतुर्थांशवत्सनिर्माणादिरनुक्ताङ्गोपसंहारः पूर्वोक्तसुवर्णेनैरवगन्तव्यः CaturCin. i. 437.21.

अनुक्तातिदेश (anuktātideśa) *m.* extended application of what is not mentioned अनुक्तातिदेशमाह JayaMa. 103.23 (*on* 2.2)

अनुक्ताधिकार (anuktādhikāra) *adj.* whose eligibility or right is not prescribed ये पुनः केचनाह्लवचनेनानुक्ताधिकारास्ते तदीयेभ्यः श्राद्धं कुर्युः CaturCin. iii(1). 115.20.

अनुक्ताध्यापक (anuktādhyāpaka) *m.* excellent teacher (*lit.* teacher who is not spoken ill of) अनुक्त। अनुक्ताध्यापकः KāśiVṛ. *on* viii. 1. 67.

अनुक्तानादर (anuktānādara) *m.* disregard for those which are not stated किं कतिपयोक्तिरनुक्तानादरमूलैव स्यात् ŚrutaPra. ii. 563. 18 (*on* iii. 4 46)

अनुक्तान्तस्ताप (anuktāntastāpa) *adj.* whose internal distress is not revealed अनारब्धाक्षेपं परमकृतवाप्यव्यतिकरमनुक्तान्तस्तापं हृदयविनिगीर्णव्यवसितम्। कृताज्ञया यत्पापे व्रजति मयि नैराश्यविधुरं क्व तैल्ल्यं(?कं) हृदयमिदमुन्मूलयति तद् Subhāṣi. 1333 (correct s. v. अनारब्धाक्षेपम् to अनारब्धाक्षेप *adj.* that has not started to abuse or reproach)

अनुक्तान्यकर्तृक (anuktānyakartṛ-ka) *adj.* not having any other performer prescribed क्वाभिषेकवर्ता तु पुरोहित एव। अनुक्तान्यकर्तृकेषु राजसंबन्धिकार्येषु तस्यैव कर्तृत्वदर्शनात् VīraMi.(Rājanīti.) 378.3.

अनुक्ताभोगवस्तु (anuktābhoga-vastu) *n.* composition in which the completion (i. e. the concluding portion) is not mentioned अनुक्ताभोगवस्तूनां पदैराभोगकल्पना SaṅgīRa. ii. 334. 1 (4.310)

अनुक्तार्थ (anuktārtha) *m.* thing-meant which is not stated ततः सर्वशास्त्रोपसंहारश्लोकोऽयं नानुक्तार्थोपदेशकः ManuBh. ii. 271.28 (*on* 2.102); *adj.* whose meaning is not expressed प्रत्ययन्यायो ह्यनुक्तार्थस्वीकारफलः ŚrutaPra. iA. 93. 15 (*on* i. 1.1); कश्चिदयमनार्यैः एतोत्सवाद्यर्हदिभिः ··· श्लोकमनुक्तार्थं लिखति JayaMa. 40.11 (*on* 1. 3)

अनुक्ताश्रम (anuktāśrama) *m.* (*āśrama*) order of life not mentioned (in the Vedas) त्रैविद्यविदेति पाठे तेषां विद्यायां वेदत्रय्यामनुक्ताश्रमविशिष्ट इत्यर्थः। वेदवाह्यागमार्थानुष्ठातार इति यावत् BālamBha. i. 391.4 (*on* 1. 190)

अनुक्तासनयोग (anuktāsana-yoga) *m.* employment of a sitting posture which has not been mentioned अनुक्तासनयोगेषु सर्वत्रैवं प्रकल्पयेत् MālinīT. 23. 16.

अनुक्तास्पदा (anuktāspadā) *adj.* (*f*) topic of which is not mentioned संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना। उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे Kuval. 32.

अनुक्ति (an-ukti) *f.* non-statement, non-instruction, omission,

non-expression, absence of mention अनधिगतत्वादात्मनो युक्ता तदधिगमाय तद्विषया जिज्ञासा । कर्मविषये चानुक्तिस्तद्विरोधित्वात् KenUVāBh. 67.14 (*on* 1.1); याज्ञवल्क्यम् ··· जनकः पूर्वं पप्रच्छ । तत्रैव अनुक्तिः BṛĀraUBh. 514.10 (*on* iv. 3.1); उपमेयस्यानुक्तौ समानवस्तुन्यासः समासोक्तिः KāvyālaṅSū. iv. 3.3; ब्राह्मणस्य पुरानुक्तेस्तदुक्त्यर्था परा श्रुतिः BṛĀraUBhVā. i. 4.1634; हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते । शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रिरष्ट तत् KāvyPra. 646.1; साम्यस्य चोक्तावनुक्तौ चोपमेयस्याधिक्यं व्यतिरेकः Kāvyānu. (He.) 332.5; अनुक्ताविह तालः स्यात्त्रिधैवैककलादिकः SaṁgīRa. i. 271.1 (1(7).110); बाहुल्यं लिङ्गशब्दानामनुक्तिश्च विरुद्धता ··· पूर्वपक्षेषु युक्तयः AnuVyā. 12B.5 (*on* 1.3); 28A.6 (*on* 2.2); 48B.4 (*on* 3.3); अतः सकलमित्यन्वयमुखेनानुक्तिः ŚrutaPra. iA. 4.5 (*on* i. 1.1); आकाशस्यानुक्तिः ··· उपपद्यते VedāntPāSau. 215.4 (*on* ii. 3.6); अत्र च शीलादीनामनुक्तिरपकृष्टत्वकथनार्थम् ManvaVi. 104.3 (*on* 2.9); अनुक्तांशेऽनुक्तेरेवोपबृंहणत्वगन्धाभावात् ŚatDū. 192.10; निरूप्यनियम एव तस्यान्तर्भावादनुक्तिः NyāyPari. 171.2; यदुक्तं कार्पासादिदृष्टान्त इति तदुक्तिमात्रम् । युक्तेरनुक्तेः SarvaDaSaṁ. 3.31; (कलानाम्) तासामनुक्तौ भविताल्पवेदिता ŚaṅkaDigVi.(Mā.) 9.70; विषयादेः पूर्वं मुखतोऽनुक्तेस्तदनुवादपूर्वकं सूत्रं व्याचष्टे TattvPrakā. 23A.6 (*on* i. 1.22); 109B.8 (*on* ii. 3.8); 174A.6 (*on* iii. 3.35); उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः भेदाः SāhiDa. 542.11; 558.13; तदुत्तरमन्यस्यानुक्तेरानन्दमय एव परः AṇuBh. 31.2 (*on* i. 1.11); 348.16 (*on* iv. 4.6); नापि समासोक्तिः ।··· न च ··· शुद्धसादृश्यमूलोऽपि तस्या एव प्रकारो वाच्यः ··· व्यवस्थापकैस्तद्भेदताया अनुक्तेः RasGaṅ. 545.1; अन्तर्गृह इत्यनुक्तिरुक्तनिर्वचनस्मारणेन पुण्यातिशयवत्त्वद्योतनाय LalitāSaBh. 203.30 (*on* 242); बिन्दोः कण्ठरवेणानुक्तिः SetuBa. 49.22; 58.5; 175.22; वस्तुतस्तु यः प्रमायुकः स्यामित्यनुक्त्या होतृगत एवैष कामः प्रतीयते BhāṭṭCan. 115.8 (*on* xvi. 3.5); अत एवानुदात्ततरस्यानुक्तिः LaŚabdeŚe. i. 26.16; i. 385.19; i. 516.21.

अनुक्तिकारण (anukti-kāraṇa) *n.* [Abl.] because of non-statement निषेधाभ्यासो मा मेति ज्ञातब्रह्मप्रवादिनः । आबाधितधियाभ्यस्तो गार्ग्यस्यानुक्तिकारणात् BṛĀraUBhVā. ii. 1.47.

अनुक्तितस् (anukti-tas) *adv.* because of non-mention समाप्तः सप्तमोऽध्यायः प्राप्तावसर उच्यते । अष्टमः खिलकाण्डेऽस्मिन्पूर्वकाण्डेष्वनुक्तितः BṛĀraUBhVā. vi. 1.1.

अनुक्तित्रय (anukti-traya) *n.* three (types of) non-mention व्यतिरेकस्य हेतुः उपमेयगतमुत्कर्षनिमित्तम् उपमानगतमपकर्षकारणम् ··· एकतरस्य द्वयोर्वा अनुक्तिरित्यनुक्तित्रयम् KāvyPra. 647.2.

अनुक्तिनिदान (anukti-nidāna) *n.* reasoning for non-mention सूत्रकारैः सत्यज्ञानादीनां लक्षणत्वेनानुक्तिनिदानं च अनेनैव दर्शितं भवति ŚrutaPra. iB. 116.22 (*on* i. 1.2)

अनुक्तिप्रख्यातव्यप्रीतिबन्ध (anuktiprakhyātavya-pritibandha) *adj.* having the tie of friendship to be revealed without words नृत्यन्ति स्म प्रत्यनीकेष्वनुक्तिप्रख्यातव्यप्रीतिबन्धाः कबन्धाः RāmC. 30.69.

अनुक्तिप्रसङ्ग (anukti-prasaṅga) *m.* (undesired) contingency of non-mention अन्यथोभयान्तर्गतस्यैकत्राप्यनुक्तिप्रसङ्गः TattvPrakā. 86A.11 (*on* ii. 1.14)

अनुक्तियुत (anukti-yuta) *adj.* accompanied by silence संवादानुक्तियुता निग्रहाः PramāLa. 2A.2.

अनुक्तिविरोध (anukti-virodha) *m.* contradiction because of non-mention सर्वनामाभिधेयश्चेत्यनेनैवादित्यशब्दस्येश्वरवाचित्वं चोक्तं भवति । न चादित्येऽनुक्तिविरोधः TattvPrakā. 31A.10 (*on* i. 2.7)

अनुक्तिसंयुक्त (an-uktisaṁyukta) *adj.* accompanied by silence संवादानुक्तिसंयुक्ता एत एव तु निग्रहाः AnuVyā. 19A.7 (*on* 2.1)

अनुक्तिसंभव (anukti-sambhava) *m.* non-requirement of prescription कृदन्तत्वात् सिद्धौ निपातस्यानर्थकस्येति वार्तिकस्यानुक्तिसंभवापत्तेः VaiyāBhū. 48.15 (*on* 10)

अनुक्तिसंभावितत्व (anuktisambhāvita-tva) *n.* the state of being that which is made possible due to non-mention अयोग्यतानिश्चयरूपस्य तस्याप्रतिबन्धकताया अनुक्तिसंभावितत्वात् VaiyāBhū. 85.11 (*on* 22)

अनुक्तिसहत्व (anuktisaha-tva) *n.* the state of being that which is fit for non-mention स्वयमेव पत्नीसंयाजानां हारियोजनोत्तरत्वस्योक्तत्वेनैकदेशलक्षणाया अनुक्तिसहत्वात् BhāṭṭDī. iii. 64.17 (*on* ix. 1.9); iv. 39.21 (*on* xi. 5.25); iv. 231.22 (*on* xii. 1.10); मथिते मथनव्याप्यत्वयोग्यताया अनुक्तिसहत्वात् MīmāKau. i. 241.23 (*on* i. 4.12); ii. 7.21 (*on* ii. 3.1); iii(2). 295.26 (*on* ii. 2.27)

अनुक्तिस्वारस्य (anukti-svārasya) *n.* significance of non-mention श्रीशैलो मेरुको गिरिरिति ज्ञानार्णवेऽपि तत्संवादाद्भिन्नपदस्वारस्यान्मेरुपर्वत इत्यनुक्तिस्वारस्याच्च तथैवास्थेयम् LalitāSaBh. 169.17 (*on* 207); SetuBa. 287.23.

अनुक्तेन्द्रिय (anuktendriya) *n.* sense-organ which is not mentioned प्राणादीनामिन्द्रियत्वानिश्चयात् । तन्निश्चये सति ह्यनुक्तेन्द्रियग्रहणापेक्षा ŚrutaPra. ii. 125.17 (*on* i. 4.13)

अनुक्तोत्कर्ष (anuktotkarṣa) *adj.* superiority of which is not mentioned (अपरः पक्षः···श्राद्धस्य) ननु शुक्लपक्षादनुक्तोत्कर्षस्यापरपक्षस्य कथं दृष्टान्तता ManvaMu. 140.29 (*on* 3.278)

अनुक्तोत्तर (anuktottara) *adj.* who has not uttered (i.e. given) a reply उत्पलहस्तकः । अनुक्तोत्तर एवास्यै तथेति प्रतिपन्नवान् BṛKathāŚloSaṁ. 3.39.

अनुक्तोदाहरण (anuktodāharaṇa) *n.* illustration which is not mentioned तेषामनुक्तोदाहरणान्यूह्यानि MṛtaSaṁ. 53.1 (*on* 4.23)

अनुक्तोदाहरणान्तर (anuktodāharaṇāntara) *n.* another instance which is not mentioned एवं यद्यनुक्तोदाहरणान्तराणि संभवन्ति तदा जात्यन्तरं वा तत्संग्रहलक्षणं वा कल्पनीयमेव NyāyPari. 236.11.

अनुक्तोपयोग (anuktopayoga) *adj.* purpose or result of which is not mentioned सर्वं उद्भिदाद्यपि यत्पूर्वमनुक्तोपयोगं तत्तदर्थप्रकारविशेषोन्नयनेन प्रयोजनवदर्थपरमेव स्यात् MīmāKau. i. 157.2 (*on* i. 4.1)

अनुक्तोपसंहार (anuktopasaṁhāra) *m.* inclusion (for meditation) of what is not stated कचिदप्यनुक्तोपसंहारस्यानपेक्षितत्वात् ŚrutaPra. ii. 495.24 (*on* iii. 3.31)

अनुक्तोपसंग्रह (anuktopasaṅgraha) *m.* inclusion of what is not mentioned तथेति चानुक्तोपसंग्रहार्थम् BālaKrī. i. 10.2 (*on* 1.5)

अनुक्तोपाय (anuktopāya) *m.* means which is not mentioned लोकादनुसरणीयोऽनुक्तोपायस्तथा वशीभावे KandaCū. vi. 2.38.

अनुक्तोपालम्भ (anuktopālambha) *m.* blaming for what is not stated, objection against what is not said नाहमनुष्णमग्निं ब्रवीमीत्यनुक्तोपालम्भोऽयमित्येतत्प्रतिज्ञासंन्यासलक्षणं निग्रहस्थानमिति NyāySā. 24.9; नोच्यत इत्यादिना सिद्धान्तवादी चोदकस्यानुक्तोपालम्भमाह DharmoPra. 26.31; कथं पुनरनेन प्रमाणादिचतुर्वर्गोऽत्र लभ्यत इति वार्तिकमनुक्तोपालम्भो मा भूदित्यत आह । तेनेति NyāyVārPari. 129.7; तथा चेत्यादिना यतो भाष्ये लक्षणमप्युक्तं अतो वार्त्तिके तदाक्षेपो नानुक्तोपालम्भ इत्याह NyāyVārPari. 444.13; ŚatDū. 201.10; अन्यथा हि जिज्ञास्यत्ववादिनापि तन्मात्रालम्बनत्वानङ्गीकारादनुक्तोपालम्भः स्यादिति VedāntKa. 4.22 (*on* i. 1.1); किं त्वगृहीतविवेकस्य ज्ञानद्वयस्य प्राप्तसमीचीनपुरःस्थितरजतज्ञानसारूप्यस्येत्यनुक्तोपालम्भोऽयमिति चेत् — तदप्ययुक्तम् SarvaDaSaṁ. 16.498; न चास्य सूत्रस्येदं प्रतिपाद्यं व्यवस्थितम् । जगदुपादानत्वस्य प्रागनुक्तत्वेनानुक्तोपालम्भप्रसङ्गात् NyāySu.(Ja.) 295A.11 (*on* ii. 1.5); नाद्यः (पक्षः) ··· अनुक्तोपालम्भमात्रत्वे निरनुयोज्यानुयोगापत्तेः AdvaiSi. 369.1; अनुक्तोपालम्भ एषः, प्रकृष्टभावनाजन्यत्वस्य केवलज्ञानेऽभ्युपगमवादेनैव टीकाकृतोक्तत्वात् JñānBiPra. 20.25.

अनुक्तोपालम्भत्व (anuktopālambha-tva) *n.* the state of being an objection against what is not said प्राणादौ जनशब्दस्य समुदायैकदेशस्यार्थो नास्तीति जनशब्दस्य प्राणादौ कथं प्रयोग इति यच्चोद्यं तदचोद्यं स्यादनुक्तोपालम्भत्वादित्यर्थः VedāntKa. 207.18 (*on* i. 4.11)

अनुक्तोपालम्भन (anuktopālambhana) *n.* objection against what is not said सर्वत्र न बाधकत्वं वक्तुं शक्यम्, युक्त्यादिबाधकताया अनुस्त्रियमाणप्रत्यक्षगौरवनिबन्धनत्वात् इत्युक्तम् । एतदनुक्तोपालम्भनम् AdvaiSi. 391.11; 472.8; यदुक्तम् — विधानभेदे सत्येव वाक्यभेदः इत्येव नास्ति नियम इति, तन्नियमभञ्जनमनुक्तोपालम्भनम् PūrvottaVāNaMā. 26.14.

अनुक्तोपालम्भनता (anuktopālambhana-tā) *f.* the state of being an objection against what is not said एवं च भाविबाधशङ्कामादाय यत्परैर्दूषणमुक्तं तदनुक्तोपालम्भनतया अपास्तम् AdvaiSi. 393.3.

अनुक्तोपालम्भनत्व (anuktopālambhana-tva) *n.* the state of being an objection against what is not said न चैवम् ··· सुखादिकं प्रकाशत इत्यनुभवार्थं चितोऽज्ञानानवच्छेदेन प्रकाशोऽङ्गीकरणीय इति वाच्यम्, इष्टापत्तेः अनुक्तोपालम्भनत्वात् AdvaiSi. 587.19.

अनुक्त्वा (an-uktvā) *ger.* 1 not having uttered, not having expressly stated, not having told, not having informed, not having said (anything) अनुक्त्वा त्वं धर्ममेवं सभायामथेच्छसे पाण्डवस्योपदेष्टुम् MahāBhā. v. 29.35; अनुक्त्वा समरे तात शूरा युध्यन्ति शक्तितः MahāBhā. viii. 17.54; viii. 39.35; तेन संजातरोषेण रामेण ···। अनुक्त्वा परुषं किंचिच्छरैर्व्यापारितं धनुः Rāmā. iii. 34.7; vi. 75.25; कमप्यर्थं चिरं ध्यात्वा वक्तुं प्रस्फुरिताधराः । बाष्पस्तम्भितकण्ठत्वादनुक्त्वैव वनं गताः Prati. 2.17; निगद्यासौ सुनासीरं व्रीडानम्री-

कृतानना। न्यवीविददनुक्त्वैव यौवनाविनयं पुरा JānaHa. 6.15; हेतोरनैकान्तिकत्वं सामान्यदृष्टान्तेन परेण चोद्यते तस्यानैकान्तिकदोषोद्धारमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते NyāyVār. 559.4 (*on* v. 2.2); मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता। न शुश्रूषयितुं शक्या प्रागनुक्त्वा प्रयोजनम् ŚlokaVār. 1.13 (5.2); अनुक्त्वा वचनं किंचित्कृतं भवति कर्मणा BrahmP. 201 22; इति निश्चित्य सा नाथमनुक्त्वैव वराङ्गना। यथाशास्त्रं चचारोग्रं तथा नियममास्थिता YogVā. iii. 16.30; अनुक्त्वापसृते तस्मिंस्तत्संबन्धिनियोगिनाम्। पलायनव्यतिकरः कोऽपि जातो गृहे गृहे NarmaMā 3.89; यथात्रैव रूपरसगन्धानां पाकजत्वमनुक्त्वा सौरसाद्युक्तम् Kiraṇā. 57.18; गोविन्दे गुरुसंनिधौ परवशावेशादनुक्त्वा गते DaśāvaC. 8.175; अनुक्त्वैव परामृश्यं प्रयोगो यत्र यत्तदोः। निरन्तरः पुनस्तत्र तयोरुक्तिर्न दुष्यति VyaktiVi. 43.3; तीर्थे तदीये … इत्यत्र परामर्शनीयमर्थमनुक्त्वैव यस्तस्य तदा परामर्शः सोऽस्थानस्थपदत्वं दोषः Kāvyānu. (He.) 174.6; तद्वाचकैः पदैः साक्षादनुक्त्वा तस्य सिद्धये। भङ्ग्यन्तरेण कथनं पर्यायोक्तिरुदाहृता Mānaso. iv. 2.85(?285); भावज्ञः स महीपतेः। अनुक्त्वैव हितं तत्तत्प्राणांस्त्यक्त्वाप्यसाधयत् RājTa.(Ka.) 5.62; अनुक्त्वैव प्रचलिता राजधानीमलक्षिता। स्त्रीधर्मिण्यस्मि जातेति पश्चाद्वार्तां व्यसर्जयत् RājTa. (Ka.) 6.270; विपणः … पृष्टोऽनुक्त्वा निर्जगाम दीनवक्त्रो लतागृहात् SamarāSaṁ. 7.245; कथं तर्हि आकाशं वायुं चानुक्त्वा तेजआद्युद्भव उक्तः VedāntKau. 215.14 (*on* ii. 3.6); यस्तु जिह्वासहस्रः स्यात् जीवेच्च शरदां शतम्। अनन्यकर्मा स्त्रीदोषाननुक्त्वा निधनं व्रजेत् SūktiRa. 54.5; किं चेक्षतेर्गौणत्वकल्पनस्य बाधकाभावमनुक्त्वा आत्मशब्दादित्यसंगतम् NyāySu.(Ja.) 120A.6 (*on* i. 1.5); आनन्दस्य फलात्मकत्वेन साधनशेषभूते ब्रह्मणि तमनुक्त्वा यो वेदेत्यन्तयर्चा ब्रह्मविदित्येतावतो वाक्यस्य विवरणं क्रियते AnuBh. 28.5 (*on* i.1.11); 268.17 (*on* iii. 4.1); 320.25 (*on* iv. 2.5); रुद्रपदमनुक्त्वा सर्वानुस्यूतं शिवपदं प्रयुक्तम् LalitāSaBh. 233.22 (*on* 302); नमामि त्रिपुरामित्यनुक्त्वा नौमि श्रीत्रिपुरामित्युक्तम् SetuBa. 20.26; 44.4; (with grammatical object in Gen.) अद्य चैषा ममानुक्त्वैवागतेमं शिवालयम्। ततः प्रज्ञप्तिविद्यातो विज्ञायाहमिहागता KathāSaSāg. ix. 1.51; तावत्स सुमनःप्राप्त्यै भ्रान्तुं पाटलिपुत्रकात्। कन्दर्पोऽनिच्छतोऽनुक्त्वा केसटस्य ययौ ततः KathāSaSāg. xviii. 4.294; **ii** not having specified, not having explained लोकप्रतीतत्वात्तस्य खललक्षणमनुक्त्वा प्रभेद एव कथ्यते वर्णश्चतुर्विधो नीलादिरिति Sphuṭā. i. 28.15 (*on* 1.10); स्वयं ब्रह्मस्वरूपमनुक्त्वा तपसाधिकारातिशयक्रमेण स्वयमेव ज्ञास्यतीति तदेव साधनं सर्वत्रोपदिष्टवान् AnuBh. 28.19 (*on* i. 1.11); **iii** not having instructed, not having taught प्रब्रूहि अस्मै विद्यामिष्टाम् उपकोसलायेति। तस्मै एवं जायया उक्तोऽपि ह अप्रोच्यैव अनुक्त्वैव किंचित्प्रवासांचक्रे प्रवसितवान् ChāndoUBh. 234.6 (*on* iv. 10.2); **iv** not having pointed out न हि स्थूलां तारकाममुख्यामरुन्धतीमनुक्त्वा तत्समीपवर्तिनी सूक्ष्मा मुख्या अरुन्धती सौकर्येण निर्देष्टुं शक्यते PañcPra. 44.5; **v** not having prescribed संप्रति वषट्कारादिनिमित्तं भक्षमनुक्त्वाधिकरणसमाप्त्यैवान्तरा समाख्याभक्षप्रसङ्गमेवानुसरति ŚāstrDī. 287.10 (*on* iii. 5.7); शौचाचारादिशिक्षामुक्त्वास्तमिते संध्यामनुक्त्वा समिदाधानं ततो वाग्विसर्गः BālamBha. i. 103.20 (*on* 1.24½); एकैकामृचं संतन्वन्तीति विधावृचः संतन्वन्तीत्यनुक्त्वैकैकामित्युक्तेरेकैकस्या ऋचो यावव्ययवावर्धर्चौ तयोराम्नायपाठेन प्राप्तस्य मध्येऽवसानस्य निषेधः प्रतीयते BhāṭṭCan. 103.7 (*on* xvi. 1.7)

अनुक्थ (an-ukthá) *adj.* [*f.*-ā] **i** not knowing songs of praise or panegyrics किं मामनिन्द्राः कृणवन्ननुक्थाः ṚV. v. 2.3; **ii** not having songs of praise or panegyrics न सामानुक्थोऽप्रहोऽस्तीत्याहुरनायतनः सः KāṭhS. 30.7 (ii. 189.11); यदुक्थिन्योऽन्या होत्रा अनुक्था अन्याः कथमस्यैता उक्थिन्यः सर्वाः समाः समृद्धा भवन्ति AitBr. 28.5(715)

अनुक्रंस्यमान (anu-kraṁsyamāna) *adj.* which will be subsequently stated or introduced ये प्रत्ययास्तिङ्शिद्वर्जितास्ते आर्धधातुकसंज्ञा भवन्ति न त्वनुक्रंस्यमाना इत्यर्थः PradI. iii. 286A.23 (*on* iii. 4.114)

अनुक्रकच (anu-krakaca) *adj.* dentated like a saw, serrated [MW., Apte]

अनुक्रन्द् (anu-krand-) I. U. **i** to roar यं क्षोणीरनुचक्रदे ṚV. viii. 3.10; AV. xx. 9.4; xx. 49.7; **ii** to cry in reply दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितं वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुटाः MālaMā. 9.44; SubhāRaK. 31.7; **iii** to lament after भाग्यैकलभ्यं सौभाग्यं वसुदेवस्य संस्मरन्। राजानमनुचक्रन्द सर्वोऽपि विधुरो जनः PāṇḍaC. 2.120.

अनुक्रन्दत् (anu-krandat) *adj.* shouting loudly बलो मनुमनुक्रन्दन्नवर्षीदम्भसीमकम् Kapphiṇā. 18.22

अनुक्रन्दन (anu-krandana) *n.* a cry in reply [Apte]

अनुक्रन्दमाना (anu-krandamānā) *adj.* (*f.*) crying after रुदता स्त्रीजनेनोच्चैः पत्न्यानुक्रन्दमानया। जनेन वीक्ष्यमाणश्च दरिद्रः पञ्चतां गतः SamarāSaṁ. 9.159.

अनुक्रम् (anu-kram-) I. U. [P. vii. 3.76] **1** to go after, to follow in order शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः। अनु क्रामेम धीतिभिः ṚV. v. 53.11; अनु प्रत्नास आयवः पदं नवीयो अक्रमुः SV. ix. 23.2; SV. I. vi(1). 2 6; SVAnukramaṇikā 1.502; य इन्दोः पवमानस्यानु धामान्यक्रमीत्। तमाहुः सुप्रजा इति ṚV. ix. 114.1; (धर्म) दिवस्त्वा धर्मणा वृषमनुक्रामाम VājaS. 38.19; VājaS.(K.) 38.5; ŚatBr. XIV iii. 1.9; 283.12; अथास्या दक्षिणेन पदा दक्षिणानि षट् पदान्यनुनिक्रामति (v.l. अनुक्रामति) BhārŚS. x. 15.6; यज्ञेन वै देवा अनुक्रमिष्यामः MānŚS. 177.18; पृथिव्यास्त्वा धर्मणा। वयमनुक्रामाम TaiĀ. iv. 11.3 (501 3); BaudhŚS. i. जातीयेन तृणान्तर्धानेन सर्वाननुक्रामति VārāŚS. III. ii. 1.18; III. ii. 6.6; III. ii. 6 49; दक्षिणेन प्रक्रम्य सव्येनानुक्रामेत् GobhiGS. ii. 2.12; कृतस्थानलिङ्गो वृत्तिविशेषाननुक्रामेत् ŚaṅkhaLiDS. 158; 253; 326; नियमाय परोपाम्यामेव नान्यस्य हेः। अनुक्रामति JainaVyā. 28.13 (*on* i. 2.35); सतां प्रसङ्गान्मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः। तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति BhāgP. iii. 25.25; (*caus.*) **i** to go after, to chase ओं ह्रीं चामुण्डे। श्मशानवासिनि।… ओं मारय ओमनुक्रमय AgniP. 135.1 (388.1); **ii** to set in motion अत्रापि त एव प्रक्रियामनुक्रमयन्ति PrakaPañ. 372.1; **2** to go through in order, to narrate, to introduce नेतायुर्दीर्घमश्नुते। इत्युक्त्वानुक्रामेद् वंशमा ब्राह्मणः VaṁśBr. 3.1; अथ निगदव्याख्याताः (मन्त्राः)।ताननुक्रमिष्यामः TaiĀ. i. 9.4 (67.1); i. 13.3 (109.3); अथातोऽनुक्रमिष्यामः Nir. 2.5 (46.13); 4.1 (75.2); ब्राह्मणव्याख्याता विकाराः। ताननुक्रमिष्यामः ĀpaŚS. xix. 14.5; xix. 18.13; xxii. 20.13; MānŚS. 32.20; KāṭhGS. iv. 3.9; इह उत्तरं या विभाषा अनुक्रमिष्यामोऽप्राप्ते ता द्रष्टव्याः MahāBh. i. 105.22 (*on* i. 1.44); इदानीं साध्यशेषमनुक्रमिष्यामः TantrVā. 863.12 (*on* iii. 3.14); क्वचित् सर्वेन्द्रियाणि अनुक्रामन्ति BrahmSūBh.(Śaṅ.) 360.9 (*on* ii. 2.10); 503.1 (*on* ii. 4.6); अधिकारोऽयमाध्यायसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामस्तत् पाद इत्यधिकृतं वेदितव्यम् MṛtaSaṁ. 17.3 (*on* 3.1); Prasā. i. 468.20; MṛtaSaṁ. 94.9 (*on* 5.1); आर्षीयतां कर्मकाण्डशेषाननुक्रमिष्ये त इमान् सुपेशान् BhāgP. ii. 6.45; सोऽयं भाष्यकारानुसारेण पादार्थोऽनुक्रान्तः। वृत्तिकारमतं तु पश्चादनुक्रमिष्यामः ŚāstrDī. 19.13 (*on* i. 1.2); इदानीं ताः क्रिया अनुक्रामति Mitā. 5.15 (*on* 1.11); तस्य हेत्वादि वाक्यं तदर्थतोऽनुक्रामति VedāntKa. 125.13 (*on* i. 1.10); जन्मादिसूत्रार्थमनुक्रामति अनन्तेति ŚrutaPra. iB. 234.16 (*on* i. 2.1); इदानीमुत्तरसूत्राणि संगमयन् … एतत्पादगतपदार्थाननुक्रामति YuktiSneha. 18.36 (*on* i. 1.2); (श्लोकाः) उक्ता एव निषेकादिक्रियाः कालविशेषसंबन्धेनान्वक्रामन् VīraMi 27.14 (*on* 1.11); (pass.) to be narrated, to be introduced, to be mentioned यथानुक्रान्तं यच्चानुक्रंस्यते सर्वस्यैव शेषस्तस्य चेति MahāBh. i.186.9 (*on* i. 1.72); ii. 131.8 (*on* iii. 2.135); आथर्वणे उत्पत्तिप्रकरणे भूतानामात्मनश्चान्तराले करणान्यनुक्रम्यन्ते BrahmSūBh.(Śaṅ.) 444.11 (*on* ii. 3.15); स इदानीं स्वविपर्ययक्रमशो दुष्कृतशेषचिह्नरूपतोऽनुक्रम्यते ManuBh. ii. 384.5 (*on* 11.47); नामधेयत्वेनतद्वो विस्तरभयान्नानुक्रम्यन्ते Kāśi. ii. 27.4 (*on* 5(2).3); दाशतयानां हि सूक्तानां ऋषिभिः साकल्येन संयोगोऽनुक्रम्यते SaṅkarKāBh. 72.8 (*on* ii. 1.61); अथ स्मृत्यन्तरोक्तानि रहस्यप्रायश्चित्तान्यनुक्रमिष्यन्ते Aparā. 1215.12 (*on* 3.311); अधिकरणं तु गुणोपसंहारेऽनुक्रमिष्यते VedāntKa. 25.17 (*on* i.1.1); 66.21 (*on* i.1.4); **3** to go around, to wander नाराचाभिहतः शीघ्रमात्मत्राणपरो मृगः। गिरिपादपसंबाधां सोऽन्वाक्रामन्महाटवीम् MārkP. 21.7; **4** to begin, to undertake तत्र शल्यादिसाध्ये भेषजमनुक्रमते न तु भेषजसाध्ये शल्यादि AṣṭāSaṁ. i. 74.22 (1.12); अधिकारात् द्वादशमात्राकालव्यापकं पूरकं च प्राणायाममनुक्रमेदारभेत VīraMi. 901.23 (*on* 3.200)

